एकैव भगिनी मोक्षे (? मोक्षे) सर्वेषामेव भूभुजां ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥

इति बृहस्पतिकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1328.

2047c. Foll. 4; size 11 in. by 5 in.; good, modern Devanāgarī writing; ten lines in a page.

Laghu-Bṛihaspati-smṛiti, in 49 *ślokas*.

It begins:

बृहस्पतिकृतं पुण्यं प्रवक्ष्यामि विशेषतः ।
यच्छ्रुत्वा तु नलो राजा सर्वपापैः प्रमुच्यते ॥ १ ॥

इष्ट्वा [क्र]तुशतं राजा ° २ ॥ भगवन्केन ° ३ ॥

एवमिंद्रेण ° ४ ॥

स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ।
विष्णुस्तु पादशौचेन अन्नाद्येन प्रजापतिः ॥ ५ ॥

पादशौचं तथाभ्यंगं दीपमन्नं प्रतिश्रयं ।
ये ददति सहस्राक्ष नोपसर्पंति ते यमं ॥ ६ ॥

सुवर्णदानं ° ७ ॥

अग्नेरपत्यं प्रथमं सुवर्णं
भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवंति दत्ता
यः काचनं गां च महीं च दद्यात् ॥ ८ ॥

सर्वेषामेव दानानामेकं जन्मानुगं फलं ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलं ॥ ९ ॥

यः कश्चित्कुरुते पापं ° १० ॥

निःशंकं चरते यत्र गवामेकोत्तरं शतं ।
गोचर्म इति तद्भूयात् ऋषिभिः परिकीर्तितं ॥ ११ ॥

दशहस्तेन ° १२ ॥

धेनुर्मिश्रमते यत्र आकर्णोदरपूरितं ।
तं च हस्तं विजानीयात् राजहस्तः स उच्यते ॥ १३ ॥

विप्राय दद्यात्सगुणान्विताय ° १४ ॥

यथाम्भु पतितं तैलं तैलबिंदु विसर्पति ।
एवं भूमिकृतं दानं सस्ये सस्ये प्ररोहति ॥ १५ ॥

फालकृष्टां महीं दद्यात् सबीजां सस्यमालिनीं ।
यावत्सूर्यकृतान् लोकान् तावत्स्वर्गे महीयते ॥ १६ ॥

इक्षुभिः संततां भूमिं व्रीहिभिर्यवशाड्वलैः ।
यो ददाति सहस्राक्ष न स प्रच्यवते दिवः ॥ १७ ॥

यथा गौर्भरते वत्सं क्षीरिणी क्षीरमुत्सृजेत् ।
एवं दत्ता सहस्राक्ष भूमिर्भरति भूमिदं ॥ १८ ॥

शंखं भद्रासनं ° १९ ॥

आदित्यो वरुणो विष्णुर्ब्रह्मा ° २० ॥

सौवर्णा यत्र प्रासादा वासोद्धाराश्च कामदाः ।
गंधर्वाप्सरसो यत्र तत्र तिष्ठंति भूमिदाः ॥ २१ ॥

आस्फोटयंति ° २२ ॥

सगरस्य दिलीपस्य ययातेर्नहुषस्य च ।
अन्येषां च नरेंद्राणां त्यक्त्वा भूमिं दिवं गताः ॥ २३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २४ ॥ ०

It ends :

आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु ।
विनाशं(!) पात्रदौर्बल्यात् न तत्पात्रं विधीयते ॥ ४५ ॥
[(Dh., p. 649, l. 10).

एवं गावो हिरण्यं च वस्त्रमन्नं महीं तिलान् ।
अविद्वान्प्रतिगृह्णीयात् भस्मीभवति काष्ठवत् ॥ ४६ ॥
अश्रोत्रियस्य विप्रस्य क्रियाहीनस्य पार्थिव ।
प्रतिग्रहो न दातव्यो न जले तारयेत् शिला ॥ ४७ ॥
श्रोत्रियाय कुलीनाय दरिद्राय पुरंदर ।
शांताय वै गृहस्थाय दत्तं भवति चाक्षयं ॥ ४८ ॥
एतेषु चैव यद्दत्तं दानं प्रेक्षेषु(? l. पात्रेषु) शक्तितः ।
कुलान्युद्धरते पुंसां दशपूर्वान्दशावरान् ॥ ४९ ॥

इति श्रीवृहस्पतिप्रोक्तं धर्मशास्त्रं लघु समाप्तं ॥ लघुवृहस्पतिस्मृतिः ॥ [Gaikawar.]

1329.

2489a. Foll. 5; size 11 in. by 5¼ in.; well written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Yama-smṛiti [A], a treatise on purification, different from the one printed in the Calc. Dh. I., pp. 560–567, but agreeing with that described in Burnell's Index of Tanj. MSS., p. 126*a*. It begins :

श्रुतिस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः ।
प्राब्रवीदृषिभिः पृष्टो मुनीनामग्रणीर्यमः ॥ १ ॥
यो भुंजानो ऽशुचिर्वापि चंडालं पतितं स्पृशेत् ।
क्रोधादज्ञानतो वापि तस्य वक्ष्यामि निष्कृतिं ॥ २ ॥
षड्रात्रं वा त्रिरात्रं वा यथासंख्यं समाचरेत् ।
स्नात्वा त्रिषवणं विप्रः पंचगव्येन शुध्यति ॥ ३ ॥
भुंजानस्य तु विप्रस्य कदाचित् सवतो गुदं ।
उच्छिष्टत्वे ऽशुचित्वे च तस्य शौचं विनिर्दिशेत् ॥ ४ ॥
पूर्वं कृत्वा द्विजः शौचं पश्चादप उपस्पृशेत् ।
अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ ५ ॥
निगिरन्यदि मेहेत (मेहेन्नत् B) भुक्ता वा मेहने कृते ।
अहोरात्रोषितो भूत्वा जुहुयात्सर्पिषाहुतिं ॥ ६ ॥
यदा भोजनकाले स्यादशुचिर्ब्राह्मणः क्वचित् ।
भूमौ निधाय तद् ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ॥ ७ ॥
भक्षयित्वा तु तद् ग्रासमुपवासेन शुध्यति ।
अशित्वा चैव तत्सर्वं त्रिरात्रमशुचिर्भवेत् ॥ ८ ॥

Up to *śloka* 13, this treatise is very similar to the *Vṛiddha-Śātātapasmṛiti*, no. 1360, below.

It consists of 99 *ślokas*, the last but one of which is wanting in this MS.:

आपो देवगणाः प्रोक्ताः आपः पितृगणास्तथा ।
तस्मादप्सु जलं देयं पितृणां हितमिच्छता ॥ ९६ ॥
[दिवा संध्यासु सततं (दिवा सूर्यांशुभिस्तप्तं B) रात्रौ [नक्षत्रमारुतैः ।
संध्ययोरुभयोर्न्यां (० रप्सुभाभ्यां B) च पवित्रं सर्वदा [जलं ॥ other MSS.]
स्वभावयुक्तमव्याप्तमेध्येन सदा शुचि ।
भाजनस्थं धरणीस्थं वा पवित्रं सर्वदा जलं ॥ ९७ ॥
[देवतानां पितृणां च जले दद्याज्जलांजलीन् ।
असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलीन् ॥ ९८ ॥]
श्राद्धे हवनकाले तु दद्यादेकेन पाणिना ।
उभाभ्यां तर्पणे दद्यादिति धर्मो व्यवस्थितः ॥ ९९ ॥

इति श्रीयमप्रणीतधर्मशास्त्रं समाप्तं ॥ यमस्मृतिः समाप्ता ॥ [Gaikawar.]

1330.

2096c. Foll. 5; size 9½ in. by 6½ in.; legibly written, in Devanāgarī, towards the end of last century; 13–19 lines in a page.

Yama-smṛiti. [B]. [Gaikawar.]

1331.

3247a. Foll. 1*a*–4*a*; size 10 in. by 7½ in.; 4to.; Telugu character; 21 or 22 lines in a page.

The same work [C].

Colophon : इति श्रीयमकृषिणा विरचितधर्मशास्त्रे सर्वधर्मप्रसंगो नाम प्रथमो ऽध्यायः ॥ [Mack. Coll.]

DR.RUPNATHJI(DR.RUPAK NATH)

1332.

3248a. Foll. 1*a*–5*a*; size 9½ in. by 7¾ in.; 4to.; Telugu character; 19–21 lines in a page.

The same work [D].

Colophon as in last MS.

[Mack. Coll.]

1333.

3249a. Foll. 1*a*–4*a*; size 10 in. by 7¾ in.; 4to; Telugu character; 19–21 lines in a page.

Another copy of the *Yama-smṛiti* [E]; with the same colophon as in last MSS. These three copies are probably derived from the same original. [Mack. Coll.]

1334.

3245e. Foll. 15*a*–16*b*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 39 or 40 lines in a page.

Yama-Dharmaśāstra, different from the preceding treatise.

It begins:

आश्रमस्थं सुखासीनं वेदशास्त्रविशारदं ।
अपृच्छन्नृषयो गत्वा यमं यतमानसं (? यतिव्र° or संय°) ॥
ऋषयः । महापात[क]संयुक्ता उपपातकिनस्तथा ।
यैर्यैर्वितैर्विशुध्यंति (? यैर्विहितै°) तन्नो ब्रूहि महामुने ॥
यमः । दिवा वातार्कसंसृष्टं रात्रौ तच्चन्द्रमारुतैः ।
संध्याद्वयोर्वा संध्याभ्यां पवित्रं सर्वदा जलं ॥
स्वभावयुक्तमव्याप्तममेध्येन सदा शुचिः ।
अपादोष्टहयाद्यैश्च मानुषैश्चरितं विना ॥
दृष्ट (? इष्ट्वा) स्नात्वा शुचिः सद्यो नरः संध्यादिरात्रिषु ।
अत्यादज्ञानते (? सद्यादज्ञानतो) भुक्ता चंडालान्नमथापि [वा ॥

It consists of 57 *ślokas* (*śl.* 38–57 in the *indravajrā* metre) ending thus:

केचिद्वदंत्येवमिमं प्रमाणं
नित्यं तज्जीवो म्रियते कदाचित् ।
वेदैश्च पृष्टमृषिभिश्च गीतं
चांद्रायणादीनीह पावनानि ॥
पापा यदिच्छंति हिताय कर्तुं
संसारमिच्छंति हिताय कर्तुं ।
संसारमिच्छंति फलं तदा स्याज्
ज्ञानप्रदीपेन तमोंधकारे ॥

इति यमकृतधर्मशास्त्रं समाप्तं ॥

[Mack. Coll.]

1335.

723b. Foll. 4; size 12¾ in. by 5¾ in.; good, modern Devanāgarī writing; ten lines in a page.

Likhita-Dharmaśāstra [A].

It begins:

इष्टापूर्तं तु कर्तव्यं ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्तेन मोक्षमवाप्नुयात् ॥

It consists of 97 *ślokas* (not numbered), which follow the order of the text in the Calc. Dig. II., pp. 375–382 (92 *ślokas*), with the following five additional verses:—after p. 377, l. 19, it inserts:

अग्नौ करणशेषं तु विप्रदेवादि हूयते ।
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥
यो ह्यग्निः स द्विजो विप्रैर्मैत्रदर्शिभिरुच्यते ।
अजस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे ॥
रजते च सुवर्णे च नित्यं वसति पावकः ।
यत्र यत्र प्रदातव्यं श्राद्धं कुर्वीत पार्वणं ॥

p. 380, last line, it reads:

उद्यताः सह धावंते सर्वे ये शस्त्रपाणयः ॥

and then inserts:

यद्येकोऽपि हनेत्तत्र सर्वे ते ब्रह्मघातकाः ।
बहूनां शस्त्रघातानां यद्येको कर्मघातकः ॥

after p. 381, l. 4, it inserts:

स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये ।
महापातकिसंस्पर्शे स्नानमेव विधीयते ॥

It ends:

यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ॥

इति श्रीलिखितप्रोक्तं धर्मशास्त्रं संपूर्णं ॥

[H. T. Colebrooke.]

DR. RUPNATHJI (DR. RUPAK NATH)

1336.

2047e. Foll. 5; sizo 11 in. by 5 in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Likhita-Dharmaśāstra, in 94 *ślokas* (numbered) [B].

Rather incorrect.

This MS. has the same additional five *ślokas* as A; but omits p. 377, ll. 5, 8, 14, 15, 17–19.

[Gaikawar.]

1337.

2096d. Foll. 3; size 9½ in. by 6½ in.; legibly written, in Devanāgarī, about 1750 A.D.; 13–16 lines in a page.

A shorter recension of the same treatise, but ascribed to *Śaṅkha*. It consists of only 71 *ślokas* (numbered), and otherwise also differs very considerably in its readings from the foregoing MSS.

It begins:

इष्टापूर्तं तु कर्तव्यौ ब्राह्मणेन विशेषतः ।
इष्टेन लभते स्वर्गं मोक्षं पूर्तेन विंदति ॥ १ ॥
एकाहमपि कौंतेय भूमिस्थमुदकं कुरु ।
कुलानि तारयेत्सप्त यत्र गौर्विंतृषी भवेत् ॥ २ ॥ °

On p. 376 (Calc. Dh. II.), ll. 4–9, 18–21 are omitted in this MS. In the first part of this version there is more agreement with the larger treatise than in the latter part.

It ends:

बालत्वे तद्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यात् नाशौचं नैव सूतकं ॥

[Dh. II., p. 382, ll. 8, 9.

अहस्त्वदत्तकन्यासु बालेषु च विशोधनं ।
कुर्वंनेवाग्निहोत्रातमातुलश्रोत्रिये तथा (!) ॥ ६४ ॥
आ दंतजन्मनः सद्यः आ चौडान्नैशिकी स्मृता ।
चिरात्रं तु व्रतादेशाद्दशरात्रमतः परं ॥ ६५ ॥
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् ।
अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा ॥ ६६ ॥
आममांसं घृतं क्षौद्रं स्नेहश्च फलसंभवाः ।
म्लेच्छभांडस्थिता स्नेते निष्क्रांताः शुचयः स्मृताः ॥ ६७ ॥
दिवा कपित्थच्छायासु रात्रौ दधिफलेषु वा ।
धात्रीफलेषु सप्तम्यां(!) अलक्ष्मीर्वसते सदा ॥ ६८ ॥
शूर्पवातनखाग्रांतकेशबंधघटोदकं ।
माजनीरेणुसंस्पर्शं हंति पुण्यं दिवा कृतं ॥ ६९ ॥
अर्धवासस्तु यः कुर्याज्जपहोमक्रिया द्विजः ।
तत्सर्वं राक्षसं विंद्या (? विद्याद्) वह्निर्जानु च यत्कृतं ॥ ७० ॥
यत्र यत्र च संकीर्णं पश्यत्यात्मं न संशयं (!) ।
तत्र तत्र तिलैर्होमं (l. °मो) गायत्र्यावर्तनं तथा ॥ ७१ ॥

इति शंखकृते शंखस्मृतिः संपूर्णा ॥

[Gaikawar.]

1338.

3246e. Foll. 13*b*–16*b*; size 8¾ in. by 7½ in.; 4to; coarse Indian paper; Telugu character; 13–24 lines in a page.

Another similar shorter recension of the *Likhita-smṛiti*, likewise ascribed to *Śaṅkha*. Though agreeing in many respects with the preceding version, it yet differs from it considerably, both in regard to matter and various readings. It also has a special introduction (whence it might be called *Dālbhya-smṛiti*); viz.:

कृताभिषेकं तु दाल्भ्यमाश्रमे समुपस्थितं ।
पर्यपृच्छंस्तु धर्मांश्च ऋषयो वेदपारगाः ॥
धर्माधर्मविवेकं च शुद्धिं जातमृतस्य च ।
अभक्ष्याणि च वस्तूनि मासशुद्धिं तथैव च ॥
श्राद्धकल्पं च [? ब्राह्मणं] गोघ्नं चंडालसंकरं ।
परिवित्तिपरिवेत्ता च कथये ऽहं यथातथं ॥

दाल्भ्य उवाच ।

स्मृतिसारं प्रवक्ष्यामि यथा शंखेन भाषितं ।
इष्टापूर्तविधींश्चैव प्रायश्चित्तविधिं तथा ॥
इष्टापूर्तं च कर्तव्यं ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते मोक्षं पूर्तो स्वर्गं विधीयते ॥
भूमिदानेन ये लोका गोदानेन च कीर्तिताः ।
तान् लोकान् प्राप्नुयात्सर्वान् पादपानां प्ररोपणे ॥ °

DR.RUPNATHJI(DR.RUPAK NATH)

There are altogether 74 *ślokas*, ending thus:

वालकोंतर्दशाहे तु ० । मद्य एव विशुध्य स्याद ० ॥
आ दंतजन्मनः० । आविवाहत्रिरात्रं स्याद्दशरात्रमतः परं॥
अहस्यदत्तकन्यासु ० ।
कुर्वंत्येवाप्यनूचाने मातुलश्रोत्रियेषु च ॥
आदावारभ्य चाशौचं संयो[गो] यस्य नाग्निभिः ।
दहनाद्येव कर्तव्यं यस्य वैतानिको विधिः ॥
शावाशौचे समुत्पन्ने सूतकं तु यथा भवेत् ।
शावेन शुध्यते सूतिर्न सूत्या [शाव]शोधनं ॥
दाराग्निहोत्रसंयोगं यः करोत्यग्रजे स्थिते ।
परिवेत्ताशी विज्ञेयः परिवित्तस्तु पूर्वजः ॥
परिवित्तिः परिवेत्ता यया च परिविंदति ।
सर्वे ते नरकं यांति दातृयाजकपंचमाः ॥
[(Manu III. 171-2).
कुष्ठे वामनषंडेषु गद्गदेषु जडेषु च ।
जात्यंधे भदरे मूके न दोषः परिवेदने ॥
पितृव्यपुत्राः सापत्न्याः परनारीसुताश्च ये ।
दाराग्निहोत्रसंयोगान्न दोषः परिवेदने ॥

[The preceding six *ślokas* do not occur in the other version].

ज्येष्ठो भ्राता यदा ० । अनुज्ञातस्तु कुर्वीत ० ॥
आममांसं ० ।
शूद्रभांडस्थिता दृष्टा शुद्धाः पात्रांतरं गताः ॥
दिवा कपित्थच्छायायां रात्रौ दधिगवीषु च ।
धात्रीफलेषु सप्तम्यां दुर्लक्ष्मी वसते सदा ॥
यत्र यत्र तु संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्रैति वै होमो गायत्र्यावर्तनं तदा ॥
य इदं धर्मशास्त्रं तु शंखप्रोक्तं पठेद् द्विजः ।
श्रद्दधानो ऽनसूयश्च पुण्यांल्लोकानवाप्नुयात् ॥
इति शंखकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1339.

1749a. Foll. 78; size 8½ in. by 3 in.; legibly written in Devanāgarī, about the end of the 17th century; eight or nine lines in a page.

Vasishṭhasmṛiti, a compendium in ten adhyāyas, of religious duties enjoined on the votaries of *Vishṇu*, ascribed to *Vasishṭha*.

The work begins:

गुरुमिक्ष्वाकुवंशस्य वसिष्ठं ब्रह्मसंभवं ।
पप्रच्छुर्मुनयः सर्वे पराशरपुरोगमाः ॥
भगवन् भवता प्रोक्ता यज्ञदानव्रतादयः ।
वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृतां ॥
अधुना श्रोतुमिच्छामो विप्राणां विष्णुसेविनां ।
कीदृग्विधाः प्रकर्तव्या नित्यनैमित्तिकाः क्रियाः ॥
वैष्णवानां मुनिश्रेष्ठ ब्रूहि सर्वमशेषतः ।
श्रीवसिष्ठ उवाच ।
शृणुध्वं मुनयः सर्वे सर्वधर्मं सनातनं ॥
वैष्णवानां च विप्राणां यद्यदाचरणं शुभं ॥
सर्गादौ ब्राह्मणाः सृष्टाः वैष्णवत्वेन चोदिताः ।
इतरे च त्रयो वर्णा ब्रह्मणा विष्णुसेविना ॥
तस्माच्च वैष्णवा विप्राः प्रकटा द्विजसत्तमाः ।
अवैष्णवत्वं विप्राणां महापातकसंमितं ॥
अवैष्णवाश्च ये विप्राः सर्वकर्मसु गर्हिताः ।
रौरवं नरकं प्राप्य चाण्डालीयोनिमाप्नुयुः ॥ ० ॥
वैष्णवत्वेन संसिद्धिं लभते नात्र संशयः ।
नारायणं परं ब्रह्म ब्राह्मणानां हि दैवतं ॥
सोमसूर्यादयो देवाः क्षत्रियाणां विशामपि ।
शूद्रादीनां तु रुद्राद्या अर्चनीयाः प्रयत्नतः ॥
यत्र रुद्रार्चनं प्रोक्तं पुराणेषु स्मृतिष्वपि ।
तद्ब्रह्मण्यविषयमेवमाह प्रजापतिः ॥

Adhyāyas II.–IV. treat of the *saṃskāras* ordained for *Vaishṇava brāhmaṇas*; A. V., of the duties of women; A. VI. and VII., of the propitiation (*ārādhana*) of *Vishṇu*; A. VIII., of *śrāddha*; A. IX., of *āśauca*; A. X., of the setting up and inauguration of statues of *Vishṇu*.

It ends:

प्रतिष्ठासु च कर्त्तव्यो विधिरेष उदाहृतः ।
गृहार्चनं च कर्तव्यं विधिं वक्ष्यामि सत्तमाः ॥
स्नापयेत्पञ्चगव्येन मन्त्रपूतजलेन च ।
मन्त्रेणावाहयेद्देवं परो (? l. परे) व्योम्नि स्थितं विभुं ॥

DR.RUPANATHJI(DR.RUPAK NATH)

महाभागवतः स्पृष्ट्वा मन्त्ररत्नं जपेत्सुधीः ।
दद्यात्पुष्पाञ्जलिं पश्चात्तेनैव शतसंख्यया ॥
आज्यं तेनैव होतव्यमष्टोत्तरशतं ततः ।
उपचारैः समभ्यर्च्य नमस्कुर्याच्च भक्तितः ॥
वैष्णवान् भोजयेत्पश्चाद्दक्षिणाभिः प्रतोषयेत् ॥
इति वसिष्ठस्मृतौ दशमो ऽध्यायः समाप्तः ॥

This is one of the spurious sectarian codes. There are several other versified *smṛitis*, ascribed to *Vasishṭha*, for which cf. West and Bühler, Digest 3rd ed., pp. 28, 52; Burnell, Tanjore Cat., p. 127*a*. For the older *Vāsishṭha-Dharmaśāstra* see above, nos. 1251–54.

[H. T. COLEBROOKE.]

1340.

913a. Foll. 65; size 13¼ in. by 6 in.; large, modern Devanāgarī writing; ten lines in a page.

Vaishṇava-Dharmaśāstra (*Vishṇu-smṛiti*); Institutes of Law in 100 adhyāyas, which profess to have been taught by *Vishṇu* to his consort *Lakshmī*.

It begins:

ब्रह्मरात्रौ (° रात्र्यां other MSS.) व्यतीतायां विबुद्धे
[(प्रबुद्धे v. l.) पद्मसंभवे ।
विष्णुः सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलप्लुतां ॥

Prof. J. Jolly has published a critical edition of this work in the Bibliotheca Indica (1881), and an English translation, in the Sacred Books of the East, vol. vii. [H. T. COLEBROOKE.]

1341.

540. Foll. 72; size 9½ in. by 2½ in.; fairly written, in Devanāgarī, c. 1750 A.D.; seven lines in a page.

The same work.

One or two leaves have been lost at the end, the MS. breaking off shortly after the beginning of the 97th adhyāya.

[H. T. COLEBROOKE.]

1342.

915. Foll. 299; size 12½ in. by 5¾ in.; fairly written, in Devanāgarī, in the latter part of last century; fifteen lines in a page.

Vishṇu-smṛiti, with a commentary, entitled *Keśava-Vaijayantī*, composed, at Benares, in Saṃvat 1679 (1622 A.D.), by *Nanda Paṇḍita*, son of *Rāma Paṇḍita*.

The commentary begins:

श्रीवत्साङ्कितवक्षसः प्रणयिनो नित्यार्चने संविधाम्
आधातुं निहितं गिरीन्द्रसुतयोत्संगे गं (? मणिं) धूर्जटेः ।
चूडाचुंबिकलंकपंकिलकलं चंद्रं मृणालभ्रमाद्
आदातुं करमुद्यतं मसकृदुंढिं चिरं भावये ॥ १ ॥ °

Ninety-three introductory verses, the last but one of which runs thus:

काश्यां [कर्माधिकारिप्रथितकुलमणिर्धर्मशास्त्रैकनिष्ठः
श्रीमा[श्रीम]न्महीपत्यविधबुधमुतानंतसूरेस्तनूजः ।
श्रीरामस्तस्य सूनुः प्रथितबहुकृतिर्धर्मशास्त्रेषु नंदो
व्याचष्टे केशवीयप्रणयपरवशो वैष्णवं धर्मशास्त्रं ॥ ९२ ॥

It ends:

वर्षे विक्रमभास्करस्य गणिते नंदाद्रिषड्भूमिभिः १६७९
पूर्णे कार्त्तिकमासि वृश्चिकगते भानौ वृषस्थे विधौ ।
काश्यां केशवनायकस्य नृपतेराज्ञामवाप्य स्मृतेर्
विष्णोर्व्याकृतिमाचकार विमलां श्रीनंदशर्मा सुधीः ॥ ९ ॥
इति श्रीमन्महाराजाधिराजश्रीवशिष्ठवंशावतंसश्रीकोडपनायकात्मजश्रीतम्मसानायकापरनामधेयश्रीकेशवनायकप्रोत्साहितश्रीवाराणशीवासिधर्माधिकारिश्रीरामपंडितात्मजश्रीनंदपंडितकृतौ विष्णुस्मृतिविवृतिः श्रीमतो केशववैजयंती समाप्ता ॥

According to V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxii., *Nanda Paṇḍita* of Benares was descended from *Śrī Lakshmīdhara*, who originally resided at Bidar in Southern India, but subsequently went to live at Benares: 'from him *Nanda Paṇḍita* was sixth in descent (viz. *Śrī L.—Śrī Kṛishṇa—Mahīpati—Ananta—Rāma—Nanda P.*); and persons belonging to the ninth generation after *N. P.* are still flourishing in Upper India' (see complete genealogical chart). Thirteen works are there

DR.RUPANATHJI(DR.RUPAK NATH)

attributed to *Nanda*, viz. 1. *Dattakamīmāṃsā* (no. 1539); 2. *Navarātrapradīpa*; 3. *Smṛitisindhu*; 4. *Harivaṃśavilāsa* (three sections: *dānakautuka*, *āhnikak.* and *saṃskārak.*); 5. *Bālabhūshā* (this comm. on 6., is by *Bālakṛishṇa*, acc. to Bik. Cat., p. 476); 6. *Tattvamuktāvalī*; 7. *Mādhavānanda-nāṭaka* (rather *kāvya*); 8. *Keśava-Vaijayantī*; 9. *Vidvanmanoharā* (on *Parāśarasmṛiti*, see no. 1301); 10. *Śrāddhakalpalatā* (no. 1730); 11. *Tīrthakalpalatā*; 12. *Kālanirṇayakautuka* (part of 3.); 13. *Kāśīprakāśa*.—*Govinda*, author of the *Jyotisha-Ratnasaṃgraha*, is said to have been *Nanda's* eldest brother.

[H. T. Colebrooke.]

1343–1345.

1543–1545. Foll. 219, 98 and 282 resp.; size 11 in. by 5 in.; good, modern Devanāgarī writing; eleven lines in a page.

Nanda Paṇḍita's Keśava-Vaijayantī.

Vol. I. contains adhyāyas 1–18; II., adhy. 19–32; III., adhy. 33–100.

[H. T. Colebrooke.]

1346, 1347.

1246, 1247. Foll. 1–187, 188–337 resp.; size 9½ in. by 4 in.; legibly written, in Devanāgarī, about 1750 A.D.; 10–12 lines in a page.

The same work.

Vol. I. terminates in the middle of the comment on adhy. 16, *sūtra* 3.

[H. T. Colebrooke.]

1348.

723d. Foll. 5; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

[*Laghu-*]*Vaishṇava-Dharmaśāstra*, or [*Laghu-*]*Vishṇu-smṛiti*; a treatise on *ācāra*, in 107–109 *ślokas*, here divided into five chapters.

I. ऋषिमेकाग्रमासीनं विष्णुं मतिमतां वरं ।
पप्रच्छुर्मुनयः सर्वे कलापग्रामवासिनः ॥ १ ॥
कृतयुगे ह्यपक्षीणे नष्टो धर्मः सनातनः ।
तेन वै शीर्यमाणेन धर्मेण परमार्थतः ॥ २ ॥
त्रेतायुगे तु संप्राप्ते कर्तव्यश्चास्य संग्रहः ।
यथा संप्राप्यते ऽस्माभिस्तत्त्वं नो वक्तुमर्हसि ॥ ३ ॥
वर्णाश्रमाणां यो धर्मो विशेषश्चैव यः कृतः ।
भेदस्तथैव तेषां यस्तन्नो ब्रूहि द्विजोत्तम ॥ ४ ॥
ऋषीणां समचित्तानां त्वमेव परमोत्तमः ।
धर्मस्येह समस्तस्य नान्यो वक्तास्ति सुव्रत ॥ ५ ॥
श्रुत्वा धर्मं च हृष्यामो यथावत्परिभाषितं ।
तस्माद्ब्रूहि द्विजश्रेष्ठ सर्वेकामा इमे द्विजाः ॥ ६ ॥
इत्युक्तो ऋषिभिस्तैस्तु मुनिस्तु प्रीतमानसः ।
अनाद्यः श्रूयतां धर्मो वक्ष्यमाणो यथाक्रमात् ॥ ७ ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति तथापरः ।
एतेषां धर्मसारं यद्वक्ष्यमाणं निबोधत ॥ ८ ॥
ऋतावृतौ तु संयोगाद् ब्राह्मणो जायते स्वयं ।
तस्माद्विप्रस्तु संस्कारं गर्भादौ तु नियोजयेत् ॥ ९ ॥
जातकं कर्म कुर्याच्तु पुत्रे जाते तु वैदिकं ।
बहिर्निष्क्रमणं कुर्यान्नामकर्म दशोर्ध्वतः ॥ १० ॥
षष्ठे मासे तु संप्राप्ते अन्नप्राशनमाचरेत् ।
तृतीये ऽब्दे तु संप्राप्ते केशकर्म च कारयेत् ॥ ११ ॥
सीमंतोन्नयनं कर्म न स्त्रीसंस्कार इष्यते ।
गर्भस्यैव तु संस्कारो गर्भे चैव प्रयोजयेत् ॥ १२ ॥ ०

II. अथातः संप्रवक्ष्यामि गृहिणां धर्ममुत्तमं ॥ २७ ॥
प्राजापत्यं पदस्थानं सम्यक्स्थानं निबोधत ।
सर्वेषणीः समुत्थाय कृतशौचः समाहितः ॥ २८ ॥

III. गृहस्थो ब्रह्मचारी वा वनवासं यदा व्रजेत् ।
चीरवल्कलधारी स्यादकृष्टं चाशयेन्मुनिः ॥ ४१ ॥

IV. ब्रह्मचारी गृहस्थो वा वानप्रस्थो ऽथ वा मुनिः ।
विरक्तः सर्वकामेभ्यः पारिव्रज्यं (A. B.) समाश्रयेत् ॥ ६२ ॥

V. राज्ञां पुण्यवतामाज्ञा त्रिवर्गपरिरक्षणं ।
रक्षमाणस्तु यो धर्मस्तत्त्वतस्तन्निबोधत ॥ ९५ ॥
तेजः सत्यं व्रते दीक्षा संग्रामेष्वपलायिता ।
दानमीश्वरभावश्च क्षात्रधर्मः प्रकीर्तितः ॥ ९६ ॥ ० - -
कुर्याच्छूद्रश्च शुश्रूषां विप्रक्षत्रविशां क्रमात् ।
कुर्यादितरयोर्वैश्यः क्षत्रियो ब्राह्मणस्य तु ॥ १०६ ॥

DR.RUPNATHJI(DR.RUPAK MATH)

परिव्राजिस्यु (? °ज्या तु or °जिस्तु) संप्राप्निर्ब्राह्मणस्य [विधीयते ।

आश्रमाणामयं धर्मो मया प्रोक्तः सनातनः ॥ १०७ ॥

यद्यत्र विदितं किंचिन्नदन्येभ्यो विनिश्चयेत् ॥ १०८ ॥

इति वैष्णवे धर्मशास्त्रे पंचमो ऽध्यायः ॥ इति विष्णुस्मृतिः समाप्ता ॥

For yet a third *Vishṇusmṛiti* see Calc. Dh. I., pp. 60–69; Burnell, Index Tanj. MSS., p. 127*a*.

[H. T. Colebrooke.]

1349.

2489k. Foll. 6; size 11 in. by 5¼ in.; fairly good, modern Devanāgarī writing; ten lines in a page.

The same work.

This rather incorrect MS. has 109 *ślokas*, not divided into chapters; and it differs considerably in its readings from the other MS.

It begins:

विष्णुमेकाग्रमासीनं श्रुतिस्मृतिविदां वरं ।
पप्रच्छुर्मुनयः सर्वे कलापग्रामवासिनः ॥ १ ॥
कृतयुगे ह्यपक्षीणे तु प्रोक्त धर्मे(!) सनातनः ।
तेन वैश्वर्यमोहेन(!) धर्मो न प्रतिपादितः ॥ २ ॥

It ends:

कुर्याच्छूद्रस्तु शुश्रूषां ब्रह्मक्षत्रविशां क्रमात् ।
कुर्यादुत्तरयोर्वैश्यः क्षत्रियो ब्राह्मणस्य तु ॥ १०७ ॥

आश्रमास्तु त्रयः प्रोक्ता वैश्यराजन्ययोस्तथा ।
परिव्रज्याश्रमप्रति(!) ब्राह्मणस्यैव चोदिता ॥ १०८ ॥

आश्रमाणामयं धर्मो मया प्रोक्तः सनातनः ।
यदत्राविदितं किंचित् तदन्येभ्यो गमिष्यथः ॥ १०९ ॥

इति श्रीविष्णुप्रोक्तं लघुविष्णुधर्मशास्त्रं समाप्तं ॥ इति लघुविष्णुस्मृतिः समाप्ता ॥ [Gaikawar.]

1350.

69c. Foll. 37; size 10¾ in. by 3 in.; large, indifferent Devanāgarī writing of 1791 A.D.; four or five lines in a page.

Vyāsa-smṛiti, in four adhyāyas.

I. वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिं ।
पप्रच्छुर्मुनयो ऽभ्येत्य धर्मान्वर्णव्यवस्थितान् ॥ १ ॥
[43 *ślokas*.

II. एवं स्नातकतां प्राप्तो द्वितीयाश्रमकांक्षया ।
प्रतीक्षेत विवाहार्थमनिंद्यान्वयसंभवां ॥ १ ॥
[56 *ślokas*.

III. नित्यं नैमित्तिकं काम्यं नैमित्तिकमतः परं ।
त्रिविधं कर्म वक्ष्यामि गृहस्थस्यावधार्यतां ॥ १ ॥
[75 *ślokas*.

IV. इति व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि पुण्यानि मोक्षधर्माश्रितानि च ॥ १ ॥
[72 *ślokas*.

The MS. follows closely the order of verses of the text in the Calc. Dh. II., pp. 321–342; but it has the following additional lines:

After p. 322, line 3 (° कुटुंबिनः ।) it reads:

एते चान्ये च बहवः शूद्रा भिन्नाः स्वकर्मभिः ॥ ११ ॥
चर्मकारो भटो भिल्लो रजकः पुल्कसो नटः ।

After p. 325, l. 17 (° दूषिताम् ।) it inserts:

तावन्न दुष्टा दुष्टं च स्वार्थेभ्यो भेदयंश्च यत् ॥ ९ ॥

After p. 330, l. 4:

अहोत्यनुदिते (!) भानावित्येक उदिते रवौ ।
जपेदादित्यदेवत्यान्मंत्रान्मंत्रनियोगवित् ॥ ४ ॥

After ib. l. 19 (° फलमाप्नुयात्):

वेदेभ्यो ऽन्यच्च संतुष्टः स विप्रः शूद्रतामियात् ॥ १२ ॥

Before p. 338, l. 1:

क्रिमयः किं न जीवंति भक्षयंति परस्परं ।
परशोकाविरोधेन यो जीवति स जीवति ॥ २२ ॥

It ends:

पंक्तिभेदी वृथापाकी नित्यं ब्राह्मणनिंदकः ।
आदेशी वेदविक्रेता पंचैते ब्रह्मघातकाः ॥ ७१ ॥

इदं व्यासमतं नित्यमध्येतव्यं प्रयत्नतः ।
एतदुक्ताचारवतः पतनं नैव विद्यते ॥ ७२ ॥

इति वेदव्यासप्रोक्ते धर्मशास्त्रे चतुर्थो ऽध्यायः ॥ व्यासस्मृतिः समाप्ता ॥ [H. T. Colebrooke.]

1351.

2489f. Foll. 5; size 11 in. by 5¼ in.; good, modern Devanāgarī writing; nine lines in a page.

DR.RUPNATHJI(DR.RUPAK NATH)

Vyāsa-smṛiti. Adhyāya IV.

It begins:

इदं व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि धर्माणि मोक्षधर्मं शृणुष्व मे ॥ १ ॥ °

The MS., which is rather incorrect, counts 69 *ślokas*, but there is a lacuna extending from within *śloka* 32 to *śloka* 38.

It ends:

पंक्तिभेदी वृषापाको नित्यं ब्राह्मणनिंदकः ।
आदेशी वेदविक्री च षडेते (!) ब्रह्मघातकाः ॥ ६८ ॥
सुवर्णहारको हर्ता दाता हर्ता च ते त्रयः ।
नरकान्न निवर्तंते यावदाहूतसंप्लवं ॥ ६९ ॥
इति श्रीवेदव्यासमुनिप्रणीतं धर्मशास्त्रं ॥ इति व्यासस्मृतिः ॥

[Gaikawar.]

1352.

3246b. Foll. 3*a*–6*a*; size 8¾ in. by 7½ in.; 4to.; coarse Indian paper; Telugu character; 18–21 lines in a page.

The same section of the *Vyāsa-smṛiti.*

It begins:

इदं व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि पुण्यानि मोक्षधर्मेष्वशेषतः ॥

It ends:

ऋणहर्ता भूमिहर्ता धान्यहर्ता च ते त्रयः ।
नरकान्न निवर्तंते यावदाभूतसंप्लवं ।
इति व्यासकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1353.

3247d. Foll. 6*b*–8*b*; size 10 in. by 7 in.; 4to; Telugu character; twenty-three lines in a page.

The same chapter of the *Vyāsa-smṛiti;* consisting of 64 *ślokas.*

Beginning and end as in no. 1352.

[Mack. Coll.]

1354.

3248d. Foll. 8*b*–11*a*; size 9½ in. by 7¾ in.; Telugu character; eighteen lines in a page.

The same portion of the *Vyāsa-smṛiti.*

Beginning and end as in no. 1352.

[Mack. Coll.]

1355.

3249d. Foll. 8*b*–11*a*; size 10 in. by 7¾ in.; Telugu character; twenty lines in a page.

Another copy of the same chapter of the *Vyāsa-smṛiti.*

Beginning and end as in no. 1352.

This and the two prceding MSS. were probably derived from the same original.

[Mack. Coll.]

1356.

3245c. Foll. 7*a*–10*b*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; thirty-six lines in a page.

Vyāsa-smṛiti, in three adhyāyas.

This treatise corresponds to the *Laghu-Vyāsasaṃhitā* of the Calc. Dh. II., pp. 310–320, where, however, only two chapters are counted.

I. begins: ऋषय ऊचुः ।
अहन्यहनि कर्तव्यं ब्राह्मणानां (क्रमान्वितं) महामुने ।
तदाचक्ष्वाखिलं कर्म येन मुच्येत बंधनात् ॥
व्यास उवाच । विप्राः समाहितास्त्वद्य शृणुध्वं वदतो
अहन्यहनि कर्तव्यं ब्राह्मणानां क्रमान्वितं ॥ [मम ।
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थाननुचिंतयेत् ।
कायक्लेशांश्च तन्मूला[न्] वेदतत्त्वार्थमेव च ॥
उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥

II. अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसं ॥ °

III. ततः संध्यामुपासीत पूर्वोक्तविधिना ततः(? द्विजः) ।
आसीनस्तु जपेद् देवीं गायत्रीं पश्चिमां प्रति ॥ °

The last seven *ślokas* of the Calc. text.

Cf. Burnell, Tanjore Cat., p. 127*a*.

[Mack. Coll.]

DR.RUPNATHJI(DR.RUPAK NATH)

1357.

913c. Foll. 15; size 13¼ in. by 6 in.; large, modern Devanāgarī writing; ten lines in a page.

[*Vṛiddha-*]*Śaṅkha-Dharmaśāstra*, in eighteen adhyāyas. It begins:

स्वयंभुवे नमस्कृत्य सृष्टिसंहारकारिणे ।
चातुर्वर्ण्यहितार्थाय शंखः शास्त्रमथाकरोत् ॥

This MS. has the same matter, in exactly the same order, as the text in the Calc. Dh. II., pp. 343–374; except that it makes the 10th adhyāya begin with X., *śl.* 2 of the ed. (*śl.* 1 being taken along with the 9th); and the 14th adhyāya with the 4th line of the chapter as edited (नमेदायां); and that it has the following additional lines:

After p. 347, l. 13:

सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवं ।
श्राद्धं द्वादशकं कृत्वा श्राद्धे प्राप्ते त्रयोदशे ॥

After p. 348, l. 16 (पतिपूजनात् ।):

न व्रतैर्नोपवासेन न यज्ञैश्च पृथग्विधैः ।
राजा स्वर्गमवाप्नोति प्रजानां परिपालनात् ॥

After adhy. viii., l. 4:

सन्नागारान् चरेद्वैद्यं भिक्षितान्नान्विभक्षयेत् ।

After p. 354, l. 3 (० सर्वेशः ।):

इत्येवमुक्ता कर्तव्यं ततः संमार्जनं जले ।
आपो हि ष्ठेति तिसृभिर्यथावदनुपूर्वशः ॥

After p. 360, l. 4 (० तिलोदकं ।):

हेम्ना तु सह यद्दत्तं क्षीरेण मधुना सह ।
तदप्यक्षयतां याति पितॄणां तु तिलोदकं ॥

After p. 361, l. 12 (० विनिवेदयेत् ।):

अन्यत्र वृक्षमूलेभ्यः पावकेभ्यश्च पण्डितः ।

After p. 370, l. 17 (० रङ्गावतारिणः ।):

चिकित्स[क]स्य शूद्रस्य तथा स्त्रीमृगजीविनः ।
पंडस्य कुलजायाश्च तथा बन्धनचारिणः ॥

There is also considerable difference of reading at the beginning of adhy. III., where the MS. reads:

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्यं च संध्योपासनमेव च ॥
स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति ।
भृतकाध्यापको यस्तु उपाध्यायः स उच्यते ॥
माता पिता गुरुश्चैव पूजनीयाः सदा नृणां ।
क्रियास्तस्याफलाः सर्वे यस्यैते नादृतास्त्रयः ॥
प्रयतः कल्पमुत्थाय ०

The MS. ends:

शंखप्रोक्तमिदं शास्त्रं यो ऽधीते प्रयतः सुधीः ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥

इति श्रीमन्महर्षिशिरोरत्नायमानत्रयीनितरांजेगीयमानमहाविद्यान्यक्कृताखंडलोपदेशधिषण-शंखविरचितं धर्मशास्त्रं समाप्तम् ॥

[H. T. Colebrooke.]

1358.

84c. Foll. 10; size 10¾ in. by 4¾ in.; good, modern Devanāgarī writing; nine lines in a page.

The same work, marked on fol. 1*a* *Vṛihat-Śaṅkhasmṛiti-dharmaśāstra*.

It begins: स्वयंभूवे ० शास्त्रमकल्पयत् ॥

It ends:

शंखप्रोक्तमिदं शास्त्रं योधीते द्विजपुंगवः ।
सर्वपापविनि[मु]क्तः स्वर्गलोके महीयते ॥ १५ ॥

इति शंखप्रोक्ते धर्मशास्त्रे अष्टादशोध्यायः ॥

Cf. Burnell, Index Tanj. MSS., p. 127*b* (*Vṛiddha-Śaṅkhasmṛiti*).

For a short recension of the *Likhita-smṛiti*, ascribed to *Śaṅkha* see above, nos. 1337, 1338.

[H. T. Colebrooke.]

1359.

2047d. Foll. 2; size 11 in. by 5 in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Śaṅkha-Likhita-smṛiti, in 30 *ślokas*.

It begins:

वासुदेवं नमस्कृत्य शंखस्य लिखितस्य च ।
धर्मशास्त्रं प्रवक्ष्यामि दधि चैव घृतं यथा ॥ १ ॥
वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः । [॥ २ ॥
ते सर्वे वृषभावे (r. वृषला) ज्ञेयाः प्राप्नवेदा अपि द्विजाः
अकृते वैश्वदेवे तु ये भुंजंति द्विजातयः ।
वृथा ते तेन पाकेन काकयोनिं व्रजंति वै ॥ ३ ॥ ०

DR.RUPNATHJI(DR.RUPAK NATH)

It ends:

मन्युप्रहरणा विप्राश्चक्रप्रह[र]णो हरिः ।
चक्रात्तीक्ष्णतरो मन्युस्तस्माद्विप्रान्न कोपयेत् ॥ २९ ॥
अग्निदग्धं प्ररोहेत सूर्यदग्धं तथैव च ।
दग्धस्तु संप्ररो[हे]त ब्रह्मशापहतो हतः ॥

इति शंखलिखितप्रोक्तं धर्मशास्त्रं ॥ शंखलिखितस्मृतिः समाप्ता ॥

See Burnell, Index Tanj. MSS., p. 127*b* (*Śaṅkhasmṛiti*). [Gaikawar.]

1360.

69e. Foll. 11; size 10¾ in. by 3 in.; fair Devanāgarī writing of 1791 A.D.; 5–7 lines in a page.

Vṛiddha-Śātātapa-smṛiti, a treatise on defilement and purification, in 97 *ślokas*.

It begins:

वृद्धशातातपप्रोक्तं स्मृतितंत्रविनिश्चयं ।
संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये ॥ १ ॥
मूत्ररेतःसमुत्सर्गे यो भुंजीत पिबेत वा ।
त्रिरात्रं तत्र कुर्वीत प्रायश्चित्तं विशुद्धये ॥ २ ॥
मूत्रं कृत्वा व्रजन् यस्तु स्मृतिभंशाज्जलं पिबेत् ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ३ ॥
भुंजानस्य तु विप्रस्य कदाचित्स्रवते मुखं ।
उच्छिष्टमशुचित्वं च तस्य शौचं कथं भवेत् ॥ ४ ॥
पूर्वं कृत्वा तु तच्छौचं पश्चात्स्नानं समाचरेत् ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ५ ॥
निगिरत्यदि मेहेत भुंक्ते वा मेहने कृते ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ६ ॥
यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निक्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ॥ ७ ॥
अशित्वा सर्वे वापि त्रिरात्रेण विशुध्यति ।
अज्ञानान्निपतते तोयं ब्राह्मणः शूद्रजातिषु ॥ ८ ॥ ०

Up to *śloka* 12 this treatise shows great similarity to the *Yamasmṛiti* above, no. 1329.

It ends:

धात्रा विश्वं निर्मितं तु भूतग्रामानिमांस्तथा ।
कालः समस्तान्पचति कुर्यान्मोक्षे मनस्ततः ॥ ९५ ॥
विमुक्तविषयासंगः प्राणो हृदि निरुध्यते ।
यदायात्यमनोभावं तदा निर्वाणमिच्छति ॥ ९६ ॥
वृद्धशातातपो ह्येतदुक्तवानृषिसत्तमः ।
अध्येतव्यं प्रयत्नेन ब्राह्मणैः श्रेयईप्सुभिः ॥ ९७ ॥

इति वृद्धशातातपप्रोक्तं धर्मशास्त्रं समाप्तम् ॥

For another MS. (100 *ślokas*), see Burnell, Index Tanj. MSS., p. 127*b*; Rāj. Mitra, Notices, viii., p. 25.

[H. T. Colebrooke.]

1361.

2047a. Foll. 9; size 11 in. by 5 in.; fair Devanāgarī writing of about 1780 A.D.; ten lines in a page.

Śātātapa-smṛiti, a treatise on expiations and *ācāra*, in mixed prose and verse.

It begins: शातातपस्य महर्षेर्धर्मशास्त्रं व्याख्यामः ॥ ब्राह्मणं हत्वा शिरःकपालमादाय तीर्थांतरं संचरेदात्मनः पापशांतिनं कुर्वन् द्वाद[शा]ब्दैर्विशुध्यति ॥ अश्वाश्वमेधं पश्यति तद्दर्शनाच्छुद्धो भवति ॥ सुरापस्य सुरापाने शुद्धिः स्यात् ॥ ब्राह्मणसुवर्णहरणे राजसंनिधानात् सोमपानेन शुद्धिः स्यात् ॥ गुरुदाराभिगामिनस्तप्तायसीपरिष्वंजननैव शुद्धिः ॥ एषां यो येन संबध्यते तस्य तदेव प्रायश्चित्तं भवति ॥ पावकीयं चतुर्थकालं संविशेत् ॥ ०

Twenty precepts of this kind, followed by three *ślokas*:

अज्ञाताशी अयाजी च विप्रकीर्णो भवेद् द्विजः ।
न तारयति दातारं नात्मानं न परिग्रहं ॥ ०

After which a few more rules: अथोपपातकान्याहुः ॥ अग्न्युत्सादी कन्यादूषी स्त्रीघाती गोघ्नः भ्रूद्रघाती कुमारघाती यमितव्यवहारी ये तेषां प्रायश्चित्तानि ॥ अग्न्युत्सादने कृच्छ्रं ॥ कन्यादूषणे अर्धपादं ॥ स्त्रीघाती षण्मासान्कृच्छ्रेण ॥ वृषणाभिघाते प्राजापत्यं ॥ गोघ्नस्त्रीन्मासान्प्रजापत्यं कुर्यात् ॥ गोमतीं च जपेद्विद्यां ॥ भ्रूद्रवधे तप्तकृच्छ्रेण शुध्यति ॥ आहस्त्यश्च दातारिवधे भ्रूद्रवदकामकृते (!) प्रायश्चित्तं समाचरेत् ॥ followed by 139 *ślokas*:

प्राणायामास्त्रयस्तस्य व्रतं प्राश्य विशुध्यति ।
विवाहयेन्न सगोत्रां समानप्रवरां तथा ॥
तस्याः संबंधे ऽतिकृच्छ्रे चरेद् द्विजः ।
य उद्वहेत्सगोत्रां दुहितरं चैव मातुलां ।
पितृभिः सह तुल्यः स्यात् स तु चांद्रायणं चरेत् ॥

DR.RUPAKNATHJI(DR.RUPAK NATH)

नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं ।
नातिलोमां नालोमिकां न वा चाटां न पिंगलां ॥
[(Manu. 3, 8).

यस्यास्तु न भवेद् भ्राता ० ib. 11.

असपिंडा तु या मातुरसगोत्रा च या पितुः ।
सा विवाह्या द्विजातीनां दारकर्मणि मैथुने ॥ (ib. 5).

हंसस्वनां मेघवर्णां मधुपिंगललोचनां ।
तादृशीमुद्वहेत्कन्यां स चैल(r. चैव) सुखमृच्छति ॥

दाराग्निहोत्रसंयोगं ० ib. 171.

It ends:

अच्छिद्रमिति यद्वाक्यं वदंति क्षितिदेवताः ।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः सह ॥ १३८ ॥

शातातपमिति ख्यातं धर्मशास्त्रोत्तमोत्तमं ।
एतत् ज्ञात्वा द्विजः सम्यग्याति ब्रह्म सनातनं ॥ १३९ ॥

इति श्रीशातातपमहर्षिप्रोक्तं धर्मशास्त्रं संपूर्णं ॥ इति शातातपमहर्षिप्रोक्तस्मृतिः ॥ [Gaikawar.]

1362.

3245g. Foll. 22*a*–27*b*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 36 or 37 lines in a page.

Śātātapa-smṛiti, in twelve adhyāyas. A different treatise from the last, with which, however, it shows a few coincidences.

The MS. is extremely incorrect.

The chapters begin as follows:

I. *Mahā(pātaka)prāyaścitta:* तीर्थगो ब्राह्मणं हत्वा शिरःकपालमादाय तीर्थान्यनुचरेत् । आत्मनः पापसंकीर्णं कृत्वा द्वादशवर्षात्प्रमोहयति (!) । अथवा अश्वमेधं यक्ष्यति इति तस्य दर्शनात्पूतो भवति ।

ब्राह्मणस्तु सुरापस्थात्(l. ० श्चेत्) कथंचिन्नानुमोहितः ।
अग्निवर्णां सुरां पीत्वा मृतः शुद्धिमवाप्नुयात् ॥

उपहृत्य सुवर्णं तु ब्राह्मणस्य तु तत्स्वयं ।
कश्चित् मुसलमादाय राजानं स विधाय तु ॥ ०

II. *Abhakshyabhakshaṇakathana:* अथातो ऽवकीर्णिप्रायश्चित्तं व्याख्यास्यामः ॥ ब्रह्मचारी यद्यवकीर्यते चतुर्थकालापगमे नक्तं भेक्षं(!) चरेदेव संवत्सरात् पूतो भवति । ०

III. *Upapātakaprāyaścittakathana:* अथ उपपातकानि न्युत्सादको [r. अन्यु ०] [क]न्यादूषी स्त्रीघाती शूद्रघाती वृषलघाती गोघ्नः केन मारादारापत्य । त्यागी पतित । सख्यापहारियत्येषां (*sic*) प्रायश्चित्तमनुपादने (!) । कृच्छ्रशब्देन स्त्रीघाती षण्मासं शूद्रवधे सांतपनकृच्छ्रं ०

IV. *Himsāprāyaścittakathana:* अथ मूत्रपुरीषकरणे सचेलस्नानं महाव्याहृतिभिश्च होमो रजस्वलाभिश्चमैदर्शने ०

V. *Vivāhaprakaraṇa:*

यो हि हित्वा विवाहाग्निं ग्रहस्तयति (? गृहस्थ इति) [मन्यते ।

अन्नं तस्य न भोक्तव्यं वृथापाको ह्यसंस्कृतः ॥

वृथापाकस्य भुंजानः प्रायश्चित्तं चरेद् द्विजः ।
प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥ ०

VI. *Vaiśvadevakathana:*

लौकिकैर्वैदिकैर्वापि भुंक्ते च्छिष्टे जले क्षितं (!) ।
वैश्वदेवं न कर्तव्यं पंचसु (सू MS.) नापपन्नये (?) ॥

VII. *Śrāddhakathana:*

नाष्टं(!) तु पितृश्राद्धं कर्म वैदिकमाचरेत् । ०

VIII. (? *Pitṛitarpaṇa*):

दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तु प्रकीर्तितं ।
अपराह्णे पितॄणां तु यत्तु दानं प्रशस्यते ॥

IX. *Bhojanavidhi:*

अतिथिर्यत्र नाश्नाति न तत् श्राद्धं प्रशस्यते ।
श्रुतवित्तविहीनैश्च भुक्तमश्रोत्रियैस्तु वा ॥

X. *Śunādashṭaprāyaścitta:*

गवां शृंगोदकस्नानं महानद्युपसंगमात् ।
समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत् ॥

XI. *Āśaucakathana:* अथाशौचं ब्राह्मणस्य दशाहं द्वादशाहं क्षत्रियस्य अर्धमासं वैश्यस्य । ०

XII. *Ācārakathana:*

अब्राह्मणस्तु षट् प्रोक्ता इति शातातपो ऽब्रवीत् ।
आद्यस्तु राजभृत्यः स्यात् द्वितीयः क्र[य]विक्रयी ॥

It ends:

अग्निकार्यस्तु कुर्वीत वाग्यतो नान्यमानसः ।
भूतयज्ञं तथा श्राद्धं नित्यकृदिति तर्पणं ॥

इति शातातपधर्मशास्त्रे आचारकथनं नाम द्वादशोध्यायः ॥ इति शातातपधर्मशास्त्रं समाप्तं ॥

For other MSS. see Burnell, Index Tanjore MSS., p. 127*b*.

[Mack. Coll.]

DR.RUPNATHJI(DR.RUPAK NATH)

1363.

3246c. Foll. 6*a*–10*a*; size 8¾ in. by 7½ in.; ccarse Indian paper; Telugu character; 17–20 lines in a pagc.

Śātātapa-Dharmaśāstra, another treatise assignecl to the same sage.

It begins:

परमाह्लादरूपाय ब्रह्मविष्ण्वीशमूर्तये ।
नित्याय [च] नमस्तस्मै जगदुत्पत्तिहेतवे ॥
अथातः संप्रवक्ष्यामि शाश्वतं श्रुतमव्ययं ।
धर्मैस्वरूपं संक्षेपाच्छातातपमनामयं ॥
ब्राह्मणस्तु कदाचिद्वै ज्ञात्वा पापं करोति चेत् ।
उपपातकं यदि भवेत्तस्य चांद्रायणं चरेत् ॥
क्षत्रियस्त्रिककृच्छ्रेण वैश्यश्च नवभिर्दिनैः ।
शूद्रो ब्राह्मणभक्त्या वै विशुद्धो नात्र संशयः ॥
पतिव्रता यदि स्त्री स्याद् दोषावेशो ऽपि नास्ति वै ।
तस्याः संपोषणात्पुंसां पुण्यं वृद्धिश्च जायते ॥
ब्राह्मणो ब्राह्मणीं हत्वा तत्कपालधरः स्वयं ।
सर्वतीर्थेषु च स्नायात्क्षयमेष्यन्दोषमात्मनः ॥

The treatise consists of 85 *ślokas*, ending thus:

वैश्यः पंचशतेनैव क्षत्रियस्त्रिशतेन च ।
सत्रिणां दीक्षितानां च यतीनां ब्रह्मचारिणां ॥
सूतकं तावदेतेषां नैशिकस्य स चैवेह ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ।
अभोज्यादपि तद्गात्रं यच्च गोष्ठिगतं (!) पयः ॥
अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशंकितः ॥
इति शातातपकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1364.

723c. Foll. 11; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Karmavipāka, another treatise on expiations, in six adhyāyas, likewisc assigned to the *Śātātapa-smṛiti*.

It begins:

प्रायश्चित्तविहीनानां महापातकिनां नृणां ।
नरकांते भवेज्जन्म चिह्नांकितशरीरिणां ॥

The text of this treatise is included in the Calc. Dh. II., pp. 435–455. The present MS. contains (with considerable variations of reading) the cntire matter contained in the edition—in the same ordcr (except as regards the last ten *ślokas*, where the order is somewhat different)—omitting only fourteen lines; viz.: p. 440, l. 22; p. 441, ll. 4, 5, 19; p. 442, ll. 6, 7; p. 454, ll. 10, 20–22; p. 455, ll. 4, 5, 12, 13. On the other hand, it has a considerable amount of matter, not contained in the edition, scattered over the whole work (but esp. in the 2nd chapter), and amounting altogether to 93 lincs.

A. I. consists of 34 *ślokas*;—II., of 80, ending:

तदर्धार्धप्रमाणेन क्षत्रियादिष्वनुक्रमात् ।
क्षत्रियो मृगयायां च मृगान्विप्रान्न दुष्यति ॥ ७७ ॥
तस्य युद्धांगणगतानायुष्मांस्तान् प्रमापयेत् ।
गजादिकान्सप्तदश सप्तसप्तोत्तरान् क्रमात् ॥ ७८ ॥
गर्भपातकरी नारी स्वदेहे भोगलुब्धये ।
सप्तजन्मावधिं यावन्नरकांते ह्यसंतिका (!) ॥ ७९ ॥
तत्पातकविनाशाय बालं कुर्याद्धिरण्मयं ।
विधाय बालं वस्त्रेण प्रदेयं हेमसंयुतं ॥ ८० ॥

III., of 25 *ślokas*;—IV., of 36, beg.:

कुनखी नरकस्यांते ० चांद्रायणं चरेत् ॥ १ ॥

It ends: ० देयं च शक्तितः ॥ ३५ ॥

मापतिललोहहारी गजधर्मा प्रजायते ।
मापद्वयमयं दद्याद्धेम वै द्विपलान्वितं ॥ ३६ ॥

V., 49 *śl.*, ends: ० तत्तत्पुरुषसंगमात् ॥ ४७ ॥

आसुरी असती दासी चर्मकारी च नर्तकी ।
रजकीभिः समं भोगात् पतंति पितृभिः सह ॥ ४५ ॥
उपोष्यैकादशीं शुद्धां जागरं कारयेन्निशि ।
तस्य पापविशुद्ध्यर्थं दद्यादेकां पयस्विनीं ॥ ४९ ॥

VI., 49 *śl.*, beg.: अश्वशूकरकृमिद्रुमशृंगिशकटाहताः।०

DR.RUPAKNATHJI

It ends:

मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ।
एवं कृते विधाने तु विदध्यादूर्ध्वदैहिकं ॥ ४८ ॥
ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा ।
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसंपदः ॥ ४९ ॥

इति श्रीकर्मविपाके अगतिप्रायश्चित्तं नाम षष्ठो ऽध्यायः ॥ इति शातातपस्मृतिः समाप्ता ॥

For another MS. of this treatise, see Aufrecht, Cat. Bodl., no. 641. According to a MS. described by Dr. Rāj. Mitra, Notices, ii., p. 4 (containing 87 adhyāyas, estimated at 2376 *ślokas*), these six chapters would seem to be only a small fragment (273 *ślokas* in this MS.) of an extensive work entitled *Karmavipāka*, and ascribed to *Śātātapa*.

[H. T. Colebrooke.]

1365.

723i. Foll. 10; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Saṃvarta-smṛiti, in 227 *ślokas* (wrongly numbered 212). [A.]

It begins:

संवर्त्तमेकमासीनमात्मविद्यापरायणं ।
ऋषयस्तु समागम्य पप्रच्छुर्धर्मकांक्षिणः (पृच्छंति ० B) ॥

Calc. Dh. I., pp. 584–603.

It ends:

धर्मशास्त्रमिदं पुण्यं संवर्त्तेन तु भाषितं ।
अधीत्य ब्राह्मणो गच्छेद् ब्रह्मणः सद्म शाश्वतं ॥

इति श्रीसंवर्त्तेन [प्रोक्तं] धर्मशास्त्रं ॥ इदं लिखितं संपूर्णमस्तु ॥

[H. T. Colebrooke.]

1366.

2489b. Foll. 10; size 11 in. by 5¼ in.; good, clear Devanāgarī writing of about 1780 A.D.; ten lines in a page.

Saṃvarta-smṛiti, in 210 *ślokas*. [B.]

Beginning and end as above. This MS. omits *ślokas* 9, 12, 34, 35*a* (of the three lines), 47*a* (do), 57, 61*b*, 62, 63, 64*a*, 74, 77–79, 90, 93, 95*a*, 104*b*, 105*a*, 114*b*, 117*a*, 119*a*, 122*b*, 123*a* (of three), 124, 154, 155, 200*b*, 201*a*, 206*b*, 215*b* of the Calc. Dh.; but it inserts two *ślokas* of its own after 197 and 204 resp., viz.:

पतिता[द्] द्रव्यमादत्ते भुंक्ते वा ब्राह्मणो यदि ।
कृत्वा तस्य समुत्सर्गं अतिकृच्छ्रं समाचरेत् ॥
अयने विषुवे चैव व्यतिपाते दिनक्षये ।
चंद्रसूर्यग्रहे चैव दत्तं भवति चाक्षयं ॥

Colophon: इति श्रीसंवर्त्तप्रोक्तं धर्मशास्त्रं समाप्तं ॥ संवर्त्तस्मृतिः समाप्ता ॥ [Gaikawar.]

1367.

3245h. Foll. 27*b*–29*b*; size 15½ in. by 9½ in.; folio; European paper; Telugu character; thirty-four lines in a page.

Saṃvarta-smṛiti. [C.]

Beginning as above. This text differs considerably from the printed text.

It consists of at least two adhyāyas, only the first of which (*brahmacārikathanam*) is however complete, tho MS. terminating abruptly at the bottom of the last page. The MS. is very far from being correct.

Tho first seven *ślokas* are on the whole the same as in the Calc. Dh. It then proceeds:

पौर्वोत्तराभिमुखं (!) वा ह्यपरोत्तरदिङ्मुखः ।
साक्षसूत्राञ्जलिः (?) संध्याद्ययोरुदितधिष्ण्ययोः ॥

अग्निकार्यं च कुर्वीत ० । ततो ऽधीयीत वेदं च ० ॥

उपसंग्रहणं कुर्याद् गुरोः पूर्वं तु पादयोः ।
ऋचा वा यदि वार्धर्चं पादं वा यदि वाक्षरं ॥

सकाशाद्यस्य गृह्णाति नियतं तस्य गौरवं ।
प्रणवं प्राक् प्रयुंजीत व्याहृतीस्तदनंतरं ॥
सावित्रीं चानुपूर्वेण ततो वृत्तांतमारभेत् ।
न चादावेव कर्तव्यं किंचन प्राकृतं वचः ॥

भाषणे तु गुणः (l. पुनः) कुर्यात् प्राणायामं विचक्षणः ।
हस्तौ तु संयुतौ धार्यौ जानुभ्यामुपरि स्थितौ ॥ ०

[39 *ślokas*.

DR.RUPNATHJI(DR.RUPAK NATH)

A. II. begins (cf. Dh., *śl.* 35 seq.):

अतः परं समावृत्तः सवैनामुद्वहेत् (l. सवर्णामुद्वहेत्) स्त्रियं।
कुले महति संभूतां लक्षणैश्च समन्वितां ॥

ब्राह्मणेन विवाहेन शीलरूपसमन्वितां।
पंचयज्ञविधानं च कुर्यादहरहर्द्विजः ॥ °

34½ *ślokas*, ending thus (Dh., *śl.* 66):

अष्टवर्षा भवेत्कन्या (!) नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति।
मासि — [Mack. Coll.]

1368.

3249b. Foll. 4*b*–5*b*; size 10 in. by 7¾ in.; Telugu character; 19 or 20 lines in a page.

Saptarshisammata-smriti, in 36 *ślokas* [A].

The three MSS. of this treatise were probably derived from the same original, or perhaps the other two were copied from the present MS.

It runs as follows:

प्रभाते मैथुने चैव प्रस्रावे दंतधावने।
स्नाने भोजनकाले च मौनं षट्सु विधीयते ॥ १ ॥

छर्दिते ऽभ्युदिते सूर्ये श्मश्रुकर्मणि मैथुने।
दुःस्वप्ने दुर्जनस्पर्शे स्नानं षट्सु विधीयते ॥ २ ॥

गंगायां भास्करक्षेत्रे मातापित्रोश्च सन्निधौ।
आधाने यज्ञकाले च पापं (? मौनं) षट्सु विधीयते ॥ ३ ॥

स्नाने तु वरुणः शक्तिं भुंजतो ऽग्निः श्रियं हरेत्।
भुंजतो मृत्युरायुष्यं तस्मान्मौनं समाचरेत् ॥ ४ ॥

ब्राह्मणं स्नातमायांतं सह गच्छंति देवताः।
पितरस्तत्र गच्छंति वायुभूता जलार्थिनः ॥ ५ ॥

अवगाहेज्जले नग्नो वस्त्रं यत्तु परोद्धृतं।
क्रुद्धाः स्नानान्निवर्तंते देवता ऋषिभिः सह ॥ ६ ॥

स्नानकाले तु यो मूढो भक्षयेद्दंतधावनं।
पितृयज्ञेषु यच्छ्राद्धं निराशाः पितरो गताः ॥ ७ ॥

देवतर्षिपितॄणां च तर्पयेज्जलमध्यतः।
प्रयतः संस्थितानां च भूमौ दद्याज्जलांजलिं ॥ ८ ॥

हस्तौ तु युग्मं कृत्वा तु पूरयेदुदकांजलिं।
गोःशृंगमात्रमुद्धृत्य जलमध्ये तु निक्षिपेत् ॥ ९ ॥

जलस्थस्य जले शुद्धिर्बहिःस्थस्य बहिः शुचिः।
बहिरंतस्थ आचम्य शुभयत्र शुचिर्भवेत् ॥ १० ॥

वस्त्रोदकमुपेक्षंते ये नरात्मवर्गिणः। [॥ ११ ॥

तस्मात्पूर्वं प्रयत्नेन(° ना MSS.) कौपीनं पीठयेद्बहिः
उपस्पृशेत् यत्स्नानं संध्यायामुदिते ऽपि वा।
प्राजापत्येन तत्तुल्यं महापातकनाशनं ॥ ॥ १२ ॥

उपोदयस्नानफलस्य विद्धि (? सिद्धी)
रूपं च तेजश्च बलं च शौचं।
आयुष्यमारोग्यमलोलुपत्वं
दुःस्वप्नघातश्च भवंति मेधा ॥ १३ ॥

माघे मासे रटंत्यापः किंचिदभ्युदिते रवौ।
ब्रह्मघ्नं वा सुरापं वा कंचंतं तं* पुनीमहे ॥ १४ ॥

ददाति विपुलान्भोगान् भृत्यभार्याधनादिकान्।
प्रातःस्नानं त्यजन् विप्रः सप्ताहं शूद्रतामियात् ॥ १५ ॥

तस्मात्सर्वप्रयत्नेन सूतके ऽपि हि न त्यजेत्।
युक्तकच्छस्तु यः कुर्याद्वर्मकार्यं क्षुचिन्नरः ॥ १६ ॥

वृथा भवति तत्सर्वं गुह्यस्थानस्य दर्शनात्।
देवर्षिपितृमनुष्ययज्ञकार्ये सदा भवेत् ॥ १७ ॥

अपवित्रकरैर्जग्धं दत्तं भुक्तं हुतं च यत्।
देवा हव्यं न गृह्णंति कव्यं च पितरस्तथा ॥ १८ ॥

पवित्रं धारयेन्नित्यं कौशेयं दक्षिणे करे।
भुंजानस्तु विशेषेण दुष्कृतानि व्यपोहति ॥ १९ ॥

गोवालं दर्भसारं च पवित्रं ग्रंथिसंयुतं†।
करे च धारयेन्नित्यं न स पापेन लिप्यते ॥ २० ॥

कुशपूतं पिबेत्तोयं कुशपूतमुपस्पृशेत्।
कुशाग्रमिश्रितं तोयं सोमपानेन तत्समं ॥ २१ ॥

रोमकूपे तिलान् स्थाप्य यः कुर्यात्पितृतर्पणं‡।
ते तिलाः क्रिमिभिस्तुल्यास्तत्तोयं रुधिरं स्मृतं ॥ २२ ॥

गवां वालिपवित्रैस्तु (? वाल °) यस्तु संध्यामुपासयेत्।
स वै द्वादश वर्षाणि कृतसंध्यो भवेद् द्विजः ॥ २३ ॥

कुशहस्तेन यद्दत्तं कुशहस्तेन यद्धुतं।
कुशहस्तेन यज्जप्तमक्षय्यं फलमश्नुते ॥ २४ ॥

---

* ? ब्रह्मघ्नमपि चाण्डालं कं पतन्तं Wilson, Select Works, II., p. 183.

† करसंयुतं B. C. and orig. A.

‡ तिलतर्पणं A; कुर्यात्तिल ° B.

DR.RUPAKNATHJI(DR.RUPAK NATH)

दक्षिणेन कुशान्दद्ध्वा दक्षिणेतरपाणिना ।
आचमेन (l. आचामेन) शुचिः पाणिर्यथा पाणिस्तथा
[कुशः ॥ २५ ॥

पवित्रोदकहस्तस्तु कुर्यादाचमनक्रियां ।
नोच्छिष्टः स भवेद्भौं भुक्तोच्छिष्टं (भुक्तो° B. C. orig.
[A.) तु वर्जयेत् ॥ २६ ॥

ग्रंथिर्यस्य पवित्रस्य न तेनाचमनक्रिया ।
आचामेद्यस्तु मोहात्मा यथा भोक्ता तथा भवेत् ॥ २७ ॥

वामहस्ते कुशान् कृत्वा आचम्य प्रयतो भवेत् ।
तान्कुशांस्तु परित्यज्य पुनराचम्य शुध्यति ॥ २८ ॥

पिंडार्थां ये कुशा दर्भा यैः कुशैः पितृतर्पणं ।
मूत्रोत्सर्गेषु ये दर्भास्तेषां त्यागो विधीयते ॥ २९ ॥

पवित्रग्रंथिमुत्सृज्य प्रक्षिपेत् क्षितिमंडले ।
पात्रे तु निक्षिपेद्यस्तु तदा चांद्रायणं चरेत् ॥ ३० ॥

कुशमूले भवेद् ब्रह्मा कुशमध्ये तु केशवः ।
कुशाग्रे तु स्वयं रुद्र एष धर्मः सनातनः ॥ ३१ ॥

जपेच्चतुर्युगं (जवै° MSS.) चैव अरिष्टैरष्टकं तथा ।
शंखानां च शतं ज्ञेयं प्रवालैस्तु सहस्रकं ॥ ३२ ॥

मुक्ताभिर्दशसाहस्रं मणिभिर्लक्षमुच्यते । [३३ ॥
कुशग्रंथ्या च पद्माद्यैः (l. प्रयुतं) रुद्राद्यैः कोटिरुच्यते ॥
गृहे दशगुणं जप्यं गोष्ठे शतगुणं भवेत् ।
नदीतीरे सहस्रं स्यादनंतं च शिवालये ॥ ३४ ॥

वज्रं यथा सुरेंद्रस्य शूलं हस्ते हरस्य च ।
चक्रायुधं यथा विष्णोरेवं विप्रकरे कुशः ॥ ३५ ॥

नारदेन वसिष्टेन कश्यपनरकौशिकैः* ।
पैंगळेन च गार्गेण दृष्टो धर्म इति स्मृतः ॥ ३६ ॥

इति सप्तऋषिसंमतधर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1369.

3247b. Foll. 4*a*–5*a*; size 10 in. by 7½ in.; 4to.; coarse Indian paper; Telugu character; 21–24 lines in a page.

Saptarshisammata-smṛiti. [B.]

[Mack. Coll.]

* ? B. C. read कश्यपेन च कौशिकैः and also corrected in A, for something like the above; the orig. र of नर being doubtful, and श्य being a correction for some other original conjunction (? ख).

1370.

3248b. Foll. 5*a*–6*b*; size 9½ in. by 7¾ in.; 4to.; same paper and writing; 18–20 lines in a page.

The same treatise. [C.]

[Mack. Coll.]

1371.

723f. Foll. 8; size 12¾ in. by 5¾ in.; good, modern Devanāgarī writing; ten lines in a page.

Hārīta-smṛiti, in seven adhyāyas.

It begins:

ये वर्णाश्रमधर्मस्थास्ते भक्ताः केशवं प्रति ।
इति पूर्वं त्वया प्रोक्तं भूर्भुवःस्वर्द्विजोत्तमाः ॥ १ ॥
वर्णानामाश्रमाणां च धर्मं नो ब्रूहि सत्तम ।
येन संतुष्यते देवो नारसिंहः सनातनः ॥ २ ॥
मार्कंडेयः । अत्राहं कथयिष्यामि पुरावृत्तमनुत्तमं ।
ऋषिभिः सह संवादं हारीतस्य महात्मनः ॥ ३ ॥
हारीतं सर्वधर्मज्ञमासीनमिव पावकं ।
प्रणिपत्याब्रुवन् सर्वे मुनयो धर्मकांक्षिणः ॥ ४ ॥

This is the *Laghu-Hārītasmṛiti* of the Calc. Dh. I., pp. 177–193. The present MS. has exactly the same verses (with, of course, various readings) as the printed text, with the single exception that at the bottom of p. 192 of the Dh. (where a line is required to make up a complete *śloka*), the MS. not improperly repeats the line before last एवं तपश्च विद्या च °

It ends:

अतः कुर्वन् निजं कर्म यथाकालमतंद्रितः ।
सहस्रानीकदेवेशं नारसिंहं च सालयं ॥
उत्पन्नवैराग्यबलेन योगी
ध्यायेत्परं ब्रह्म सदा क्रियावान् ।
सत्यं सुखं रूपमनंतमाद्यं
विहाय देहं पदमेति विष्णोः ॥

इति हारीतधर्मशास्त्रे सप्तमो ऽध्यायः ॥ इति हारीतस्मृतिः समाप्ता ॥ [H. T. Colebrooke.]

DR.RUPNATHJI(DR RUPAK NATH)

1372.

2489h. Foll. 7; size 11 in. by 5¼ in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Hārīta-smṛiti, another treatise, on defilement and purification, ascribed to the same sage; different from both the *Laghu-* and *Vṛiddha-Hārītasmṛiti* of the Calc. Dh.; but corresponding to the third treatise (*Hārīta-Dharmaśāstra*, 112 *ślokas*) described by Burnell, Index Tanj. MSS., p. 128*a*, no. xxxiii*b*.

It consists of 103 *ślokas*, beginning thus:

हारीतेनैवमाख्यातं लोकानां हितकाम्यया ।
प्रायश्चित्तं चिकित्सार्थमेतत्प्राहुर्मनीषिणः ॥ १ ॥
श्वविष्ठां काकविष्ठां वा कंकगृध्रनरस्य च ।
अधोच्छिष्टं तु संस्पृश्य सचैलो जलमाविशेत् ॥ २ ॥
ऊर्ध्वोच्छिष्टं (l. अधो°) तु संस्पृश्य प्रायश्चित्तं विनि-
उपोष्य रजनीमेकां पंचगव्येन शुध्यति ॥ ३ ॥ [र्दिशेत्।
रजस्वला तु या नारी श्वानं काकमथ स्पृशेत् ।
प्रायश्चित्तं कथं तस्या येन सिद्धिमवाप्नुयात् ॥ ४ ॥
अतिक्रांते त्रिरात्रे तु स्नानं कृत्वार्धवाससा ।
त्रिरात्रं क्षपयेदूर्ध्वमेकरात्रमधः क्षिपेत् ॥ ५ ॥
नियमस्था व्रतस्था रजःस्त्री पश्येत्कथंचन ।
त्रिरात्रं तु क्षिपेदूर्ध्वं व्रतशेषं समाचरेत् ॥ ६ ॥
उच्छिष्टस्तु द्विजातिस्तु रजःस्त्री यदि संस्पृशेत् ।
उपवासस्त्वधोच्छिष्ट ऊर्ध्वोच्छिष्टे त्र्यहं क्षिपेत् ॥ ७ ॥

It ends:

अविभज्य सगोत्राणामा सहस्राद्धनादपि ।
यज्ञं क्षेत्रं च पत्रं च कृत्वान्नमुदकं स्त्रियः ॥ १०० ॥
ये जाता ये ऽपि चाजाता ये च गर्भे व्यवस्थिताः ।
वृत्तिं ते ऽपि हि कांक्षंति वृत्तिदानं न विद्यते ॥ १०१ ॥
पितृप्रसादाद्भुंजंते (!) धनानि निर्धनानि च ।
स्थावरं तु न भुंज्येत प्रसादे सति पैतृके ॥ १०२ ॥
स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं ।
असंभूय सुतान्सर्वान् न दानं न च विक्रयः ॥ १०३ ॥

इति हारीतप्रणीतं धर्मशास्त्रं समाप्तम् ॥ समाप्ता हारीतस्मृतिः ॥ [GAIKAWAR.]

B. GENERAL DIGESTS OF LAW.

1373.

850. Foll. 270; size 12½ in. by 4½ in.; modern, careless Devanāgarī writing; generally ten lines in a page. Very incorrect.

Smṛiticandrikā, a digest of Hindū law, by *Devaṇṇa* (*Devaṇa*, *Devāṇḍa*, *Devagaṇa*) *Bhaṭṭa*, son of *Keśavāditya Bhaṭṭa*.

The sections on *ācāra* and *prāyaścitta*.

I. *Ācārakāṇḍa* (foll. 148).

a. Saṃskārādi, beg.:

श्रीमते शकलज्ञानसाम्राज्यपदमापुषे ।
गणेशाय नमो विघ्नं विघ्नते सर्वदा नृणां ॥ १ ॥
जयति गणपतेः परशुः सदोद्यतो विघ्नकंटकच्छेदे ।
प्रणतानामभिलषितार्थसाधनकृतप्रसंगस्य ॥ २ ॥
जगत्संसृतिसंरक्षासंहारैकविनोदिने ।
नमो भगवते तस्मै चिदानंदाय विष्णवे ॥ ३ ॥
मन्मनःसारसे नित्यं वसतात्सा सरस्वती ।
मत्सरःसूक्तिकुसुमविकासो यत्प्रसादतः ॥ ४ ॥
वागीश्वरीं गणेशं च नत्वा विद्वदनुग्रहात् ।
सर्वलोकहितार्थाय क्रियते स्मृतिचंद्रिका ॥ ५ ॥
स्मृतिप्रायेण (l. स्वाभि°) किंचिच्च नास्माभिरिह लिख्यते।
किंतु वाचनिकं सर्वमतो ग्राह्यैव निर्भयैः ॥ ६ ॥

मन्वादिप्रणीतानामेव धर्मशास्त्राणां वेदमूलत्वान्नान्येव धर्मे प्रमाणानीति तदधिगमोपयोगिकतया तच्छास्त्रप्रणेतारः प्रथमं प्रदर्श्यंते । तत्र पैठीनसिः ।

तेषां मन्वंगिरोव्यासगौतमाशनोयमाः ।
वशिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्णावापस्तंबहारीताः शंखः कात्यायनो भृगुः ।
प्रचेता नारदो योगी वौधायनपितामहौ ॥
सुमंतुः काश्यपो बभुः पैठीनो व्याघ्र एव च ।
सत्यव्रतो भरद्वाजो गार्ग्यः कार्णाय(l. जि)निस्तथा ॥
जावालिर्जमदग्निश्च लौगाक्षिर्वैद्यसंभवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥

For other MS. of the *Dharmapravṛitti*, see Rāj. Mitra, Bikāner Cat., p. 383; P. Peterson, Rep. II. (1883-4), p. 118.

[H. T. COLEBROOKE.]

1564.

1542a. Fol. 1; size 10½ in. by 5¾ in.; modern Devanāgarī writing; thirteen lines.

The beginning of the *Saṃskāra* section of the [*Sarva-*]*Dharmaprakāśa*, a digest, composed (at Benares) by *Śaṅkara*, son of *Nārāyaṇa* (author of *Tīsthalīsetu*) and *Pārvatī*.

It runs as follows:

शंभोर्दंडविलोडनैरिव मुहुर्द्रोग्वारयंतं जनं
प्रत्यूहान्महतो निशाकरकरव्रातव्रतं विभ्रता ।
दंतद्योतितदिङ्मुखेन हसितेनानंदयंतं शिवौ
शांतं तच्छिशुमाश्रये ऽहमनयोः खेलंतमारात्पुरः ॥ १ ॥
संपूज्य प्राङ्मुखः श्रीहरिमुदधिसुतां देवतां चैव वाचं
स्राविद्यां सूत्रकारान्गुरुमथ सकलान्धर्मशास्त्रप्रवक्तॄन् ।
श्रीमन्नारायणाख्यं गुरुमथ जननीं पार्वतीं शंकरः श्री-
मीमांसान्यायसारं शिवपुरि तनुते सर्वधर्मप्रकाशं ॥ २ ॥
मेधातिथेश्चापरार्कविज्ञानेश्वरयोस्तथा ।
स्मृत्यर्थसारकर्तुश्च कालादर्शकृतस्तथा ॥ ३ ॥
चंद्रिकाकारहेमाद्रीमाधवश्रीनृसिंहयोः ।
गुरो[श्च] चिरंतनीसेतुकर्तुर्ज्ञात्वा मतानि तु ॥ ४ ॥
तद्विरोधे प्रबलता कस्यचिच्चिह कथ्यते ।
क्वचित्क्वचिद्विरोधो ऽपि तैरनुक्तो निरूप्यते ॥ ५ ॥
तच्चाविमृश्य विबुधैर्न दूष्यं
न्यायाननालोच्य तु जैमिनीयान् ।
हंतान्यथा वो बुधता मुधैव
स्यात्क्षीरनीराविदिहंसतेव (!) ॥ ६ ॥

तत्र तावद्धर्मप्रमाणान्याह याज्ञवल्क्यः । श्रुतिः स्मृतिः सदाचारः ० (I. 7) स्मृतं ॥ अत्र सदाचारो होलाकादितिस यो(?) ऽदृष्टार्थो न तु दृष्टार्थो मातु[ल]कन्यापरिणयो रागेणापि तदनुष्ठानोपपत्ते[:] प्रतिसंकल्पनायोगात् तदिदं शास्त्रदीपिकाप्रकाशे प्रपंचितं । स्वस्य चेति वैकल्पिके विषये यथा गर्भाष्टमे ऽष्टमे वाब्द इति सम्य[क्]संक(ल्पजातः शास्त्राविरुद्धविध्वंसना यज्ञाप्याचार्यप्राचीनेन प्राचो क्षेत्रजादिपुत्राभावे सपिंडा-)

DR.RUPNATHJI (DR.RUPAK NATH)

The last line (from स्वजातः) was apparently supplied by a different hand, and was partly copied from the beginning of the next leaf which belongs to a different work, just to establish a connection therewith.

This fragment is here prefixed to a MS. of the *Viruddhavidhividhvaṃsa*—as if it were the beginning of that work, which had been lost—probably owing to the शास्त्रविरुद्धविध्वंसना occurring therein.

A MS. of the *Saṃskāra-kāṇḍa* of the *Dharmaprakāśa*, beginning with the same stanza as this fragment, is described in Rāj. Mitra's Cat. of Bikāner MSS., p. 382; but the work is there ascribed to *Śiva Sūri;* no author's name being, however, mentioned in the colophon.

As *Kamalākara*, the son of *Śaṅkara's* brother, *Rāmakṛishṇa*, wrote his *Nirṇayasindhu* in 1611-12 A.D., the *Sarva-Dharmaprakāśa* was probably composed in the latter part of the 16th century.

For the samo author's (*Dharma-*) *Dvaitanirṇaya*, see no. 1575. [H. T. COLEBROOKE.]

1565.

2392. Foll. 99; size 11 in. by 4 in.; fairly written, in Devanāgarī, in the earlier part of the last century; eight lines in a page.

Dharmaviveka, a manual of religious feasts and fasts, by *Viśvakarman*, son of *Dāmodara* and *Hīrā*, and grandson of *Bhīma*.

It begins:

नतोन्नतश्चेतसि चिंतितो यो
जनस्य सर्वत्र च शर्मकर्ता ।
चिकीर्षिते कर्मणि विघ्नहर्ता
स सिद्धिमाधातु गणस्य भर्ता ॥ १ ॥

भीमात्मजः सर्वगुणाभिरामो
दामोदरो विज्ञवरो ऽवतीर्णः ।
तस्यात्मजो यः परमो महीयान्
चिंतामणेर्विघ्नमणेः कनीयान् ॥ २ ॥

हीराभिधाना जननी यदीया
गुणा यदीया जगति प्रसिद्धाः ।
सिद्धांतमद्वा सकलस्मृतीनां
पितुः प्रसिद्धादधिजग्मिवान्यः ॥ ३ ॥

श्रुतिस्मृतिज्ञानविशुद्धबुद्धिना
तदर्थधर्माचरणाप्तशुद्धिना ।
ग्रंथः शुभस्तेन च विश्वकर्मणा
वितन्यते धर्मविवेकसंज्ञः ॥ ४ ॥

कांडाष्टकेन यत्रैव सर्वो धर्मो प्रदर्श्यते ।
धर्मविवेकसंज्ञः स धर्मणामाकरः स्मृतः ॥ ५ ॥

विचारात्यवहुत्वाभ्यां तयो ऽल्पज्ञबहुज्ञयोः ।
इति तयोः सुखायेह कुर्वे धर्मस्य निर्णयं ॥ ६ ॥

तत्र निर्णयो नाम परस्परविरुद्धार्थप्रतिपादकानां वाक्यानामर्थविशेषे व्यवस्थापनं । °

° प्रतिपन्निर्णयो वृद्धो fol. 9*b*; इत्येकभक्तातिथिनिर्णय fol. 11*b*; इति नक्तातिथिनिर्णयः fol. 13*b*; इति नक्तैकभक्तादिकर्मसु तिथिद्वैधे निर्णय उक्तः fol. 15*b*; ° तृतीयानिर्णयो ° । अथ चतुर्थी fol. 23*a*; अथ पंचमी fol. 25*a*; अथ षष्ठी fol. 26*b*; अथ सप्तमी fol. 27*b*, etc.; इति चतुर्दशी । अथ पंचदशी fol. 68*a*; अथ फाल्गुनीहोलिका fol. 72*a*; अथ दीपावली fol. 74*a*, etc.

ग्रंथे धर्मविवेकाख्ये निर्मिते विश्वकर्मणा ।
पंचदश्यां समाप्तायां कालकांडं समाप्तिमत् ॥

इत्थं निर्णीतासु तिथिषु व्रतनिर्णयः । fol. 97*a* (misplaced with fol. 98, between foll. 92 and 93); अतो ऽनुक्रमणी चैषा संस्कृतैरेव बध्यते । तत्रादौ पुरुषार्थनिरूपणं । आचारप्रशंसा । कर्मप्रशंसा ° fol. 98*a*.

It ends: कर्मकालावधिनिरूपणं । साग्निकामावास्यानिर्णय इति ॥ इति श्रीविश्वकर्मविरचिते धर्मविवेके (some letters eaten away) [कां]डं समाप्तं ॥

On the first 25 leaves the following authorities are quoted: *Kālamādhavīya*, foll. 12*a*, 25*a*; *Nirṇayāmṛita*, foll. 9*a*, 24*a*; *Brahmasiddhānta*, fol. 5*a*; *Madanaratna*, fol. 25*b*; *Mādhavanibandha*, fol. 9*b*; *Mārkaṇḍeyavyavasthāpakavacanāt*, fol. 17*b*; *Rudrayāmala*, fol. 9*a*; *Siddhāntaśiromaṇi*, fol. 5*b*; *Hemādri-siddhāntasaṃgrahe*, foll. 15*b*, 17*a*.

DR.RUPNATHJI(DR.RUPAK NATH)

For a different work (on *Mīmāṃsā* philosophy) of the same title, see Rāj. Mitra, Notices, V., p. 240.

[H. T. COLEBROOKE.]

1566.

914. Foll. 366; size 13 in. by 4½ in.; clear, modern Devanāgarī writing; eight lines in a page.

Govindārṇava, also called *Smṛitisāgara*, or *Dharmatattvāloka*, a general Digest of religious observances, compiled, under orders of *Govindacandra* (*Govindadeva*) of Kāśī, by his minister *Śesha Nṛisiṃha*, son of *Rāmacandra* (*Rāmabhadra*).

The complete work consists of six sections—viz.: *saṃskāra-*, *āhnika-*, *śrāddha-*, *śuddhi-*, *kāla-*, and *prāyaścitta-vīci*—of which this MS. contains only the first and the last sections.

I. *Saṃskāra-vīci* (foll. 175), begins:

यन्मायावशतः प्रपंचितवपुश्चित्स्वप्रकाशात्मकं
श्रुत्याद्यद्वितिरेकगम्यपरानंदाद्वितीयात्मकम् ।
स्वाध्यासान्मनसा वृतस्य जगतो ऽसत्यस्य सद्रूपकं
भूयै तन्निखिलाद्यसंहृतिचणं स्यान्नारसिंहं महः ॥ १ ॥

मूर्तिं तूर्णविदीर्णदैत्यनखरां प्रेक्ष्य प्रकंपेन्-पुरो
लक्ष्मीं मुद्रितलोचनां सचकितं वीक्ष्याशु संहृत्य तत् ।
रूपं सस्मितमीक्षितामरमुखो मयोत विस्मायितां
तामालिंग्य विनोदयंश्चटुशतैर्युष्मान्नृसिंहो ऽवतु ॥ २ ॥ ० ९ ॥

अस्ति स्वस्तिस्थितिरिह चतुर्वर्गसर्गैकभूमिः
स्वर्गंगायास्तटपरिसरे राजधानी शिवस्य ।
यस्यामीशः शमितविपमाशेषकौ नाशपाशं
शश्वज्जंतोरुपदिशति तन्नारकं ब्रह्मशांतं ॥ १० ॥ ० २४ ॥

तत्रासीच्छुचिहासः शौर्यनिवासः कृतेंद्रपरिहासः ।
परिहृतजगदायासो जनितत्रासः परेषु शिवदासः ॥ २५ ॥

तस्मादाविरभूत् प्रभूतविभवो गांगेयमेयोजितो [० २७ ॥
गंगादास इति प्रसिद्धमहिमा गंगां समाराध्य सः ।
स्वामाख्यामकृतार्थयत्कुलमलंचक्रे न्यचक्रेश्वरान्
अक्लेशादजयज्जयैकनिलयः शक्रे ऽप्यवज्ञाकरः ॥ २८ ॥

तदनु दनुजवैरिपादपद्मप्रणतिपरः समभून्महेशदासः ।
इह हरिहरयोरभेदभावं भजनमुपादिशदेष योजनेषु ॥ २९ ॥

अजनि नयनसिंहः पार्थिवो ऽस्मादकस्मात् [० ३१ ॥
समरभुवि यदीयं सिंहनादं निशम्य ।
परनरपतिमाद्यं तुंगमातंगसंघाः
सपदि विपदि मग्नास्ते दिगंताभजंते ॥ ३२ ॥ ० ३३ ॥

तद्वंशे भूवतंसे ऽजनि जननयनानंदचंद्रो नरेंद्रो
माहेंद्रं लोकमेषा हसति वसुमती यं पतिं प्राप्य पुण्यैः ।
श्रीमानुत्सन्नशत्रुः परिचरितसदामाधवो माधवो यं
संप्राप्ताः साधवो ऽमी गुणमणिविपणीमाधवो धर्मधुर्यैः
[॥ ३३ ॥ ०

Thus we have first a succession of four princes: *Śivadāsa*, his son *Gaṅgādāsa*, his son(?) *Maheśadāsa*, and his son *Nayanasiṃha;* and then a descendant of these, *Mādhavadāsa*, whose eldest son, *Govindacandra*, was the patron of the present author; his younger sons being *Kāśirāja* (*Kāśidāsa*) and *Narottama*, all three of whom come in for a plentiful share of praise.

The introduction, consisting of 85 verses, ends thus:

तत्राभूत् सकलकलाकलापकौतूहलावासः ।
श्रीरामभद्रविबुधः परममहापुरुषलक्षणोपेतः ॥ ७६ ॥

तर्के ककैशतां वहन्नतितरां भाट्टे तथात्युद्भटो
वेदांतेषु पटुस्तथातिनिपुणः सांख्ये ऽपि विख्यातधीः ।
अष्टव्याकरणी प्रबंधचतुरः साहित्यरत्नाकरः
क्षोणीमंडलमंडनैकतिलकः श्रीरामचंद्रो गुरुः ॥ ७७ ॥

तन्नयः प्रथितनयः कृतविनयः सुष्ठु दुष्कृतापनयः ।
अभवद्गुणैकनिलयः श्रीनरसिंहाभिधो विबुधः ॥ ७८ ॥

आचारे चतुराननः श्रुतिवनीसंचारपंचाननः
शश्वद्यश्च षडाननः खलमिलन्मानाद्रिनिर्भेदने ।
नानाशास्त्रवचोविचारणचमत्कारे सहस्राननः [० ८० ॥
केमानेष मनोविनोदमतनोन्नासौ नृसिंहो बुधः ॥ ७९ ॥

तं शेषामलवंशभूषणमणिं गोविंदचंद्रः स्वयं
विद्वन्मंडलपुंडरीकतरणिर्भूमंडलीमंडनं ।
धर्मोद्धारविधौ समाहितमनाः प्रीत्यानुनीयाधुना
गोविंदार्णवनामकं व्यरचयद्ग्रंथप्रबंधं शुभं ॥ ८१ ॥

अशेषविदुषामेष संतोषाय विशेषतः ।
करोति तदनुज्ञातो नृसिंहः सन्निबंधनं ॥ ८२ ॥ ० ८३ ॥

DR. RUPAK NATH (DR. RUPAKTHJI)

श्रुतिस्मृतिपुराणानि निबंधान्विविधानपि ।
दृष्ट्वा सम्यक्समासेन सारोद्धाराय मे श्रमः ॥ ६४ ॥
तत्रादौ सुखबोधार्थं ब्रूमः प्रकरणक्रमं ।
संस्कार आह्निकं श्राद्धं शुद्धिः कालश्च निष्कृतिः ।
क्रमात् षड् वीचयो ज्ञेयाः सर्वेशास्त्रार्थदीपिकाः ॥ ६५ ॥
निबंधमतभेदेन धर्मतत्त्वं यदस्फुटं ।
विविच्यते सहृदयप्रीत्यै तत् न्यायलेशतः ॥

इह यद्यपि धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः श्रूयंते सेव्यतया तथापीतरपुरुषार्थत्रयस्य धर्मार्थीनसिद्धिकत्वेनोपजीव्यत्वादावश्यकत्वात्स एव प्रथमतः सेवनीयः । °

इति ° नरसिंहसूरिविरचिते स्मृतिसागरे उपोद्घातप्रकरणं fol. 24*b*.

The *Saṃskāra* ends: इति श्रीमदखंडभूमंडलाधीश्वरसमस्तसाम्राज्यधुरंधरश्रीमन्नोविंददेवादिष्टशेषनरसिंहसूरिविरचिते गोविंदार्णवे धर्मतत्त्वालोके संस्कारवीचिः प्रथमः समाप्तः ॥

Then follow two leaves containing a list of contents in a different handwriting.

II. *Prāyaścittavīci* (foll. 185), begins:

आनंदायोद्दिधीर्षोर्गिरिमरपत्तित्रस्तगोमंडलस्य
श्रीभर्तुः श्रीनिधानं करनिकरचिरध्वस्तगाढांधकारः ।
उन्मीलन्नीलवक्षस्थलकलितरुचिस्वेदविंदुप्रपंचे
प्रोद्यच्चारुतारापिपसुभगवपुस्त्वायतां कौस्तुभेनः ॥ १ ॥
नृसिंहचरणांभोजमकरंदमधुव्रतः ।
निरस्तविस्तरं वक्ष्ये प्रायश्चित्तविनिर्णयं ॥ २ ॥
प्राचीनेषु निबंधेषु प्रमाणैर्यद्व्यवस्थितं ।
तत्र चर्चां समुत्सृज्य सारः संगृह्यते त्वयं ॥ ३ ॥
तत्र प्रायश्चित्तपदार्थमाहांगिराः ॥ °

It ends fol. 185*b*: इति श्रीमन्महाराजाधिराजसाम्राज्यधुरंधरश्रीगोविंददेवादिष्टशेषनृसिंहसूरिविरचितः प्रायश्चित्तनिर्णयः समाप्तः ॥

This part also is followed by a list of contents on four leaves.

Of the authorities quoted in the first section may be mentioned:—*Aparāditya*, fol. 59*b*; *Aparārka*, fol. 143*b*; *Kalpataru*, fol. 116*a*; *Kārikānibandha*, fol. 72*a*; *Gṛihyakaumudī*, fol. 77*b*; *Govindarāja*, 13*a*; *Jyotiḥprakāśa*, foll. 73*b*, 125*a*; *Jyotiḥsāgara*, fol. 76*b*; *Jyotiḥsāra*, fol. 79*a*; *Jyotirarṇava*, fol. 118*b*; *Jyotir-Nṛisiṃha*, fol. 119*a*; *Dīpikā*, fol. 79*a*; *Prayogasāra*, fol. 106*b*; *Bhaṭṭa(pādāḥ)*, foll. 15*a*, 16*a*, etc.; *Maheśvara*, foll. 116*a*, 121*b*; *Māṇḍavya*, fol. 73*a*; *Mādhavācārya*, fol. 35*a*; *Mitākṣharā*, foll. 56*a*, 60*b*; *Medhātithi*, fol. 72*b*; *Ratnamālā*, foll. 77*a*, 78*a*; *Rājamārtaṇḍa*, foll. 28*a*, 79*a*; *Lalla*, fol. 79*a*; (*Varāha-*) *Saṃhitādīpaka*, fol. 74*b*; *Viśveśvara Bhaṭṭa*, fol. 28*b*, etc.; *Vṛittaśatasaṃgraha*, fol. 117*a*; *Vyavahāroccaya*, foll. 77*a*, 78*a*, 81*b*; *Saṃgraha*, fol. 58*b* (*-kāra*), fol. 68*a*; *Smṛiticandrikā*, fol. 75*a*; *Smṛitibhāskara*, fol. 82*b*; *Smṛitiratnāvalī*, fol. 75*b*; *Smṛityarthasāra*, fol. 81*a*; *Haradattamiśra*, fol. 137*b*; *Hemādri*, fol. 70*b*. [H. T. Colebrooke.]

1567.

940. Foll. 125; size 16¼ in. by 5 in.; fairly good, modern Bengalī handwriting; eight lines in a page.

Smṛitisaṃgraha (?), or *Vyavasthā-vivecana* (or *-saṃkshepa*), a summary of religious ceremonies enjoined in the *Smṛitis*, by *Rāmabhadra Nyāyālaṃkāra Bhaṭṭācārya*, of Navadvīpa (Nuddea).

It begins: अथ अनध्यायविवेचनं ।
पञ्चदश्यां चतुर्दश्यां अष्टम्यां राहुसूतके ।
धातुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्यते ॥

धातुसंधिषु चैत्रश्रावणमार्गशीर्षाणां शुक्लप्रतिपत्सु । इदं तु त्रिधातुसंवत्सराभिप्रायेण एतदतिरिक्तप्रतिपत्सु काम्यत्वमिति । °

अथ अकालवृष्टिव्यवस्था fol. 4*a*; अथ नानासंग्रहकारसंमतं नानाविधं शूद्रकर्तृकतर्पणवाक्यं लिख्यते fol. 4*b*.

Fol. 5*a*: प्रायशः संकल्पानामेव कर्मणामारम्भकत्वादादौ स एव निरूप्यते । कायवाङ्मनोभी रचितं कर्मफलाय समर्थमिति श्रुत्या प्रधानानामङ्गत्वमुक्तं । तत्र केन रूपेण तस्याङ्गत्वमित्याह मनसा संकल्पयति वाचा अभिलपति कर्मणा चोपपादयतीति । संकल्पयति अमुककामेन मयेदं कर्तव्यमिति निश्चिनोति । वाचा वाक्येनाभिलपति मनसा निश्चितमर्थं तद्बोधकपदैरभिधत्ते । कर्मणा कायव्यापारेण उपपादयति । यथाविधि समापयतीत्यर्थः । संकल्पयतीत्यादि विध्यर्थे लट् । °

DR.RUPNATHJI (DRRUPAK NATH)

अथ मलमासः fol. 8*b*, etc.; अथ जन्मतिथिव्यवस्था fol. 14*b*; अथ प्रतिपत् fol. 16*a*; अथ द्वितीया fol. 16*b*, etc.

इति ० व्यवस्थाविवेचने तिथिविवेचनं ॥ अथ श्राद्धं ॥ पात्रालम्भनपूर्वको हविस्त्यागः श्राद्धमिति मैथिलाः। ० fol. 50*b*.

इति ० श्राद्धव्यवस्था समाप्ता ॥ अथ प्रायश्चित्तव्यवस्था ॥ तत्रादौ प्रायश्चित्तलक्षणं। fol. 78*b*.

इति ० प्रायश्चित्तविवेचनं समाप्तं ॥ अथ शुद्धिव्यवस्यासंक्षेपः। तत्रादौ शुद्धिपदार्थो निरूप्यते। fol. 97*b*.

इति शुद्धिव्यवस्था ॥ अथोद्वाहनिर्णयः ॥ तत्र सापिण्ड्यं निरूप्यते। सापिण्ड्यं साम्नपौरुषमिति वचनात् fol. 122*b*.

It ends: शूद्राणां समानगोत्रे समानप्रवरे ऽपि विवाहः। अन्यत्सर्वं ब्राह्मणादिवदिति शुल्कं दत्त्वा वरे मृते कन्या देवाय प्रदातव्या। एतच्च कन्यानुमतौ वाग्दत्ताया अपि कन्याकुमारीवद्विवाहः ॥

इति महामहोपाध्यायनवद्वीपनिवासिश्रीरामभद्रन्यायालङ्कारभट्टाचार्यविरचिता उद्वाहव्यवस्था समाप्ता ॥ The same colophon, mutatis mutandis, occurs at the end of the first three chapters.

Foll. 1*a*, 50*a*, 79*a*, 98*a* contain tables of contents for the respective portions they precede.

The title given to the work on the last page by Colebrooke's Paṇḍit is रामभद्रन्यायालंकारकृतः स्मृतिसंग्रहः ॥ [H. T. Colebrooke.]

1568.

743. Foll. 98; size 12¾ in. by 6 in.; fairly good, modern Bengalī handwriting; ten lines in a page.

The same work. The sections on *tithi* (incomplete at the beginning ?) and *śuddhi*.

It begins: प्रायशः संकल्पानामेव कर्मणामारम्भकत्वादादौ स एव निरूप्यते। ० see fol. 5*a* in preceding MS.

The *tithivyavasthā* ends fol. 53*a*. Between this and the beginning of the *śuddhivyavasthāsaṃkshepa*, fol. 55*b*, this MS. (as well as the next one) contains brief sections on *bhūmidāna*, fol. 53*a*, and *suvarṇadāna*, fol. 54*b*. Neither this MS., nor the next one, makes any mention of the author to whom the work is ascribed in the preceding MS.

It ends with eight *ślokas* from the *Sanatkumārasaṃhitā* (on *vṛihad-āmānnadāna*, of which MS. 640 has only the first 6½ at the end of the *śuddhi*) ending: पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदं ॥ समाप्तोयं ग्रन्थः ॥

Colebrooke's Paṇḍit has given it the title (fol. 1*a*): छाँचकाटा (!) स्मृतिसंग्रहपूर्वखंडं। [H. T. Colebrooke.]

1569.

638a. Foll. 44; size 16 in. by 5 in.; fair, modern Bengalī handwriting; eight lines in a page.

The *Tithivyavasthā* of the same work.

It begins, as the preceding MS.: प्रायशः संकल्पानामेव ०

It concludes with the section on *suvarṇadāna* mentioned above, ending: तथा च ब्राह्मे।

सर्वदानानि नियमा आयासाश्च तपांसि च।
यज्ञो दानं तथा जप्यं श्राद्धं च सुरपूजनं।
गङ्गायां तु कृतं सर्वं कोटिकोटिगुणं भवेदिति ॥

after which the colophon, by a different hand: इति श्रीराघ[व]भट्टकृतव्यवस्यार्णवः समाप्तः ॥ and on the back of the last leaf the MS. has been named accordingly. [H. T. Colebrooke.]

1570.

263. Foll. 75; size 11½ in. by 6 in.; fairly written, in the Bengalī character, by two different hands; European paper; 9 or 10 lines in a page.

Dharmadīpikā, or *Smṛitipradīpikā*, a treatise on controverted points of sacred law, by *Candraśekhara Vācaspati*.

Incomplete. The present portion of the work deals mainly with points of the *Vedic* ceremonial.

DR.RUPNATHJI(DR.RUPAK NATH)

It begins :

नत्वा शिवपदद्वन्द्वं नाततत्त्वातसेवितं ।
तत्प्रभावद्धितास्माभिः क्रियते धर्मदीपिका ॥
विद्याभूषणविख्यातः षड्दर्शनमते सुधीः ।
तत्सुतस्तादृशो धीमांस्ततो ऽधीती च तत्सुतः ॥
श्रीचन्द्रशेखरो नाम्ना ख्यातो वाचस्पतिः स्मृतौ ।
स्मृतीनां च प्रकाशार्थं तनोतीमां प्रदीपिकां ॥

तत्र मीमांसातर्कं एव वेदतन्मूलशास्त्रार्थप्रकाशकः । तथा च भट्टः । मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः । सर्वेषां वेदानां समुद्भवः प्रकाशो यस्मादिति विग्रहः । सा च मीमांसा द्विविधा कर्मब्रह्मनिरूपकभेदेन जैमिनिबादरायणिप्रणीता कर्मनिरूपिकैव धर्मप्रतिपादिका यतो धर्मजिज्ञासानन्तरमारभ्यमाणं मीमांसाशास्त्रं धर्मप्रतिपादनप्रयोजनकं । अत एवोक्तं भट्टैः । धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनं । ०

अथात्र कर्मभेदप्रतिपादसूत्रं fol. 9*a*; अथ विधिभेदाः fol. 10*b*; अथाधिकरणनिरुक्तिः fol. 17*a*; अथ श्रुतिलिङ्गादिनिरूपणं fol. 17*b*; अथ ग्रहाधिकरणं fol. 22*b*; अथ दर्वीहोमाधिकरणं fol. 25*b*; अथ कपालाधिकरणं fol. 26*b*; अथ सर्वदृष्टाधिकरणं fol. 27*b*, etc.

It ends: अथ सोमीयवेदिविधिन्यायः ॥

For a fragment of this work, see Rāj. Mitra, Notices, II., p. 77. [H. T. Colebrooke.]

1571.

251a. Foll. 31; size 12½ in. by 4½ in.; good, modern Bengalī handwriting; ten lines in a page.

Vyavasthāsārasaṃgraha, a compendium of religious (*smārta*) rites, by *Rāmagovinda Cakravartin* (son of *Mukunda*). Incomplete.

It begins :

पादपद्मयुगमाद्यं शाम्भवं संस्मरन् लिखति पुस्तिकामिमां।
श्रीमुकुन्दचतुरेतदात्मनः कल्मषं भवतु भूरिहारिणः ॥
गुरोः पादयुगं नत्वा रामगोविन्दशर्मणा ।
क्रियते बालबोधाय व्यवस्थासारसंग्रहः ॥

तत्रादौ तिथिव्यवस्था निरूप्यते । तिथिस्तु चन्द्रक्रियोपलक्षितः कालविशेषः । तदेव चान्द्रमसं दिनं । तत्त्रिंशता चान्द्रो मासः । स च द्विविधः । मुख्यो गौणश्च । तत्र मौनस्यरवौ यत् शुक्लप्रतिपदारम्भस्तदादिदर्शान्तो मुख्यचान्द्रश्चैत्रो मासः । ०

Fol. 22*a*: इति रामगोविन्दशर्मकृते व्यवस्थासारसंग्रहे तिथिव्यवस्था संपूर्णा इति ॥

श्रीकृष्णचरणाम्भोजं नत्वा संक्रमणे रवेः ।
वक्ति श्रीरामगोविन्दो व्यवस्थां धीरसंमतां ॥

तत्रादौ संक्रान्तीनां सङ्ख्योच्यते (l. संग्रह उ ०) । ०

Fol. 25*b*: इति व्यवस्थासारसंग्रहे संक्रान्तिव्यवस्था समाप्ता ॥ अथाहुतं ।

इत्याहुतशान्तिः fol. 26*b*.

Fol. 28*a*: इति ० संबन्धव्यवस्था समाप्ता ॥

नत्वा कृष्णपदद्वन्द्वं संसारजलधिप्लवं ।
वक्ति श्रीरामगोविन्दो व्यवस्थामौर्ध्वदेहिकीं ॥

अथान्त्येष्ट्यादिमोऽशौचाधिकारिणः ०

For a complete MS. (omitting the first introductory *śloka*) and an analysis of the contents of the work, see Rāj. Mitra, Notices, IV., p. 290. [H. T. Colebrooke.]

1572.

41b. Foll. 100; 4to; size 10½ in. by 8 in.; written in the Bengalī character; European paper (watermark 1805); 11–18 lines in a page.

Dvaitanirṇaya, a review of doubtful points of sacred law, composed by *Vācaspati Miśra*, for *Jayā*, wife of King *Bhairava* and mother of *Purushottama Deva*.

It begins : आभीरदारकमुदञ्चित ० cf. Aufrecht, Cat. Bodl., no. 648; Rāj. Mitra, Notices, I., p. 149; V., 296.

It ends: इति द्वैतनिर्णये सिद्धान्तपरिच्छेदः ॥ शाके १७२५ ॥

Foll. 99*b* and 100*a* contain a list of contents (*pattrapañjī*).

Regarding the author's probable age see above, no. 1398. [H. T. Colebrooke.]

1573.

253. Foll. 56; size 11½ in. by 5 in.; indifferent Bengalī handwriting of about 1750 A.D.; 8–15 lines in a page.

DR.RUPNATHJI(DR.RUPAK NATH)

Dvaitanirṇayapradīpa, or *Kādambarī*, a commentary on the preceding treatise, by *Gokulanātha*.

It begins:

देहस्यामेध निहतो द्वैतनिर्णयवेश्मनः ।
प्रदीपस्तिमिरं हन्तु जीर्णोद्धाराजिरोदरे ॥

नामद्वैतेति । अत्र देवराजादिशरीरवृत्तिरेकदा ऽनेका वृत्तिर्या देवराजत्वादिजातिस्तदवच्छिन्ने शरीरे तादृशशरीरविशिष्टात्मनि वा देवराजादिपदानामस्ति वृत्तिः सा च गृह्यविहितप्रकारोपपत्रपित्रादिसंज्ञिताभिव्यंग्यो भगवत्सङ्केत एव सप्रपदार्थातिरिक्तः स्वाभाविको वा शब्दार्थसंबन्धः ०

इति कादम्बरीप्रदीपनामद्वैतनिर्णयविवरणे नामद्वैतनिर्णयः परिपूर्णः fol. 8*a* (8*b* left blank); ० दानद्वैतनिर्णयः fol. 18*b*; ० महादानद्वैतनिर्णयः fol. 31*b*; ० जलाशयद्वैतनिर्णयः fol. 45*b*; ० सदाचारद्वैतनिर्णयविवरणं ॥ उपनयनकालनिर्णये ० fol. 52*b*, 53*a*.

Col.: इति महामहोपाध्यायश्रीगोकुलनाथप्रणीतः संपूर्णो द्वैतनिर्णयप्रदीपः ॥ श्रीतोषैदत्तस्याक्षरमिदम् ॥

The MS. seems to contain only a portion of the entire work. Moreover, the different chapters are merely bound together, each being written by a different hand (or sometimes two hands) from the preceding one, and ending at the bottom of the page.

Rāj. Mitra, Notices, V., pp. 166, 281, gives a *Dvaitanirṇaya-jīrṇoddhāra* (or *prakāśa*) by *Madhusūdana Ṭhakkura*, described as a commentary on *Vācaspati Miśra's* work on the dualistic theory of the Supreme and the human souls. [H. T. Colebrooke.]

1574.

299. Foll. 91; size 14 in. by 5½ in.; indifferent Bengalī handwriting of 1807 A.D. (by ono *Nārāyaṇa Datta Śarman*); worm-eaten, but mostly in tho margin; 12–16 lines in a page.

Dvaitapariśishṭa, a treatise, in two chapters, on points of Hindu law, not treated by former writers; by *Keśava Miśra*.

I. begins: स्वामिन्वासो ममैतत्र ०; II. (fol. 57), तातस्ते मकरालयः ० see Aufrecht, no. 650.

The leaves of the second chapter are paged separately 6–40.

A much larger work of the same title, and by the same author (of which this is perhaps a fraction) is described by Rāj. Mitra, Notices, V., p. 186. [H. T. Colebrooke.]

1575.

1395*b*. Foll. 48; size 12½ in. by 4½ in.; legibly written, in Devanāgarī, at the beginning of the present century; ten lines in a page.

Dvaitanirṇaya-siddhāntasaṃgraha, a treatise on controverted points in the performance of certain rites, by *Bhaṭṭa Bhānu*, son of the *Mīmāṃsaka Bhaṭṭa Nīlakaṇṭha*; the work being an abridgment of the *Dharma-Dvaitanirṇaya*, by *Bhānu's* grandfather, *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nārāyaṇa*.

It begins:

लक्ष्मीं नारायणं नत्वा सीतया सहितं रघुं ।
गंगायुतं नीलकंठं गुरोः पादांबुजं तथा ॥ १ ॥

पितामहकृतद्वैतनिर्णयार्थस्य संग्रहः ।
नीलकंठात्मजेनेह क्रियते भानुनाधुना ॥ २ ॥

तत्रादौ नवरात्रसिद्धांतः । नवरात्रव्रते च देवीपूजनं प्रधानं । ०

इति ० नवरात्रनिर्णयः fol. 4*a*; ० नवरात्रपारणा fol. 5*a*; इति चतुर्थी fol. 5*b*; ० पञ्चमी fol. 6*a*; ० जन्माष्टमी fol. 8*b*; ० एकादशीवेधे ऽरुणोदयनिर्माणनिर्णयः fol. 9*b*; ० चतुर्दशी fol. 11*a*; ० शिवरात्रिः fol. 11*b*; ० सावित्रीव्रतं fol. 12*a*; ० उपाकर्म fol. 15*a*; ० होलिका fol. 16*a*; ० संक्रांतिनिर्णयः fol. 17*a*; ० ग्रहणोपवासः fol. 17*b*; ० अनूढकन्यामृतावाशौचं fol. 18*a*; ० संनिपाताशौचं fol. 20*b*; ० दत्तकाशौचं fol. 21*a*; ० स्त्रीजनने कर्मानधिकारावधिनिर्णयः fol. 23*a*; ० क्रियाधिकार ० fol. 24*b*; श्राद्धाधिकारनिर्णयः fol. 27*a*; ० सपिंडीकरणाधिकार ० fol. 30*b*; ० पिंडपितृयज्ञप्राशन ० fol. 32*b*; ०; ० आधानाद्यधिकार ० fol. 37*a*; ० अपत्नीकाधान ० fol. 37*b*;

DR.RUPNATHJI(DR.RUPAK NATH)

° अपुत्रकविधिः fol. 39*a*; ° तीर्थयात्रा ° fol. 40*b*; ° ब्राह्मणस्य मांसनिषेध ° fol. 43*a*; ° दत्ताप्रदान ° fol. 43*b*; ° स्तेयान्यमहापातकप्रायश्चित्तनिर्णयः fol. 46*a*.

Colophon: इति श्रीमन्मीमांसकभट्टनीलकंठात्मजभट्टभानुकृते द्वैतनिर्णयसिद्धांतसंग्रहे कोटिलक्षायुतहोमनिर्णयः समाप्तः ॥

The author's brother, *Bhaṭṭa Śaṅkara*, wrote his *Kuṇḍoddyotadarśana* in 1671 A.D.

For another MS. of the work see Rāj. Mitra, Notices, II., p. 271.

[H. T. Colebrooke.]

1576.

1258a. Foll. 106; size 9 in. by 3½ in.; indifferent Devanāgarī character; 9 or 10 lines in a page.

The same work, incomplete in the middle; with a fragment of *Bhaṭṭa Śaṅkara's* work, of which the former is an abridgment.

The MS. consists of two portions, paged separately, the first of which consists of 33, the second of 73 leaves.

I. Foll. 1–33 *Bhānu's* treatise from the beginning to the middle of the *anūḍhakanyāmṛitā-vāśauca*, where the MS. breaks off abruptly.

II. From fol. 17*a* (near the bottom) of the second portion to the end, numbered 17–73, contain the concluding portion of *Bhānu's* work from shortly after the beginning of the *kriyādhikāranirṇaya*.

Dated: संवत्सरे १७१३ पौषकृष्णचतुर्थ्यां लिखितं लेखापितं भ्रिदेमद्योरमिश्रात्मजलालचंद्रशर्मणा सारस्वतेन वाराणस्यां श्रीपशुपतिप्रसादादिति ॥

III. Foll. 1–17*a* of the second portion (the first sixteen leaves of which are not numbered) contain a fragment of the *Dharma-Dvaitanirṇaya*, by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nārāyaṇa*.

It begins: संपूर्णेत्युक्तं । °

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्भट्टनारायणसुतभट्टशंकरकृते धर्मद्वैतनिर्णये पंचमीविषयसंशयोद्देदपरिच्छेदः ॥ अथ कृष्णजन्माष्टमीव्रतं निर्णीयते ॥ fol. 2*b*; ° निर्णये श्रीमहाक्षिणात्यसकलशिष्टधुरंधरसंप्रदायोद्दीपकः कृष्णजन्माष्टमीसंशयोद्देदपरिच्छेदः fol. 10*b*; ° निर्णये कृष्णजन्माष्टमीपारणसंशयोद्देदपरिच्छेदः ॥ एकादीवेध ° fol. 15*b*. [H. T. Colebrooke.]

1577.

1542. Foll. 143 (the original pagination of which, 142–295, has been obliterated and changed for a fresh one, 2–154); size 10½ in. by 5¾ in., very well written, in Devanāgarī; fourteen lines in a page.

Viruddhavidhividhvaṃsa, a general review of disputed points of (sacred) law, composed, at Aṇahillapāṭaka, by *Lakshmīdhara*, son of *Malladeva* and *Śrī Devī*, grandson of *Vāmana* (brother of *Skanda*), and great-grandson of *Soḍha* (who, like his sons, was minister to King *Someśvara* of Śākambharī).

Incomplete at the beginning. The work consists of seven chapters (*adhikaraṇa*), the first four of which are wanting; a line and a half scored out at the boginning (of fol. 2) of the MS. having contained the colophon of the fourth chapter, and the first few words of the fifth.

Ch. five began orig. यत्राप्याचार्यप्राचौ - - (some 16 aksharas) भ्रात्रादयः श्राद्धादिकारिण इति । तत्रापि पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यावित्ति गोतमवचनमुदाहृतं । °

Fol. 17*a*: इति स्मार्त्तमहत्तश्रीमल्लक्ष्मीधरविरचिते विरुद्धविधिविध्वंसे वाक्यमीमांसायां क्षेत्रजादिपुत्राणामेवाभावे भ्रात्रादिश्राद्धादिनिराकरणं नामाधिकरणं[पंचम obliterated]मिति ॥ तदेवं विश्वरूपप्रोक्तं °

Fol. 70*a*: इति ° वाक्यमीमांसायां सिद्धांताख्यमधिकरणं [षष्ठं] समाप्तं ॥ अथ श्राद्धस्य प्रकारात् लक्षणानि प्रोच्यंते । तत्र विश्वामित्रः । °

DR.RUPNATHJI(DR.RUPAK NATH)

It ends: व्रजत्यश्वमेधफलं पुरुष इति बोधायनसूत्रं ॥ इति स्मार्त्त० श्राद्धप्रकाराख्यमधिकरणं सप्तमं ॥

ब्राह्मणा ब्राह्मणा जाता जाता ये गुणसागराः ।
नागरा नागराजार्हहारो यानर्हयद्वरः (! or जर्हेहारे-योनर्ह०) ॥ १ ॥

तदन्वये ऽष्टगोत्राणामष्टगोत्रोन्नतिश्रितां ।
मध्यान्नोत्रेशसंशुद्धे गोत्रे ऽजायत काश्यपे ॥ २ ॥

श्रीमदानंदनगरस्थाने स्थानेश्वराभिधः ।
पंडितो यः स्वविद्याभिश्चतुर्दिग्विदुषो ऽजयत् ॥ ३ ॥

श्रीमदानंदनगरे नागरेभ्यो गृहांश्च यः ।
सप्तविंशतिविप्रेभ्यः प्रददौ सपरिच्छदान् ॥ ४ ॥

षण्मुखः षट्सु तर्केषु चतुर्वेदी चतुर्मुखः ।
मीमांसामांसलप्रज्ञो यो ऽभूत्तस्यान्वये ऽभवत् ॥ ५ ॥

स्कंद स्कंदपितुः प्रज्ञानंदकंदस्त्वमंदधीः ।
शाकंभरीशितुः सोमेश्वरदेवस्य भूभृतः ॥ ६ ॥

सांधिविग्रहिकामात्यो ऽरात्यौघकरिकेसरी ।
सोढस्तस्य सुतो ऽसोढः शत्रुभिस्तत्पदे ऽभवत् ॥ ७ ॥

तस्य पुत्रावभूतां द्वौ भूतांभूतकीर्तितौ ।
स्कंदवामननाम्ना तावाम्नातावनीमतौ ॥ ८ ॥

सर्वामात्यपदं ताभ्यां पृथ्वीराजो ऽददन्मुदा ।
सेनाधिपत्यं स्कंदाय प्रदाय च सुखी स्थितः ॥ ९ ॥

सेनापतित्वं स्कंदाय प्रदाय धृतशक्तये ।
महादेवसुतायातिदृग्रूपो भूपवत् (!) ॥ १० ॥

संधिविग्रहिकाद्यं तु पदं संप्राप्य वामनः ।
स्कंदो राजे ऽर्पितानंदो ऽवधीन्निर्मर्षकुरुष्ककान् [(1. तुरु०) ॥ ११ ॥

सदा स दानानि ददौ द्विजभ्यो दंडनायकः ।
या काप्यपरिणीतायात् तस्य[र] वैवाहिकं त्वदात् ॥ १२ ॥

स्कंद स्कंदेति वर्णेषु वर्ण्यमाने ऽत्र नागरः ।
ब्राह्मणं कोपि कोपेन कंपिताधरमुक्तवान् ॥ १३ ॥

स्कंद स्कंदेति वदथ किं विप्राः प्रतिवासरं ।
मदीयहृदये नायमप्यद्वैस्कंदखंडिका ॥ १४ ॥

इत्येते नागराः प्रोचुर्यूयं यात्वा तदंतिके ।
वद द्विजैवं वचनं यद्यस्ति तव योग्यता ॥ १५ ॥

कोपात्स पादलक्षे द्वादशे शाकंभरीं पुरीं ।
प्राप्य विप्रो राजकुलाद्ययांतं (!) दंडनायकं ॥ १६ ॥० २२ ॥

गते ऽन्यसंगरे स्कंदे निद्राव्यसनसन्नधीः ।
व्यापादितस्तुरुष्कैः स राजा जीवन्मृतो युधि ॥ २३ ॥

हरिराजमथो राज्ये शाकंभर्यां निवेश्य सः ।
स्कंदस्तत्र कियत्कालं स्थित्वा तुर्याश्रमं श्रितः ॥ २४ ॥

द्रम्माणां लक्षविंशत्या विंशत्यश्व(1.०त्या च) शतैः समं ।
वामनः सकुटुंबो (ऽ)णहिल्लपाटकमाट तु ॥ २५ ॥

मल्लदेवो ऽभवत्तस्य पुत्रः पुत्रवतां वरः ।
सुभाषितावलीकर्ता भर्ता भूतलवर्तिनां ॥ २६ ॥

सहस्रसंख्यासाहित्ये लक्ष्यलक्षणसंख्यया ।
कौटिल्याद्यर्थशास्त्रेषु कोटिशो यन्मतिर्मता ॥ २७ ॥

स श्रीदेवीति नाम्नात्मनाम्नातां परिणीतवान् ।
लक्ष्मीशवत्तनो लक्ष्मीधरो ऽभूद्वरधीधरः ॥ २८ ॥

भगवद्बोधभास्वाख्यश्रीपादप्रसादतः ।
आसादितस्तदानंदाद्वैतज्ञानानुभावकः ॥ २९ ॥

श्रीमति श्रीशवदणहिल्लपाटकपत्तने ।
मल्लदेवः सहामात्यसभ्यः स्मृत्यादिनिर्णये ॥ ३० ॥

स्नातस्मृतिसिद्धांतश्रांतः स्वांतः (?1. क्रांतः) कवेः पथि ।
पांथो ऽप्रतिमरामाख्यं महाकाव्यं चकार यः ॥ ३१ ॥

प्रत्यक्षीभूतभारत्येवितः (!) स्मार्तमहत्तमः ।
विरुद्धविधिविध्वंसं व्यधान्मुग्धबुद्धये ॥ ३२ ॥

इति स्मार्तमहत्तमश्रीमल्लक्ष्मीधरविरचिते विरुद्धविधिविध्वंसाभिधानो ग्रंथः समाप्तः ॥ संवत् १५८२ वर्षे चैत्रसुदि ४ भृगौ ॥

At the end of the volume, a leaf has been added, containing a prose paraphrase of the above genealogical account, written by a recent hand:

नागरा ब्राह्मणाः अष्टगोत्राः तेषां मध्ये काश्यपगोत्रे नागरवंशे काश्यां स्थानेश्वरनामा पंडितः चतुर्दिक्षु पंडितान् जित्वा । सप्तविंशतिसंख्यकनागरब्राह्मणेभ्यः सपरिच्छदान्गृहान्ददौ । ० । तदन्वये स्कन्दः ० । शाकंभरीदेशाधिपसोमेश्वरनाम्नो राज्ञः सान्धिविग्रहिकामात्यो जातः । तस्य पुत्रः सोढः सो ऽप्यमात्यः । तस्य पुत्रौ द्वौ स्कन्दवामननामानौ । तद्देशीयराजा पृथ्वीराजनामा स्कंदाय सेनाधिपत्यं वामनाय सान्धिविग्रहिकामात्यं च दत्त्वा स राजा स्वस्थो जातः । ततः स्कंदः तुरुष्ककान् अवधीत् । ततः अन्यसंगरे गते स्कन्दे राजा निद्राव्यसनमंदधीः स तुरुष्ककैर्व्यापादितः । पुनर्हरिराजनामानं शाकंभर्यां संस्थाप्य स्कन्दः चतुर्थाश्रममाश्रितः । वामनस्तु विंशशतार्धिकविंशल्लक्षद्रव्यैः सह अणहिल्लपाटकमगात् । तत्पुत्रो मल्लदेवः येन सुभाषितावली कृताप्रति[म]रामाख्यं काव्यं च । शास्त्रे कोटिशो मतं यस्य । तेन श्रीदेवी विवाहिता । तस्यां तत्सुतो लक्ष्मीधरो ऽभूत् । स एव भगवद्बोधभारतीशिष्यः अद्वैतज्ञानानुभावकः स एव विरुद्धविधिविध्वंसनामानं ग्रंथमकरोत् स एवायं ग्रंथः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

For fol. 1 of the MS., containing a fragment of *Śaṅkara's (Sarva-)Dharmaprakāśa*, see above, no. 1564. [H. T. Colebrooke.]

1578.

1531. Foll. 202 (numbered 1–200, nos. 5 and 35 occurring twice); size 10¼ in. by 4½ in.; indifferent Devanāgarī handwriting of about 1800 A.D.; 14–16 lines in a page.

Prayogatattva, a manual of ordinary religious rites, compiled, at Benares, by *Raghunāthasūri*, son of *Bhānuji*, in Śaka 1577 (A.D. 1655).

It begins:

शक्यं यन्न विशेषतो निगदितुं ब्रह्मादिवृंदारकैः
स्वांतध्वांतनिवारणाय सततं संभावितं योगिभिः ।
ध्यातं मंदरसंस्थितेन जगतः संसारबंधच्छिदा
पूर्णानंदसमोदनं तदखिलाधारं महो मन्महे ॥ १ ॥
नैजप्रभापटलनिर्मितकोटिपीठं
लेखेंद्रवंदितमहोज्वलपादकंजं ।
प्रालेयशैललसदुंदुरपत्रजातं
वंदे स्फुरत्फणगांचितचारुमौलिं ॥ २ ॥
अहिनरसुरवारानंददात्री मृडानी
हृतमुनिकुलविघ्ना भक्तवृंदास्तदोषा ।
दलितदितिजपुंजा शर्वराज्ञी सदा मां
सुखयतु जगदंबा चंद्रभिन्नावतंसा ॥ ३ ॥
शारदां शरदिंदुसप्रभां श्वेतनीरजसंस्थितां परां ।
हंसवाहनसंस्तुतां सदा भावये निखिलार्थदां शिवां ॥ ४ ॥
स्मृतिप्रणेतृनथ सूत्रकर्तृ-
स्तथापरान् भाष्यकृतो ऽभिपूज्य ।
प्रयोगसंदर्भकृतो ऽपि नत्वा
प्रयोगतत्त्वं चरिकर्मि काश्यां ॥ ५ ॥

संस्क्रियते एभिः श्रौतस्मार्तकर्मभिः पुरुष इति संस्काराः । ते च चत्वारिंशदित्याहतुः सुमंतुगौतमौ । गर्भाधानानवलोभनपुंसवनसीमंतोन्नयनबलिजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलोपनयनमहानाम्न्यादिव्रतचतुष्टयसमावर्तनपाणिपीडनदेवपितृमनुष्यभूतब्रह्मसंज्ञकपंचयज्ञानुष्ठानानि तथा पाकयज्ञसंस्था अग्न्याधेयमष्टकाः पार्वणश्राद्धे श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त हविर्यज्ञसंस्थाः । अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधसौत्रामणीति संज्ञास्तथा सप्तसोमसंस्थाः । अग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति संज्ञा इत्येते चत्वारिंशत्संस्काराः ॥ तथा दया क्षांतिरनसूयाशौचमनायासो मांगल्यमकार्पण्यमस्पृहेत्यष्टावात्मगुणाः । अन्ये ऽपि तीर्थस्नानादयः संस्काराः । °

इति ° संस्काराख्यं प्रथमं तत्त्वं fol. 3*b*; इति ° परिभाषाख्यं द्वितीयं ° fol. 10*b*; ° स्वस्तिवाचनाख्यं तृतीयं ° fol. 15*a*; आभ्युदयिकाख्यं चतुर्थं तत्त्वं fol. 27*a*;—° ग्रहमखाख्यं पंचमं तत्त्वं fol. 62*a*; ° रजस्वलाशांत्याख्यं षष्ठं fol. 77*a*, etc.

The last two leaves contain a table of contents.

The MS. ends: इति रघुनाथसूरिविरचिते प्रयोगतत्त्वे ऽकैविवाहाख्यं पंचविंशं तत्त्वं ॥ ° ॥

शांडिल्यान्वयसंभूतरघुनाथेन धीमता ।
प्रयोगतत्त्वमेतच्च मुदे ऽस्तु तज्जगत्पतेः ॥ ५ ॥
शाके वह्निनगेषुभूपरिमिते नैषे सिते ऽर्केऽभे
श्रीमत्पर्वतनंदिनीपरिवृढप्राणप्रियस्त्रीकसि ।
श्रीमद्भानजिसूनुना (!) विरचितं सत्पादकंजालिना
पूर्णानंदमुदे भवत्वविरतं यच्छ्रेयसां साधनं ॥ ६ ॥

इति रघुनाथसूरिविरचितं प्रयोगतत्त्वं समाप्तं ॥

For another MS. of this work, which omits the first four introductory stanzas, see Rāj. Mitra, Cat. of Bikāner MSS., no. 952.

[H. T. Colebrooke.]

1579.

1430. Foll. 155; size 12¼ in. by 4½ in.; carelessly written, in Devanāgarī, by two different hands, in 1798 A.D.; ten lines in a page.

Nirṇayāmṛita, a work, in four chapters, on the times and seasons suitable for certain ceremonies, compiled—by order of *Sūryasena-nṛipati* of Ekacakrapura on the Yamunā—by *Allāḍanāthasūri*, son of *Paṇḍita Siddha-Lakshmaṇa*. It begins*:

कारणमेकं जगतां वारणमास्येन तारणं विपदां ।
किमपि महो महनीयं प्रत्यूहव्यूहदारणं वंदे ॥ १ ॥

* These extracts were made long before the appearance of Prof. Bhandarkar's Report for 1883-4 (1887), in which this introduction is given more fully. The readings of the present MS. may still be of some value to Indianists.

DR. RUPNATHJI (DR. RUPAK NATH)

भावयामि दृढभक्तिभावनों भावितांह्रियुगलां सुमंगलां ।
इष्टदां सततमिष्टदेवतां मंत्रवत्सकलमंत्रमातरं ॥ २ ॥ °

यैः कृतः स्मृतिमहार्णवपार-
प्राप्तिहेतुरिह संग्रहसेतुः ।
तान्नमामि मनुविष्णुयमाद्यान्
कालनिर्णयकृतो ऽप्यहमन्यान् ॥ ४ ॥ °

जयंति भूमाविह बाहुबाणाः (? l. चा°)
क्षितीश्वरा दिक्श्रुतबाहुबाणाः ।
प्रकुर्वते ये विशदा यशोभिर्
जगत्समग्रं च सदायशोभिः ॥ ६ ॥

बभूव यश्च त्रिदशैः सरूपस्
तदन्ववाये बलवान्सरूपः ।
चकार नित्यं च समाहितानां
परिश्रयं यः परमाहितानां ॥ ७ ॥

तस्यात्म[जन्मा]जनि कर्णदेवस्
त्यागेन यो विश्रुतकर्णदेवः ।
वपुःश्रिया निर्जितकामदेवः
सदा समाराधितवासुदेवः ॥ ८ ॥

तदात्मभूरुद्धरणे (णः Bh.) क्षितींद्रः
क्षितींद्रभिद्भानुमहानुभावः ।
शुभावदातायतकीर्तिरार्ति-
हरः सतां श्रीपतिमूर्तिरासीत् ॥ ९* ॥

स्वकीर्तिवल्लीप्रभवातिवल्ली-
स्थलीव ढिल्ली नगरीमतल्ली
शतप्रफुल्ला विकसद्विलासा
सुकीर्तिनीरैः समसिंचि येन ॥ १०* ॥
प्रस[क्रमु]क्रामयहेम° ११ ॥

उद्धरणं शुद्धरणं संहरणं विद्विषां समुद्धरणं ।
सुहृदां पुरातनहृदां नमतितम (मां Bh.) को न नाम
[तसुमाना (! तमनाम: Bh.) ॥ १२ ॥

सौंदर्येण विजृंभिणा रति[पति]: शौर्येण श्रीपतिः
गांभीर्येण सरित्पतिर्विलसता धैर्येण भूभृत्पतिः ।
सत्कांत्योड्र(l. डु)पतिः श्रिया धनपतिर्यस्तेजसाहर्पतिस्
तेनार्योद्धरणेश्वरेण सुमतिः स्पर्धेत कः क्ष्मापतिः॥१३†॥

अस्य(? l. सा)वसावाहितसत्प्रतापः
स्वसंनिवेशोचितभव्यदेशं ।
अध्यास्त सिद्धान(? l. स्त)समस्तशक्रा
स्पदं पुरं सादरमेकचक्रं ॥ १४ ॥ °

यस्योपकंठे सितिकंठकंठ-
स्पर्धिप्रभा भानुसुता वहंती ।
तदुच्चवेदध्वनिसंनिकर्षाद्
अभ्यस्यतीवाखिलपावनत्वं ॥ १७ ॥ °

पुरं शशासैव पुरंदराभस्
तदैकचक्राख्यनरेकचक्रः ।
असंख्यसंख्यैरजयोर्जिताख्य-
चिख्यास्य (!) येनोद्धरणक्षितीशः ॥ २३ ॥

समुद्रैरपि यः सप्तसमुद्रैः संयुतां महीं ।
पालयंस्तन्महीपालः पुरालंकुरुते पुरं ॥ २४ ॥

गुणरत्नाकराच्चंद्रश्चंद्रसेनस्ततो ऽभवत् ।
महा महा स देवस्य शालिमौलिविभूषणः (!) ॥ २५ ॥

यस्य विश्वोपकाराय सदा सत्युद्यते करे ।
शशंके धनदः स्वैरं चकंपे कनकाचलः ॥ २६ ॥ °

तस्यात्मजो ऽभूच्चरितार्थजन्मा
श्रीसूर्यसेनो जयति क्षितींद्रः ।
सुदर्शनेनैव बिभर्ति गोपी-
नारायणत्वं भुवि यः प्रसिद्धं ॥ ३० ॥ °

चकास्ति यस्यातिनलप्रतापः
प्रतापसेनो ऽवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य
यो लक्ष्मणाकारमुपैति भद्रं ॥ ४० ॥

औदार्यसौंदर्यदयानयाद्या
विज्ञानशौर्यादिगुणेषु नान्यं ।
प्रतापसेनस्य समं समंताल्
लोके विलोके ऽत्र विचित्रलोके ॥ ४१ ॥

श्रीदेवसेनस्तनयो ऽपि गोपी-
नारायणस्याजनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य
ममारतिस्तुष्टिमुपैति यत्र ॥ ४२ ॥

देवसेनकुमारस्य कुमारस्य च नांतरं ।
आर्यानंदकृतो नित्यं विभ्राणां शक्तिमुत्तमां ॥ ४३ ॥

---

* Bh. gives verses 9 and 10 in the order 9*a*, 10*a*; (10*b*), 9*b*. His reading of our 10*b* is:

भल्लीशतप्रोतशकेशकुंभीकुंभास्रनीरैः समसिं(से)चि येन ।

† The MS. numbers both half-verses (13 and 14); hence the next verse 15, etc.

DR.RUPNATHJI(DR.RUPAK NATH)

श्रीसूर्यसेनः पुरमेकचक्रं
वरांगमध्यास्य जयत्यजस्रं ।
यमन्यकांतं जितनाककांतं
गुर्वीयमुर्वीव सदोवैरास्ते ॥ ४४ ॥
विद्वत्सु सत्स्वपि महत्सु समाश्रितेषु
श्रीसिद्धलक्ष्मणसुतः सुतरामसुष्य ।
श्रीसूर्यसेननृपते[र्निजते]जसो ऽभूद्
अल्लाडनाथमतिमानतिमानपात्रं ॥ ४५ ॥ ०
अगाधग्रंथपयोधिं तथालोड्य मया [धिया] ।
समुद्धृतं नृपादेशान्नेनेदं निर्णयामृतं ॥ ४७ ॥
मनुस्मृतिं विष्णुपराशरोप-
स्तंबस्मृतीर्वीक्ष्य मिताक्षरां च ।
तथापरार्कार्णवपारिजातान्
स्मृत्यर्थसारं स्मृतिचंद्रिकां च ॥ ४८ ॥
मात्स्यं कौर्मं वाराहं च दृष्ट्वा वैष्णववामने ।
मार्कंडेयपुराणानि भविष्योत्तरभारते ॥ ४९ ॥
[परिशिष्टं हेमाद्रेरनंतभट्टीयगृह्यपरिशिष्टे ।
कालादर्शं चिंतामणिं त्रिदंडीं च कृत्यकल्पतरुं ॥ ५० ॥]
सकलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ।
संवत्सरप्रदीपं सभोजराजीयदेवदासीयं ॥ ५१ ॥
रूपनारायणीयं विद्याभट्टपद्धतिं विततां ।
वीक्ष्य महादेवीयं शुभं निबं[र्ध] च विश्वरूपकृतं ॥ ५२ ॥
श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ।
अल्लाडनाथसूरिः संग्रहमिह कालनिर्णयं कृतवान् ॥ ५३ ॥
इति ग्रंथावतारं ॥ अथानुक्रमणी ॥
ग्रंथे श्रीसूर्यसेनस्य निर्णयामृतसंज्ञके ।
आदावस्मिन्नुदाहारः कथितः प्रथितः क्रमः ॥

Śloka 50, omitted by the present MS., is found in other MSS., viz. Weber, Cat. Berl., no. 1170; Bhandarkar, Rep., p. 351; Burnell, Tanjore MSS., p. 130*b*.

For other MSS. see Rāj. Mitra, Notices, I., p. 151; IV., p. 285; also Cat. of Bikāner MSS., p. 426 ('written by *Gopīnārāyaṇa*, under the auspices of the King *Sūryasena*,' but beginning and ending differently).

Ch. I., *sāmānyatithinirṇayaprakaraṇa* ends fol. 16*b*; II., *sakalatithinirṇaya* (calendar of fasts and feasts), fol. 94*b*; III., *śrāddhanirṇaya-prakaraṇa*, fol. 129*a*; IV., *āśaucaprakaraṇa*, ends:

कूष्मांडसंज्ञके घृतं हुत्वा विप्राय गां दत्त्वा पंचगव्यं प्राश्य शुद्धः । सूतकी आवश्यकं विवाहादिमंगलं कुर्यात् ॥ इति मंगलं ॥

इति श्रीसूर्यसेनमहामहींद्रविरचिते निर्णयामृते आशौचप्रकरणं समाप्तं ॥

श्रीसूर्यसेनभूभृद्विमलयशःक्षीरसागरादुदिते ।
इति निर्णयामृते ऽस्मिन्नाशौचप्रकरणनिर्णयो जातः ॥ १ ॥

श्रीमत्पंडितलक्ष्मण(सिद्ध fol. 16*b*)लक्ष्मणसुतः श्रीसिद्ध-
[लक्ष्मीपद-
द्वंद्वाराधनसिद्धमहिमा यः सिद्धसारस्वतः ।
आदेशादनुनैष सूर्यमहसः श्रीसूर्यसेनप्रभोर्
धैर्ये कर्मणि कालनिर्णयमसावल्लाडनाथः सुधीः ॥ २ ॥

As the work is quoted in *Acala's Nirṇaya-dīpaka* (see the next MS.), it must have been composed prior to 1518 A.D.

[H. T. Colebrooke.]

1580–1582.

690–692. Foll. 510; size $9\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, about 1730 A.D.; 8 or 9 lines in a page.

Nirṇayadīpaka, a compendium of rules and opinions regarding religious practices and observances, compiled, in Saṃvat 1575 (A.D. 1518), by *Acala Dviveda* (*Dvivedin*), surnamed *Bhāgyavateya*.

The author, who was one of three sons of *Vatsarāja*, and a native of Vṛiddhapura, carries his genealogy still further up through *Govinda*, *Lakshmīdhara*, and *Ananta* to *Dhāvigdeva* (?).

It begins (as corrected with the help of the next MS.):

हेरंबः सर्वकार्येषु सिद्धिदः सर्वदा सतां ।
सिद्धिबुद्धियुतः सो ऽस्तु ग्रंथनिर्मितिकर्मणि ॥ १ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

देवः श्रीशंभुजन्मा गणपतिरखिलान्नागरानार्यबुद्धीन्
रक्षत्वस्मिन्समस्ते जगति तु भयतो यत्र कुत्र स्थितांश्च ।
येषां सन्मप्रवृत्ता परमविधियुता पंचयज्ञान्विता या
धर्म्या स्वाचारयुक्ता न विरमति यतो नित्यचर्या कदा-
[चित् ॥ २ ॥
षट्कर्मधर्मनिरतैरपि चातिधैर्यैर्
यज्ञक्रियाकुशलिभिस्तु विचारगर्भैः ।
धर्म्यैर्द्विजैश्च शरणागतसाधुवृत्तैर्
आस्थापितं पुरवरं हि शिवेन वृद्धं ॥ ३ ॥

विद्यावृद्धा धर्मवृद्धा ज्ञानवृद्धा हि ये नराः ।
वसंति यत्र तेनैतद्बुद्धा वृद्धपुरं विदुः ॥ ४ ॥

आचार्यतामुपगताय चतुर्मुखाय
शंभुः स्वयं स्वकरसक्तविवाहशोभः ।
शैलांगजोद्वहनपर्वणि संव्यतारीत्
तीर्थास्पदं नगरमेतदमर्त्यसंज्ञ ॥ ५ ॥

नास्माभिर्नेनु नागरस्य पुरतो वेदार्थवादः कदा
जेयो यत्र महन्नृपैरिति (?त्तमै०) शिशोर्ब्रह्मर्षिभिर्निर्गतं ।
दुर्वासा वसति स्म नागनिलये व्यासो ऽपि काशीपुरे
ऽगस्तिः स्वस्ति समुच्चरे[त्] त्रिजगतां लंकाकृतात्मा
अतः सन्मानमर्हंति सर्वेभ्यो नागरा ननु । [लयः ॥ ६ ॥
यतो ब्रह्मर्षिराजर्षिदेवर्षिभिरुपासिताः ॥ ७ ॥

ये नागरा भूवलये प्रसिद्धाः
श्रुत्युक्तमार्गाचरणे प्रगल्भाः ।
द्रव्यप्रदानान्नकुबेरशोभा
धर्मद्विषः प्रत्यनिशं कठोराः ॥ ८ ॥

तेषु व्यक्तिरभूदेका मडोडेत्यभिधोत्तमा ।
तस्यां धारिगदेवो भूधरायां(?रो ऽभूद्ध०) धर्मैकधैकः ॥ ९ ॥

अनंतनामा समभूत्तदंगजो
यो ऽध्यापिपद्वेदमनंतवाडवात् ।
अनंतभक्त्या निजजन्म सार्थकं
कृत्वा ययावीश्वरधाम निर्मलं ॥ १० ॥

लक्ष्मीधरः सूनुरभूदनंताद्
आनंददायी भुवि भूसुराणां ।
यस्मिन् द्विजे श्रीश्च सरस्वती च
कुटुंबभावेन सदोषतुस्ते ॥ ११ ॥

लक्ष्मीधरादाप्तजनुर्द्विजेशो
गोविंदनामा भुवि विश्रुतो यः ।
वेदार्थविद्वैदिककर्मविज्ञो
विद्वद्द्विजैरर्चितपादपद्मः ॥ १२ ॥

तस्यात्मजो ऽभून्ननु वत्सराजो
वत्सैस्त्रिभिर्विस्तृतवंशराजः ।
यो धर्मवर्त्माश्रयराजराजः
सर्वार्थविज्ञानविधौ सराजः(!) ॥ १३ ॥

श्रीवत्सराजादचलद्विवेदी
जनुर्दधद्विप्रजनांघ्रिरेणुः ।
श्रीनागराणां श्रुतिसागराणां
करोति किंचिच्छुभकर्मसिद्धै ॥ १४ ॥

श्रीमन्महारुद्रभवं विधानम्
ऋग्वेदिविप्राम्नमतारिमं यत् ।
तस्यानुजं निर्णयदीपिकाख्यं
ग्रंथं वयोमोहहरं करोमि [करोति. 2595] ॥ १५ ॥ ०

द्वैवेदनिदुषां प्रधानमभवच्छ्रीवत्सराजो द्विजस्
तत्सूनुः सकलद्विजांघ्रिरजसामंशः कृती यो ऽचलः ।
तेनायं क्रियते प्रियाय विदुषां सन्निर्णयाकांक्षिणां
ग्रंथो निर्णयदीपको ऽधिवसता श्रीपूर्ववृद्धं पुरं ॥ १६ ॥

जनकं स्वं प्रणम्याथ गुरुं भट्टविनायकं ।
तिथ्यादेर्निर्णयं कृते ऽचलो नागरवाडवः ॥ १९ ॥
तिथ्यादिकं चोदनातः(!) श्राद्धदानादिकर्मसु ।
अंगत्वेनेष्यते तस्मान्निर्णेतव्यत्वमर्हति ॥ २० ॥

आदिशब्देन कालो नक्षत्रादि च । ०

The work is chiefly concerned with the various observances connected with *śrāddha*, followed by chapters on *aśauca* and *grahaṇa*; other ceremonies such as *upanayana*, *vivāha*, *pratishṭhā*, etc., being only cursorily dealt with towards the end of the work.

Of the authorities referred to by the author, the following may be mentioned: *Anantabhaṭṭa*, foll. 59*b*, 60*b*, 444*a*; *Ācāratilaka*, fol. 74*b*; *Ṛshyaśṛiṅga*, foll. 315*b*, 340*a*, 362*a*; *Kāraṇatantra*, foll. 481*a*, 482*a*, 483*a*; *Kārshṇājini*, foll. 334*a*, 335*a*, 348*a*, 350*a*; *Kālanirṇaya*, foll. 324*a*, 354*b*; *Kālanirṇayadīpikā*, fol. 441*b*; *Kālādarśa*, foll. 7*a*, 127*b*, 184*a*, 254*a*; *Kauśikasaṃhitā*, fol. 139*b*; *Kshīrasvāmigrantha*, fol. 45*b*; *Khādiragṛihya*, fol. 401*b*; *Gabhasti*, fol. 450*a*; *Gālava*, foll. 276*a*, 313*a*, 315*b*; *Gṛihyapariśishṭa*, foll. 250*b*, 444*b*, 468*b* (also *Kāṭhakagṛihyapari-*

DR.RUPNATHJI(DR.RUPAK NATH)

śishṭa, foll. 449*a*, 450*a*, 461*a*; and *Maitreya-gṛihyap.* fol. 338*a*); *Govindarāja*, fol. 288*a*; *Caturviṃśatimata*, fol. 419*b*; *Candranibandha*, foll. 271*b*, 273*b*; *Candrasmṛiti*, fol. 250*a*; *Camatkārakhaṇḍa*, fol. 341*b*; *Jātūkarṇya*, foll. 336*a*, 337*a*, 361*a*, 398*b*; *Jaimini*, fol. 179*a*; *Jyotiḥsāgara*, fol. 446*a*; *Jyotir-Bṛihaspati*, fol. 350*a*; *Trikāṇḍamaṇḍana*, fol. 445*b*; *Dāmodarīya*, foll. 462*b*, 463*b*, 469*a*; *Dhaumya*, foll. 163*a*, 164*a*, 165*b*; *Nigama*, foll. 424*b*, 433*a*; *nigamasmaraṇa*, fol. 155*a*; *Nirṇayabhāskara*, fol. 108*a*; *Nirṇayaśiromaṇi*, fol. 158*a*; *Nirṇayāmṛita*, fol. 39*b*; *Pārijata*, foll. 273*b*, 279*b*; *Paiṭhīnasi*, foll. 8*b*, 49*b*, 56*a*; *Bṛihaspatijyotirgrantha*, fol. 459*a*; *Bhalla*, foll. 174*a*, 238*a*; *Bhāshyasaṃgraha*, fol. 44*a*; *Bhūpālavallabha*, fol. 466*a*; *Ratnamālā*, foll. 4*b*, 237*b*, 463*a*; *Lalla*, foll. 171*a*, 239*a*, 465*b*, 474*a*; *Vijñāneśvara* (*yathā Vijñāneśvareṇa Smṛityarthasāre*), fol. 273*b*; *Viśvarūpa*, fol. 159*b*; *Viśvarūpanibandha*, foll. 163*a*, 166*b*, 170*b*; *Viśvādarśa*, foll. 271*b*, 308*a*; *Vishṇubhakticandra*, fol. 219*b*; *Vishṇurahasya*, foll. 113*a*, 181*a*, 185*a*; *Vyavahārasāra*, foll. 464*a*, 487*a*; *Vyāghra*, fol. 418*a*; *Vyāghrapāda*, foll. 432*b*, 434*a*; *Vratakalpa*, fol. 220*b*; *Vratasamuccaya*, fol. 118*a*; *Śrīpati*, fol. 174*a*; *Shaṭtriṃśanmata*, foll. 395*b*, 396*a*, 402*a*, 415*b*; *Satyavrata*, foll. 452*a*, 457*b*; *Sumantu*, foll. 315*b*, 316*b*, 331*a*; *Sureśvara*, fol. 474*a*; *Smṛiticandrikā*, foll. 151*a*, 472*b*; *Smṛitimañjarī*, foll. 337*b*, 359*b*; *Smṛitisaṃgraha*, foll. 260*b*, 332*a*, 434*b*, 455*b*; *Smṛitisamuccaya*, fol. 333*a*; *Smṛityarthasāra*, very often; *Hāṭakeśvarakshetramāhātmya*, foll. 130*a*, 141*b*, 234*a*.

It ends: इति उक्तेषु निर्णयेषु वर्तमानानां पुंसां सर्वकार्येषु मंगलं स्यादिति मंगलं ॥ संपूर्णोयं ग्रंथः ॥

नानानिर्णयसंपन्नः कृतो निर्णयदीपकः ।
शुभं भाग्यवतेयेन द्विवेदेनाचलेन च ॥
ऋग्वेदोक्तमहारुद्रविधानस्य महोदरः । [दीपकः ॥
शुधांधदर्शनायायां (? शुद्धांगदर्शनाय यो) कृतो निर्णय-
द्वैवेदोर्विदुषां ० श्रीपूर्ववृद्धपुरं ॥
वसिते (?l. वसंति) ये वृद्धपुरे द्विजास्ते विबुधोपमाः ।
तथापि सद्विवेकाय ग्रंथो भूवलये ऽस्तु नः ॥
पंचसप्ततिमे वर्षे संवत्पंचदशात्परे ।
शुक्रस्य कृष्णाद्वादश्यां ग्रंथः पूर्णत्वमीयिवान् ॥

इति श्रीनिर्णयदीपकः समाप्तः ॥ इदं पुस्तकं केशवेन लिखित्वा श्रीलक्ष्मीधरब्राह्मणाय स्वार्थपरमार्थनिमित्तं दत्तं लेखकपाठकयोर्हरिहरौ सर्वदा सुप्रसन्नावास्तां ॥

Tho surname *Bhāgyavateya* also occurs at fol. 424*a*:

कृते ऽचलद्विवेदेन ग्रंथे निर्णयदीपके ।
इत्थं भाग्यवतेयेन कृतो ग्रहणनिर्णयः ॥

[H. T. Colebrooke.]

1583.

2595. Foll. 290 (of which foll. 164, 174, 270–273 are missing; while three old *śuddhipatras* are inserted after foll. 32, 57, 124); size 11¾ in. by 5 in.; fairly written, in Devanāgarī, by different hands; 10–12 lines in a page.

Nirṇayadīpaka.

This MS. is made up of different portions, which still show an original separate pagination, viz. foll. 141 seq., foll. 188 seq., and foll. 252 seq. The last two leaves are older than the rest, while foll. 252–288 are again more ancient than the other portions.

The preceding MS. must have been derived, at least for the greater part, from the present MS., having been transcribed from it by a careful and experienced hand. This was certainly the case as regards the last portion, where the text of this MS. has been exactly reproduced. The lacunæ caused by the lost leaves 164 and 174 occur also at foll. 305*b* and 318*a* of MS. 691, without, however, any indication of a gap in the text; while, on the other hand, the gap occasioned by the loss of

DR. RUPNATHJI (DR. RUPAK NATH)

foll. 270–273 has been supplied in foll. 476–481 of MS. 692, but evidently from some other source than the missing leaves, as fol. 274 of this, and fol. 482 of the other MS., begin exactly alike in the middle of a word, while the last line of fol. 481*b* of the latter MS. has been left blank.

The date (of the last two leaves) of this MS. is संवत् १६४६ समये चैत्रवदि १५ सोमवासरे लिपितं वाराणस्यां जमदीशब्राह्मणेन ॥

For another MS. of this work, see Rāj. Mitra, Bikāner Cat., p. 427.

[MACK. COLL.]

1584, 1585.

2187, 2188. Foll. 322 and 333; size 11 in. by 5 in.; large, clear, modern Devanāgarī writing; nine lines in a page.

Nirṇayasindhu (also called *Nirṇayakamalākara*), a comprehensive work on religious rites and ceremonies, compiled, in 1611-12 A.D., by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa Bhaṭṭa* and *Umā*, grandson of *Nārāyaṇa Bhaṭṭa*, great-grandson of *Rāmeśvara Bhaṭṭa*, and younger brother of *Dinakara* (*Divākara*) *Bhaṭṭa*.

The work is one of the chief authorities in Western India on matters connected with ceremonial observances.

It begins [A]:

कारुण्यैकनिकेतं रामं सीतालतायुक्तं ।
विश्वामित्रान्ववायव्रततिसमालंबशाखिनं वंदे ॥ १ ॥
लक्ष्मीसहायं कल्पद्रुतरलं जितगोकुलं ।
वर्हापीडं घनश्यामं महः किंचिदुपास्महे ॥ २ ॥
वेदार्थधर्मरक्षायै मायामानुषरूपिणं ।
पितामहं हरिं वंदे भट्टनारायणाह्वयं ॥ ३ ॥
यत्पादसंस्मृतिः सर्वमंगलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥ ४ ॥
सर्वैकल्याणसंदोहनिदानं यत्पदद्वयं ।
द्युनदीसोदरीमंबामुमाख्यां नौमि सादरं ॥ ५ ॥
[विंदुमाधवपादाब्जरोलंबीकृतविग्रहं ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥ om. A.]
हेमाद्रिमाधवमते प्रविचार्य सम्यग्
आलोच्य तत्त्वमथ तीर्थकृतां परेषां ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥ ७ ॥
संति यद्यपि विद्वांसस्तन्निबंधाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥ ८ ॥

तत्र संक्षेपतः कालः षोढा । ऋतवो ऽयनमृतुर्मासः पक्षो दिवस इति । ०

The work is divided into three chapters (*pariccheda*), the 1st of which deals with generalities (*paribhāshā*) and the several days of the *paksha* (*tithinirṇaya*); while the 2nd (*saṃvatsarādityanirupaṇam*) supplies a regular calendar of religious fasts and feasts; and the 3rd chapter (*prakīrṇanirṇaya*) is again subdivided into three *prakaraṇa*, treating of, a) *saṃskāra*, and various ceremonies such as dedications of trees, tanks, etc., of *devapratishṭhā*, etc.; b) *śrāddha*; c) *asauca* and miscellaneous rites, such as *vidhavādharmāḥ*, *yatidharmāḥ*, *saṃnyāsa*, etc.

Vol. I. of this MS. contains chapters I. (foll. 76) and II. (foll. 150, numbered 148, nos. 57 and 58 being used twice); and foll. 1–72 of the third chapter, terminating in the middle of *vivāha*; Vol. II. contains the remainder of the chapter (foll. 73–405, numbered 404, no. 168 occurring twice).

The last two concluding stanzas and the colophon run thus:

वसुऋतुऋतुभूमिते* गते ऽब्दे
नरपतिविक्रमतो ऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितो ऽयं
रघुपतिपादसरोरुहे ऽर्पितश्च ॥ ६ ॥

* Only MS. 193 has the second ऋतु, whilst the present MS. has क्रतु instead, and the other MSS. omit it altogether.

DR. RUPNATHJI (DR RUPAKNATH)

जगति सकलविद्यासिंधुमुद्दिधयानां
परभणितिपरीक्षा युज्यते सज्जनानां ।
तदिह मम निबंधे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्भवद्भ्यं विमृश्यम् ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमद्रामेश्वरभट्टसुत-विद्वन्मुकुटहीरांकुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ तृतीयपरिच्छेदः समाप्तश्चायं निबंधः ॥

Fourteen leaves inserted at the beginning of Vol. I. contain a complete table of contents, but without references to the pages.

The work has been printed at Bombay 1862, and Benares 1865. Cf. also Gildemeister, Bibl. Sansk., no. 318; West and Bühler, Digest, 3rd. ed., p. 23; Burnell, Tanjore MSS., p. 130*b*.

[Gaikawar.]

1586.

1888. Foll. 382 (in three parts of foll. 45, 92, and 245); size 11¾ in. by 5½ in.; fairly written, in Devanāgarī, by two or three hands; 12–15 lines in a page.

Nirṇayasindhu.

Dated: शके १६७१ शुक्लनामसंवत्सरे भाद्रशुक्लत्रयोदश्यां सौम्यवासरे तद्दिने समाप्तिमगमत् ॥ वज्रोपनामकर्वेकरेण लिखितोयं ग्रंथः समाप्तः ॥ after which, by another hand: कर्वे (i.e. *Karvekar*) इत्युपनामस्य रघुनाथभट्टस्येदं पुस्तकं ॥

[Dr. John Taylor.]

1587.

2173. Foll. 507 (in three parts of foll. 60, 129 and 318); size 11¼ in. by 5¼ in.; clear Devanāgarī writing of about 1780 A.D.; ten lines in a page.

The same work. [Gaikawar.]

1588, 1589.

2654, 2655. Foll. 556 (numbered 557, no. 495 having been passed over); size 10 in. by 4½ in.; good, clear Devanāgarī writing of the latter part of last century; 8–11 lines in a page.

The same work.

Vol. II. begins with fol. 289, in the *liṅgārcāpratishṭhāvidhi* (ends fol. 300*b*).

[Gaikawar.]

1590, 1591.

192, 193. Foll. 372 (paged 44, 106, and 222); size 11¾ in. by 5¼ in.; fairly written, in Devanāgarī, by three different hands, towards the end of last century; ten lines in a page.

Nirṇayasindhu.

Vol. I. contains the first two, vol. II. the third chapter. [H. T. Colebrooke.]

1592.

2690. Foll. 112; size 9¾ in. by 7½ in.; fairly written, in Devanāgarī; fifteen lines in a page; European paper.

A portion of the *Nirṇayasindhu;* viz. *paricch.* III., *prakaraṇa* 2, here called the 4th *pariccheda.* [Mack. Coll.]

1593.

1149. Foll. 224; size 9½ in. by 3½ in.; good Devanāgarī writing of about 1600 A.D.; nine lines in a page; the last four leaves have been supplied by a modern hand.

Jaṭamalla-vilāsa, a digest of rules of conduct, compiled (in the latter part of the 15th, or of the 16th century), by *Śrīdhara,* under the patronage of Prince *Jaṭa Malla,* younger brother of *Cāya Malla;* son of *Bālacandra,* and grandson of *Ḍhaula,* sole minister of the ruler of *Ḍhilli.*

On the first page the writing, which had faded, has been touched up in several places, but not always correctly.

DR.RUPNATHJI(DR.RUPAK NATH)

It begins :

रम्योत्तुंगलसत्कपोल[∪∪ –]ह्वानांबुधाराभर-
भ्राम्यन्मत्तमधुव्रतैप(?र)तिव(?त)रामारब्धकोलाहलः ।
सान्द्रानंदसुरेन्द्रवंदितपदद्वंद्वारविंदः सदा
विघ्नध्वंसनधूमकेतुरवतु श्रीमानुमानन्दनः ॥ १ ॥

फुल्लेन्दीवरदामसुंदरतरश्यामाभिरामद्युतिं
वंशीनिस्वनमुग्धनर्णककुलैराकीर्णमुत्कर्णकैः ।
भक्तन्यस्तविनिद्रसुंदरमिलन्मंदारदामश्रियं
श्रीगोविन्दमनिद्रपंकजशुचिं स्मेराननाब्जं भजे ॥ २ ॥

कुंडलीकृतभुजंगकुंडलीमंडितो भसितभूषितदेहः ।
संततं द्विरदकृत्तिवृतांगो मंगलं दिशतु मे शितिकंठः ॥ ३ ॥

प्रसादमासाद्य सदैव यस्या
मूको ऽपि वागीशतुलामुपैति ।
सा पुस्तकव्यग्रवरैकहस्ता
सरस्वती मंगलमातनोतु नः ॥ ४ ॥

अस्ति स्वर्णपुरी सुपर्वनगरीसौंदर्यगर्वापहा
वर्णानां बहुवित्तसंग्रहवतां पूर्णा चतुर्णां गणैः ।
यस्यां कौशलगोत्रजक्षितिभुजां मंदीरनामामल[ः]
क्षत्रश्रोत्रियसंभवो भुवि महान् वंशः समुज्जृंभते ॥ ५ ॥

तस्मिन्नसीमगुणरत्नचयैकसिंधुः
सिंधूद्भवारमणचिंतनदत्तचेताः ।
संग्रामनिर्जितबलोर्जितवैरिवीरो
विशिष्ट[– ∪]रघुवंशभवो बभूव ॥ ६ ॥

अभवदमलमूर्तिर्विश्वविख्यातकीर्तिः
सुकुलनलिनभानुर्वीरभूपालसूनुः ।
करकृतकरवालो वैरिभूपालकालः
कृतहरिहरसेवः श्रीजयदेवदेवः ॥ ७ ॥

असमसमरलीलालंपटक्षोणिपाल-
क्षपितविपुलदर्पश्चंडकोदंडशाली ।
अनवरतवितीर्णस्वर्णपूरो धरायाम्
अयमकृत कृतार्थानर्थिसार्थानजस्रं ॥ ८ ॥

तस्य सूनुरभवन्नयशाली
नन्नदेव इति विश्रुतकीर्तिः ।
पार्थिवप्रथितवंशवतंसः
कंसवैरिपदपंकजहंसः ॥ ९ ॥

तस्याजनिष्ट तनयो विनयोपपन्नो
दासः शशीव जगति द्विजदेवदासः ।
भूपालमौलिविलसन्नखचक्रवालो
भूभावनस्वरवैरिनृपालकालः ॥ १० ॥

तस्याभवत्सूनुरनुन्नमौजा
ढोलाभिधानो दृढराजशब्दः ।
ढिल्लिपतिप्रौढतरैकमंत्री
येनाभवत्पुत्रवती जनित्री ॥ ११ ॥

असमसमरलीलः सर्वदा दानशीलः
स्वजनकदनहर्ता वंदिनिर्मोक्षकर्ता ।
उपचितबहुवित्तः संततानंतचित्तो
विदितविमलवंशः क्षत्रवंशावतंसः ॥ १२ ॥

हृदयनिहितकंसध्वंसिपादारविंद-
द्वितयजनितभक्तिक्षालिताशेषदोषः ।
सततकनकदानामंदनंदन्नमुखेंदु(?)-
प्रथितकविविधविद्वद्वृन्दवंदारुमौलिः १३ ॥

तदात्मजः संप्रति बालचंद्रो
जागर्ति कीर्त्या जितपूर्णचंद्रः ।
कक्षासनं के दधति स्म नित्यं
मालां विशालामिव भूमिपालाः ॥ १४ ॥

नृपतिमुकुटरत्नश्रेणिसंपातानिर्गत्
तरुणकिरणराजीमंजरीरंजितांघ्रिः ।
स्वभुजविजितभूभृत्प्रापितानंतवित्त-
द्विजवितरणलीलो विश्वविख्यातशीलः ॥ १५ ॥

तस्याभवन्नयवतस्तनयो दयावान्
क्षमोनिधेरिव वधुः किल चायमल्लः ।
सत्री बलक्षपितवीरविपक्षपक्षो
यो जन्मना जनयितारमलंचकार ॥ १६ ॥

तेनार्थिनः कृतवता कृतिनः कृतार्थाद्
विद्याविनोदमुदितामलमासनेत्(?r. °मानसेन) ।
सौंदर्यनिर्जितमनोभववैभवेन
मानोन्नतेन कुलमुन्नतिमाजगाम ॥ १७ ॥

तस्य सोऽयमनुजो जटमल्लः
पांडवस्य जगति प्रतिमल्लः ।
भाति कीर्तिर्जितकर्णदधीचिर्
दीननीरभवदर्णववीचि(:) ॥ १८ ॥

तरुणतरणिकल्पानल्पचंडप्रतापो
विगतदुरितशंकः शोषितारातिपंकः ।
सुपितविबुधवृंदो (?सुहित °) राजवृंदैकवंद्यो
विजितमदनमुद्रो वैरिराजीवचंद्रः ॥ १९ ॥

न दैन्यं रक्षितं तेन न सैन्यमपि चाक्षतं ।
जटमल्लनृपालेन विदुषां विद्विषामिह ॥ २० ॥

DR.RUPAKNATHJI(DR.RUPAK NATH)

वालचंद्रनृपनंदनस्फुरत्कीर्तिचंद्रजटमल्लकारिते ।
श्रीधरेण कृतिना वितन्यते संग्रहप्रथममाह्निकक्रमः॥२१॥

सदाचारस्य वेदमूलकत्वेनान्वयव्यतिरेकाभ्यां दृष्टादृष्टोभयरूपफलसंपादकतयाभ्यर्हितत्वेन प्रथममाचारो निरूप्यते ॥ तथा च मनुः ॥ श्रुतिस्मृत्युदितं ०

इति पुरीषोत्सर्गविधिः fol. 5*a*; ०शौचविधिः fol. 6*b*; आचमनविधिः fol. 7*b*; दंतधावनविधिः । अथ केशप्रसाधनादिमंगल्यविधिः fol. 9*a*; ----

वालचंद्रकुलकैरवचंद्रक्ष्मोणिपालजटमल्लविलासे ।
श्रीधरस्य कृतिनः कृतिरेषा संततं कृतिमुदे समुदेतु ॥

इति श्रीमहाराजाधिराजश्रीवालचंद्रात्मजमहाठकुरश्री-जटमल्लकारिते जटमल्लविलासे आह्निकप्रकरणे तर्पणविधिः ॥

अथ देवपूजा । ० fol. 24*b*; ०आह्निकप्रकरणे अतिथिपूजा fol. 30*a*; ०भोजनविधिः fol. 36*a*; ०शयनविधिः ॥ इति ० आह्निकप्रकरणं समाप्तं fol. 37*a*.

II. वचनानि विचिन्वता मुनीनां
बहुधा श्रीधरशर्मणा बुधेन ।
जटमल्लनृपालशासनात् क्रियते
कालविनिर्णयो ऽधुना ॥ ०

इहाविधिवाक्यबोधितानां निखिलकर्मणां निष्पन्नये ऽधिकरणतयाङ्गत्वेनोपयोगित्वात्कालो निरूप्यते । तथा हि विधिर्द्वेधा । प्रवर्तको निवर्तकश्च । ०

इति वेधनिरूपणं fol. 41*a*; नक्षत्रव्रतविनिर्णयः fol. 44*a*; इति ० तिथिनिर्णयप्रकरणे प्रतिपदादिजन्माष्टमीपर्वेतिथिविनिर्णयः fol. 55*a*; दुर्गाष्टमीनवम्योर्निर्णयः fol. 57*b*;—एकादशीद्वादशीव्रतनिर्णयप्रकरणं fol. 83*a*; ०शिवरात्रि० fol. 85*a*; होलिका fol. 86*a*; वटसावित्री fol. 86*b*; दीपोत्सव fol. 87*a*; श्रावणी fol. 88*b*; युगादिकालनिर्णयः fol. 94*b*; महालयनिर्णयः fol. 97*b*;—इति० श्राद्धप्रकरणम् fol. 115*a*; ०संक्रमणकालानिर्णयप्रकरणम् fol. 120*a*; ग्रहणकालनिर्णयः fol. 125*a*; अधिकमासनिर्णयः fol. 135*b*; ०मांसतैलादिविहितनिषिद्धकालनिर्णयः fol. 141*b*; इति क्रतुकालोपगमनिर्णयः ॥ ib.

अथ गर्भाधानादि संस्काराणां कालनिर्णयः । ० पुंसवनादिकर्मकालनिर्णयः fol. 142*b*; उपनयन० fol. 144*a*; विवाहादि० fol. 146*a*; अधिवेदन० fol. 147*b*; सूतिकाल० fol. 151*b*; अनध्यायकाल० fol. 157*b*; देवतादिप्रतिष्ठाकाल० fol. 160*a*; अग्न्याधानादिकाल० fol. 161*a*;—संकीर्णकप्रकरणम् fol. 170*b*; इति० तिथिनिर्णयप्रकरणं समाप्तम् fol. 171*a*.

III. On *aśauca*, beg.: शुचिः कर्माणि कुर्वीतेति सकलवैधकर्मसु शुद्धिरधिकारिविशेषणं ०

इति० शुद्धिप्रकरणं fol. 204*b*; तैजसादिद्रव्यशुद्धिः fol. 207*b*; धान्यादिशुद्धिः fol. 210*a*; सिद्धान्नशुद्धिः fol. 211*b*; तोयशुद्धिः fol. 213*b*; भूम्यादिशुद्धिः fol. 215*a*; स्वभावशुद्धिः fol. 217*b*; देहशुद्धिः fol. 219*a*; इति शरीरशुद्धिः । अथ स्नानशुद्धिः । fol. 220*b*.

It concludes with four stanzas in praise of *Kṛishṇa* (स्फुरत्पुरटकंधर०), after which :

वालचंद्रकुलकैरव० ॥ ५ ॥ see above.
संवत्सरे श्रीनृपविक्रमार्के
वानाक्षिनाणक्षितिभाजि(!) तिज्ञाः(l. तिथ्यां) ।
शुक्लैशते कारितपाव(नि)वंशे
वालेंद्रपुत्रं (!) जटमल्लनामा ॥ ६ ॥

इति श्रीमहाराजाधिराजश्रीवालचंद्रात्मजजटमल्लकारितं (!) जटमल्लविलासशुद्धिप्रकरणं संपूर्णम् ॥

जटमल्लविलासः समाप्तः ॥

Among the authorities quoted may be mentioned: *Karaṇatantra*, 158*b*, 161*b*; *Kālanirṇaya*, 155*a* [तथोक्तं कालनिर्णये । काण्डप्रश्नानुवाक्यानां समाप्तौ काल इष्यते । दशाष्टपंचरात्राः स्युस्तत्र्यानां(!) तु त्र्यहं भवेत् । तंत्राणि संहिता ब्राह्मणमारण्यकं च ॥ ?not in the *Kālamādhavīya*]; *Kālādarśakāra*, 104*a*; *Dāmodarīya* (astron.), 144*a*; *Pañcānanasiṃha*, 126*a*; *Pārijāta*, 147*b* [मनुः । चतसस्तु परित्याज्याः शिष्यगा गुरुगा च या । पतिघ्नी च विशेषेण जुंगितोपगता च या ॥ जुंगितो निंदितः ॥ प्रतिलोम इति पारिजातः]; *Prāsādadīpikā*, 26*b* [अथ शिवे वर्ज्यानि ॥ प्रासाददीपिकायां ॥ जयावंधूकसिंदूरं तथा त्रैसंधिके शुभे । दमंतीकेतकीचूर्णीमालतीकुटजानि च ॥ घुमृणं चापमारभ्य प्रमादेनापि मार्पयेत् (!) । वर्वरां सर्जपत्रीं च तथा च कुमुदद्वयं ॥ two *ślokas* more]; *Ratnamālā*, 145*a*, 161*b*; *Vallabha*, 162*b* (*Vallabhācārya*, 38*a*, 163*b*); *Viśvādarśa*, 102*b*; *Vishṇudharmāmṛita*, 124*a*; *Śrīpati*, 135*a*, 145*b*, etc. (*-paṇḍita*, 160*a*); *Shaṭtriṃśanmata*, 40*a*, 47*b*; *Smṛitisaṃgraha* (जातकर्म च पुंसूतिः सीमंतोन्नयनव्रतं । मलिम्लुचे ऽपि कुर्वीत निमित्तं यदि जायते ॥) 126*b*; (श्राद्धे

DR.RUPAK NATH JI

ब्दे वा तृतीये वा विप्रश्चौडं प्रकल्पयेत्। दैवाच्चस्यान्तराये च पंचमे ऽपि न दुष्यति ॥ तृतीये वा पंचमे वा चूडा राज्ञां विशामपि। निगदव्याख्यानमेतत् ॥), 142*b*; *Smṛitisaṃgraha-kāra* (तपनस्य सुता गंगा गौतमी च सरस्वती। रजसा नाभिभूयन्ते वेणा च नदसंज्ञिता इति ॥) 137*b*.

[H. T. COLEBROOKE.]

1594.

1441b. Foll. 119; size 12 in. by 4 in.; carelessly written, in Devanāgarī, in A.D. 1799; eleven lines in a page.

The same work. Copied, very incorrectly, from the preceding MS., with the exception, probably, of the last four (modern) leaves of that copy. The verse containing the date is given thus:

संवत्सरे यौनृपविक्रमाक्रे वाच्चवाणक्षितिभाविच्चिना शुचौ शिते — रिसमाच्चनिवंधे वालेंद्रपुग्नं — टनच्चनामा ॥ ०

[H. T. COLEBROOKE.]

1595.

2772. Foll. 403; 4to; size 12¾ in. by 10 in.; fairly written, in Devanāgarī; 31 lines in a page.

Jayasiṃha-Kalpadruma, a general digest of rules and opinions on religious observances, compiled, under the patronage of *Jayasiṃha* of Mathurā, in A.D. 1715, by *Ratnākara*, son of *Paṇḍita śrī-Deva Bhaṭṭa*, of Benares.

It begins:

करींद्राननं चारुचंद्रावतंसं
सवल्गंडपालीमिलङ्गंगमालं।
अपर्णासुतं विघ्नपूगं हरंतं
गणेशं सुरेशं तमाद्यं प्रपद्ये ॥ १ ॥
श्रीजानकीशं शरणागतैक-
दुःखापहं श्रीगिरिजाधवं च।
स्मृत्वाथ पूज्यौ पितरौ गुरूंश्च
श्रीभ्रातरौ सूर्यसमौ नमामि ॥ २ ॥
आसीद्ब्रह्माद्वितीयं त्रिगुणविरहितं निष्कलं निर्विकारं
यच्चिन्मात्रं तदेव प्रलयजलनिधौ विष्णुरूपं बभूव।
जातस्तन्नाभिपद्माद्विधिरमितमतिस्तात्प्रपौत्रो विवस्वांस्
तस्माद्वैवस्वतो ऽभून्मनुरखिलगुणस्तज्ज इक्ष्वाकुभूपः॥३॥
इक्ष्वाकोस्तु कुले गिरीशमदृशो राजा ककुत्स्थो ह्यभूत्
तन्नोत्रान्ततनुर्दृढः समजनि श्रीधुंधुमारो नृपः।
मांधाता तु तदन्वये समभवत्तस्यान्वये ऽभून्महान्
राजा धर्मैधिवृद्धये किल हरिश्चंद्रः सुरेंद्रोपमः ॥ ४ ॥
पूते हरिश्चंद्रकुले विशिष्टे
गरेण युक्तः सगरो हि जातः।
भगीरथस्तत्कुलजः प्रसिद्धः
श्रीजाह्नवी येन महीमनायि ॥ ५ ॥
खट्वांगः समजनि तत्कुले ऽतिधन्ये
तद्वंश्यो रघुरिति नामतः प्रसिद्धः।
तद्वंशे विधुरवितुं महीं च धर्मं
श्रीरामः क्षपितनिशाचरो बभूव ॥ ६ ॥
तत्पुत्रः कुश इति विश्रुतः पृथिव्यां
तद्वंशे विपुलयशा बृहद्बलो ऽभूत्।
युद्धे यः कुरुकुलनाशके प्रसिद्धे
भिल्लार्कं परमपदं जगाम सद्यः ॥ ७ ॥
तद्वंशे विततते महाभटनुते धर्मैकसेतुर्महान्
पृथ्वीराज इति प्रसिद्धमहिमा मत्सात्वतामग्रणीः।
राजा क्षत्रधुरंधरः समभवद्यस्याभवद्गोचरो
वाचां यो मनसाप्यगोचरतरो विष्णुः कृपावारिधिः॥८॥
तद्वंशे मानसिंहः समभवदतुलः प्रत्यहं दानमत्तान्
ईषादंतान्गजेंद्रानभिनवतुरगान्याचकेभ्यो ऽददाद्यः।
यश्चोर्वीशाननेकानुदधिजलगतान् खंडशः स्वैर्बलौघैः
कृत्वा साम्राज्यलक्ष्मीं समवहदभितो भारतं मत्स्यदेशे
मानसिंहादभूत्तस्माज्जगत्सिंहो महाबलः। [॥ ९ ॥
जगत्सिंहान्महासिंहो जयसिंहस्तु तत्सुतः ॥ १० ॥
येन श्रीजयसिंहेन दिल्लींद्रपदलिप्सवः।
शिवप्रभृतिभूपाला वशं नीताः स्वतेजसा ॥ ११ ॥
तस्याग्यपुत्रः प्रबलः पृथुश्रीः
श्रीरामसिंहो ऽवनिपालपालः।
कौर्मे कुले ऽभूद्विजितारिवर्गः
श्रीरामपादाब्जविलग्नचित्तः ॥ १२ ॥
यः कृत्वा ब्रह्मपुत्राभिधनदपुलिने स्वर्णभूमिविशालां
मुक्तामाणिक्यरम्यां गिरिजलधियुतां चाददाद्वाडवेभ्यः।
दारिद्र्यं याचकानां कथमपि न गतं यत्पुरा कर्णदात्
तत्क्षिप्रं भूरिभूमींद्रविरणवितरणैरर्थ्यतो नास्ति लोके
[॥ १३ ॥

DR.RUPNATHJI(DR.RUPAKNATH)

तत्पुत्रः कृष्णसिंहः प्रथितगुणगणः कृष्णवत्सोत्सवाद्यो
जातः पृथ्व्यां पृथुश्रीररिगणतिमिरध्वंसने भानुरूपः ।
तस्माच्छ्रीविष्णुसिंहः क्षपितरिपुगणः पालकः सज्जनानां
राजा राजीवनेत्रः समजनि मथुरा* पालिता येन
[पूर्वं ॥ १४ ॥

तस्माच्छ्रीविष्णुसिंहाख्याद्राजा राजीवलोचनः ।
जातः श्रीजयसिंहो ऽसौ क्षीराब्धेरिव चंद्रमाः ॥ १५ ॥
[० ३१ ॥

In the verses omitted the author eulogises *Jayasiṃha's* virtues, especially his piety and liberality to Brāhmans.

प्रोद्यच्छ्रीमदसीमराज्यविलसद्धिल्लीन्द्रसेनाचलद्
दृप्यद्योधगणे हुसेनसहितान्(!) म्लेच्छान् क्षयं योऽनयत् ।
स्वं राज्यं परिगृह्य खड्गसचिवो† राजा गृहे संवसन्
सामंतेभ्यतपत्सहस्रकिरणो ग्रैष्मो यथा दुःसहः ॥ ३२ ॥

तेन श्रीजयसिंहेन सर्वशास्त्रार्थसंविदा ।
संप्रार्थितस्तिथेः कृत्यं कुरुतेति सुसंग्रहं ॥ ३३ ॥

रामांघ्रिप्रवणः सुकर्मनिरतः शांडिल्यगोत्रोद्भवः
काशीस्थद्विजदेवभट्टतनयः सम्राट् सुविद्यान्वितः ।
संलब्धेधनसंचयैर्बहुविधैः सर्वान्क्रतूनाचरंस्
तत्प्रीत्यै व्रतकल्पशाखिननमुं निर्माति रत्नाकरः ॥ ३४ ॥

हेमाद्यादीन्समालोक्य ग्रंथान्प्राज्यार्थसंयुतान् ।
तेभ्य एव समादाय पुराणेभ्यस्तथैव च ॥ ३५
किंचित्किंचिद्व्रतव्राते तत्सिद्धै समये ऽपि च ।
संदर्भो रचितो रामतुष्यै च भवतादयं ॥ ३६ ॥

क्षम्यतां साहसं धीरैर्गुणवद्विरमत्सरैः ।
यदर्थ्यं सुष्ठु तद्ग्राह्यं पदसच्छोध्यतेऽधिह ॥ ३७ ॥

बहवो हि बुधाः संति तन्निबंधाः सहस्रशः ।
तथाप्यस्य तु वैदग्ध्यं सुहृद्भिः संविचार्यतां ॥ ३८ ॥

वक्ष्यमाणव्रतेषु कालस्य निमित्तत्वादादौ कालस्वरूपं तन्निर्णयश्चोच्यते । ०

The work is divided into eighteen sections (*stavaka*), on the contents of which see Rāj. Mitra, Notices, IV., p. 276 seq. (another MS., Bikāner Cat., no. 850).

It ends :

श्रीमद्धिल्लीशसेनोद्भटविकटभटोद्दंडमत्तेभसिंहश्
चंडोन्माद्यद्गुरघ्न(रुग्घ्न)क्षुभितवसुमतीपालने धर्मराजः ।
पौत्रः श्रीकृष्णसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः
श्रीमान् राजाधिराजो जयहरिमराधीशवत्को सुखी
[स्तात् ॥ १ ॥

श्रीमत्पंडितदेवभट्टतनयः श्रीराघवांघ्रिद्वय-
ध्यानावाप्तसमस्तकामनिहवः सम्राट् स रत्नाकरः ।
तुष्यै श्रीजयसिंहवर्मनृपतेः कल्पद्रुमे ऽष्टादशं
वारादिव्रतविस्तरं समकरोद्गच्छत्सकामर्द ॥ २ ॥

पश्चक्रे ज्योतिषुर्यौ द्विजवरसहितः सन्मुखं सोत्सवाद्यं
ज्योतिष्टोमं ततो वाजयनृपतियुते वा पुरे वाजपेयं ।
श्रेष्ठं सर्वक्रतूंश्च विविधविधयुतं पौंडरीकं च पद्मं
षट्त्रिंशद्वर्षसाध्यं द्विजवरसहितं द्वादशाहक्रतुं च ॥ ३ ॥

सर्वैतन्मुखमखं क्रतूत्तमं संविधाय युगवैदिकायुतम् ।
देवभट्टजनुषाग्रजन्मना कल्पवृक्षरचना त्वियं कृता ॥ ४ ॥

शाके विक्रमपार्थिवस्य शुभदे व्योमर्धिसप्तेंदुयुग्
वर्षे शोभनसंज्ञके शिवतिथौ मासे नभस्याख्यके ।
कूर्मश्रीजयसिंहदेवनगरे पुण्ये ऽविकेशांचिते
ग्रंथः कल्पतरुः समाप्तिमगमत्सज्ज्ञानवित्तप्रदः ॥ ५ ॥

रत्नाकरेण जयसिंहसमर्चितेन
सद्वाक्यरत्ननिवहैः परिसंगृहीतः ।
ग्रंथो ऽर्थदः सफलकल्पमहीरुहाख्यः
श्रीजानकीशपदपद्मयुगे ऽर्पितो ऽयं ॥ ६ ॥

ग्रंथान् बहून् सुविततान् सुचिरं विभाव्य
कष्टेन पः कविवरैरधिगम्यते ऽर्थैः ।
निर्मत्सरं बुधवराः परितो विचार्य
ग्रंथादुरीकुरुत तं हि विना प्रयासं ॥ ७ ॥

दिवि पंचकल्पतरवः परं श्रुता
जयसिंहवर्मनृपतेः समानते ।
कथमन्यथा सुरगणो ऽविकापुरे
चनितुं यदाध्वरमिषात्समाययौ ॥ ८ ॥

इति श्रीदेवभट्टात्मजपौंडरीकयाजिरत्नाकरविरचिते श्रीजयसिंहकल्पद्रुमे द्योते अष्टादशः स्तवकः ॥ समाप्तश्चायं ग्रंथः ॥ ०

श्रीसंवत् १८१६ मीती आश्वीनबदी ३ तृतीयाकेदीपूस्तक समाप्तं वारसोमवारके दीन संपूरणलिखीतं तिवाडी श्रीरामब्राह्मणदेसवालीगुजरगोडकाशीमध्ये राजमंदके वाशी ॥ श्रीमथुरानाथजीसाहायः ॥ ०

[Coll. of Fort William.]

* मथुरा A.

† Thus A.; च मुसचिवो B.

DR.RUPANATHJI(DR.RUPAKMATH)

1596-1598.

1337, 1026, 1550. Foll. 347, the first of which is wanting; size 11½ in. by 6½ in.; fairly written, in Devanāgarī; twelve lines in a page.

Jayasiṃha-Kalpadruma.

It begins with the concluding words of the 9th introductory couplet (० मत्स्यदेशे) which, however, is counted the 10th in this copy.

Dated: संवत् १६६३ चैत्रमासि शुक्लपक्ष १० शनिवारे.

[H. T. COLEBROOKE.]

1599.

565. Foll. 478; size 12½ in. by 6¼ in.; fairly good Devanāgarī writing of 1802 A.D.; 12–16 lines in a page.

The same work. [H. T. COLEBROOKE.]

1600-1602.

909-911. Foll. 1–248, 249–474, 475–737; size 15½ in. by 5 in.; fair Bengalī handwriting of 1799 A.D.; eight lines in a page.

Rāmaprakāśa, a similar digest, compiled in the name of *Kṛipārāma* (son of *Yādavarāja*), a descendant of the royal family of *Māṇikyacandra*, and himself a feudal lord in the times of *Jehāngīr* and *Shāhjehān* (first half of the 17th century).

Though the work is ascribed to *Kṛipārāma* himself, the fulsome praise bestowed on him, and on his son *Govardhana* (*Pṛithumati*), leaves little doubt that the work was compiled by some protégé of his. Indeed, the real author would seem to be *Rāghavendra*, son of *Kāśīnātha*, and father of *Rāmadeva Ciraṃjīva*, as appears from a statement in the introduction to the latter's *Vidvanmodataraṅginī* (Aufrecht, Cat. Bodl., p. 261*a*)—where a *Mantrārthadīpikā* is also ascribed to the same author—though the work there referred to under the title *Rāmaprakāśa* seems to be rather the commentary on the *Kālanirṇayadīpikā* (see nos. 1664–66), likewise published under *Kṛipārāma's* name.

It begins (with the figures supplied):

प्रणम्य सकलेशानं सकलेशानतुष्टये ।
कालतत्त्वार्णवे रामप्रकाशं सेतुमादधे ॥ १ ॥
महेशानकृपारामकृपारामेण तेन तु ।
संपादनीयो ग्रन्थो ऽयमानन्दयतु सज्जनान् ॥ २ ॥
शौर्यं यस्य महाप्रतापनृपतेर्जागर्ति मूर्ध्नि स्थितं
कीर्तिर्यस्य जनानुरञ्जनकरी विश्वग्दिशो धावति ।
यत्सूनुः समरे द्विषत्क्षितिभुजः शूरान्विहन्ति क्षणाज्
जाता[न्] वीरविमर्दनः पृथुमतिर्नाम्ना च गोवर्धनः ॥ ३ ॥
यद्बुद्धिः सदसद्विवेकनिपुणा प्रागेव जाग्रद्यशो-
जाहाँगीरमहीमहेन्द्रगणिता श्रैष्ठ्येन सद्बुद्धिषु ।
यत्प्रीतीरवगत्य सत्रयगुरुः शुक्रो ऽपि मोहात्क्षणं
क्षुभ्यश्चालितशीर्षमौ(1. र्षे ई)षदसकृन्नीतिं पुनः प्रेक्षते
कर्तव्यानिह कुर्वतो ऽपि विषयान्नाशङ्कमत्रेच्छतो [॥ ४ ॥
यस्यानन्दिहृदः सदैव परमब्रह्मैकनिष्ठं मनः ।
दातुः पण्डितमण्डले विहरतो विद्याविचारेच्छया
दीने यस्य दया श्रुतिस्मृतिगताचारः समुन्मीलति
[(1. स उ०) ॥ ५ ॥
श्रीमद्भूपसमूहवन्दितपदश्रीसाहजाहाँकृपा-
पात्रं यादवरायवंशतनयो माणिक्यचन्द्रान्वयः ।
गौडक्षत्रकुलोद्भवो* भुवि कृपारामाभिधो भूमिपो
ग्रन्थं धर्मैकृतां कृते रचयितुं तस्मिन्मनो यो दधौ ॥ ६ ॥
सन्ति यद्यपि भूयांसो ग्रन्था एवोत्तमोत्तमाः ।
तथापि कंचनास्वादमयमुत्पादयिष्यति ॥ ७ ॥
शास्त्रतत्त्वार्थसंज्ञानाद्धे धीरा गतमत्सराः ।
गुणग्राहितया तेषामत्र दृष्टिर्भविष्यति ॥ ८ ॥
हेमाद्रिर्माधवादीनां गौडानां तत्त्वदर्शिनां ।
संततं समभिज्ञाय ग्रन्थो ऽयं परिनिर्मितः ॥ ९ ॥
तेषां मिथो यत्र विरुद्धमागतं
मतं विचारेण च तत्र यच्छिवं ।
तदर्पितं चात्र मनोविचक्षणैः
क्षणं निवेश्यं सदसत्प्रबुद्धये ॥ १० ॥

अथ शुचि तत्कालजीवो कर्म कुर्यादित्यादिविधौ ०

* गोडक्षत्र० MS., corr. for orig. गोडक्षेत्र; in other places it reads गौडक्षेत्र; but see also nos. 1664–66 (MSS. 885–7).

DR.RUPNATHJI(DR.RUPAK NATH)

The arrangement of the subjects treated of is the usual one, viz. I., generalities as regards times and seasons; II. (from fol. 132*a*), a complete calendar of religious duties; III. (from fol. 621*b*), special rites, here mostly of the *Vaidik* order.

Among the authorities cited may be mentioned: *Kālādarśa*, foll. 227*a*, 369*a*; *Kṛityatattvārṇava*, 229*a*; *Gaṅgāvākyāvalī*, 229*b*; *Gauḍagrantha-jyotisha* (or *-kāra*), 233*a*, 238*b*, 243*a*, 261*b*, 289*b*, 340*a*; *Gauḍatithitattva*, 203*a*; *Gaudanibandha(kāra)*, 103*a*, 387*b*; *Caturviṃśatimata*, 718*a*; *Janmalagna*, 664*a*; *Jyotihsaṃgraha*, 310*a*; *Tithitattva-gauḍagrantha*, 231*a*; *Tīrthacintāmaṇi*, 229*b*; *Dākshiṇātyagrantha*, 231*a*; *Dākshiṇātya-Jyotihsaṃgraha*, 70*b*; *Dīpakālikā*, 339*a*; *Nirṇayāmṛita*, 220*b*; *Purāṇasamuccaya*, 152*b*; *Pratāpamārtaṇḍa*, 202*b*, 232*a*; *Bhojarāja* (quoted from *Gauḍanibandha*), 130*a*; *Bhojarājīyagrantha*, 237*b*; *Madanaratna*, 659*a*, 664*a*, 671*a*; *Rājamārtaṇḍa*, 130*a*; *Viśvarūpanibandha*, 326*b*; *Vishṇurahasya*, 348*b*, 459*b*; *Śāntidīpikā*, 343*a*; *Śivarahasya*, 234*a*; *Saṃvatsarapradīpa*, 645*b*. It ends:

भट्टाचार्यशतावधानकृतिनिर्णयादिशास्त्रार्णवोद्-
वर्ये ह्यैतमते तदेकतरतो निर्णायके सत्यशः ।
आज्ञां तत्र विधाय धर्मविदुषां हर्षाय सम्पादिते
ग्रन्थे ऽस्मिन् विमले प्रयान्तु सुधियो चेतांसि निर्वृतिं ॥

इति गौडश्वेचकुलावतंसयादवरायात्मजमाणिक्यचन्द्रान्वयमहामतिकपरमज्ञानिविराजमानमानोन्नतकीर्तिप्रतापोर्जितश्रीकृपारामविरचितः कालतत्त्वार्णवसंतरणोपायसेतुभूतस्तिथ्यादिकालनिर्णयको रामप्रकाशनामग्रंथः समाप्तः ॥

धराब्धिशैलेन्दुमिते शके रौ(द्राब्दे)
गजारिगे हेलिदिने व्यलेखीत् ।
रामप्रकाशं द्विजजीवनाख्य-
सुतेन दुर्गाचरणं विभाव्य ॥

[H. T. Colebrooke.]

1603.

2316. Foll. 145; size 13 in. by 5 in.; good, modern Devanāgarī writing; from fol. 67 by a different hand; nine lines in a page.

Paraśurāmaprakāśa, a digest of matters relating to *ācāra* and *śrāddha*, by *Khaṇḍerāya*, son of *Nārāyaṇa Paṇḍita*.

The work consists of two chapters (*ullāsa*), only the first of which (on *ācāra*) is contained in this MS. It begins:

निष्प्रोतन्मदगंडमंडलमिलद्भृंगावलीमंजुल-
ध्वानाकर्णनिमीलिताक्षियुगलव्याजान्नजास्य प्रभुः ।
भक्तेभ्यः किमदेयमस्ति परमं वस्तु त्रिलोकीतले
ध्यायन्नंतरतोष संगलचंपदेयार्धदाराग्रणीः ॥ १ ॥

यः क्षीरोदसुधारदच्छदसुधास्वादैकतानः स्फुरत्-
तत्सौंदर्यनिभालनैकरसिकस्तद्भक्तसौख्यवित् ।
श्रोत्रा कर्णितस्य तत्कुचपरीरंभोत्सुकः संगमे
श्रीविष्णुः सकृदिंद्रियैरनुभवन् सवैः सुखं पातु वः ॥२॥

The work was composed at Yamunāpurī, on the river Gomatī, by order of *Paraśurāmamiśra* (*prabhū*), son of *Horilamiśra*, and grandson of *Sūryākara* (of the *Pārāśaragotra*). Of himself the author gives the following genealogy:

Viśvanātha of Varāṇasī, his son
Anantapaṇḍita, his son
Kṛishṇapaṇḍita, his son
Nārāyaṇapaṇḍita, his sons
Nilakaṇṭha and *Khaṇḍerāya*.

Of *Nārāyaṇapaṇḍita* it is said:

स एकदा संमतमानुपूर्वम्
आहूय तं होरिलमिश्रसूनुः ।
निबन्धमेकं कुरु पंडितेति
विपश्चितां संसदि संदिदेश ॥ ३५ ॥

ततः स नारायणपंडितो ऽपि
समादिशद् ग्रंथमिमं विधातुं ।
तं धर्मशास्त्रार्थविचारनिष्ठं
पुत्रं कनिष्ठं हि गुणैर्गरिष्ठं ॥ ३६ ॥

श्रीनारायणपंडितस्य तनयः श्रीनीलकंठानुजः
खंडेराय इति श्रुतिस्मृतिपुराणार्थं समुद्धृत्य च ।
नत्वा देवमभीष्टदं स्वपितरौ विद्वज्जनप्रीतये
संक्षिप्तं कुरुते निबन्धमखिलग्रंथार्थसारास्पदं ॥ ३७ ॥

DR.RUPNATHJI DR.RUPAK NATH

नाम्ना हि परशुरामप्रकाश इति विश्रुतो ग्रंथः ।
प्रकटयतु धर्मतत्त्वं तमसा वृतमर्थतत्त्वविदां ॥ ५१ ॥
निबंधे प्रथमोल्लास आचाराख्यः प्रकीर्त्तितः ।
द्वितीयः श्राद्धसंज्ञः स्यादुल्लासश्च तथा पुनः ॥ ५२ ॥ - -

The MS. ends: इति स्वप्नप्रकरणं ॥ इति परशुरामप्रकाशे निद्रामयूखः ।

इति श्रीशाकद्वीपीयकुलावतंसहोलिलमिश्रात्मजपंडितमंडलीमंडनायमानसार्वभौमलब्धवाणीरसालरायपदवीविराजमानमानोन्नतश्रीमत्परशुराममिश्रकारिते वाराणसीस्थधर्माधिकारिनारायणपंडितात्मजखंडेरायपंडितविरचिते परशुरामप्रकाशे आचारोल्लासः समाप्तः ॥

For another MS. of this work see Weber, Cat. Berl., no. 1025.

[H. T. Colebrooke.]

1604.

1217a. Foll. 132 (foll. 75–82 of which are wanting); size 11½ in. by 4¾ in.; fairly written, in Devanāgarī, about 1650 A.D.; 10 or 11 lines in a page.

Dinakaroddyota, a digest of matters relating to religious observances, compiled by *Dinakara Bhaṭṭa*, son of *Rāmakṛishṇa Bhaṭṭa*, grandson of *Nārāyaṇa Bhaṭṭa*, and great-grandson of *Rāmeśvara Bhaṭṭa*.

This volume contains that section of the work which supplies a regular calendar of religious feasts and fasts (*Varshakṛitya*).

It begins:

संसारचक्रे मुनयो ऽप्यनाप्य
यां मातरं मादुदरे निवासं ।
नेच्छंत्युमां तामभिनम्य मात्रं
न स्यामहं कस्य मनोरथस्य ॥ १ ॥
स रामकृष्णः प्रथितो ऽपि मर्त्ये
यस्मिन्नपरामा (!) इति स्ववाचा ।
समादधे विज्ञजनेषु विज्ञैः
श्रुतिश्रुताणुत्वमहत्त्वसाम्यात् ॥ २ ॥
ब्रूते दिनकरः काले यदत्येन न कल्पितं । [॥ ३ ॥
वचसामाकरानुक्तौ सदोषः (? सदोषः MS.) कालमाधवः
दारेष्विव निबंधेषु जीर्णेषु सुधियां ग्रहः ।
वयसः क्षपणायैव न रसाय कदाचन ॥ ४ ॥
यत्र माधवहेमाद्री युयुधाते महागजौ ।
तत्र मां वरणं लोकस्तदीयमभिधास्यति ॥ ५ ॥
मद्ग्रंथाभिज्ञमासाद्य कालं नेष्यति पंडितः ।
मौनेन वा कथाभिर्वा कर्णकंडूयनेन वा ॥ ६ ॥
गुणग्रहश्चेज्जगतीतले ऽस्मिन्
ग्रंथांतरं द्रक्ष्यति नैव को ऽपि ।
परं तु देवस्य गतिं न जाने
लोका गुणाद्यां गृहिणीं त्यजंति ॥ ७ ॥

अखंडकालस्य निर्णयानर्हत्वात्तदुपाधयो निर्णीयंते । तत्र दिनं चतुर्धा । °

Iti .. parvvāshāprakaraṇam, fol. 13*a*; *grahaṇanirṇaya*, 43*b*; *ravisaṃkrāntinirṇaya*, 47*a*; *caitrakṛityanirūpaṇam*, 52*b*; *vaiśākha*, 56*a*; *jyeshṭha*, 57*a*; *āshāḍha*, 61*a*; *śrāvaṇa*, 70*a*; *bhādrapada*, (lacuna); *āśvina*, 107*a*; *kārttika*, 121*a*; *mārgaśīrsha*, 122*b*; *māgha*, 126*b*; *phālguna*, 131*b*.

It ends: नक्षत्रादियोगो दिनपूर्वार्धगतो ग्राह्य इत्युक्तं प्राक् चैत्रामावास्यामन्वादि ॥ इति श्रीमद्रामेश्वरसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णात्मजदिनकरकृते दिनकरोद्योते वर्षकृत्यं समाप्तं ॥

[H. T. Colebrooke.]

1605.

275. Foll. 72. (numbered originally 94–102, 94–156; and then by a different hand consecutively 137–208); fairly written, in Devanāgarī, by three different hands, c. 1650 A.D.; 8–12 lines in a page.

Another section of the *Dinakaroddyota*, treating of *śrāddha* or obsequies. Probably incomplete at the beginning.

The MS. begins: अथ युग[ध]र्मा:। हेमाद्रौ वासिष्ठः। ध्यानं परं कृतयुगे त्रेतायां लिंगपूजनं । °

Iti ... yugadharmanirṇayaḥ, fol. 9*b*;

श्रीरामकृष्णं पितरमुमावासु(l. नु)मया समां(l. मं) ।
नत्वा दिनकरः श्राद्धकालं ब्रूते यथामति ॥ °

DR.RUPNATHJI(DR.RUPAK NATH JI)

Notwithstanding the different pagination, the text seems to be continuous.

It ends: एवं सत्यत्र शिष्ट एवं(l. शिष्टमेवं) प्रमाणं ॥ इति श्रीमीमांसकभट्टदिनकरकृते दिनकरोद्योते तीर्थोस्थिप्रक्षेपविधिः॥

प्राचीनमार्गपरिपंथिगिरापरार्धं
संभाव्यमानखिलेष्वपि पंडितेषु ।
मूर्ध्ना क्षमाय करयुग्मयुतेन सर्वं
ग्रंथं व्यधाद् दिनकरः सकलागमज्ञः ॥

इति श्रीमद्रामेश्वरभट्टसूरिसूनुश्रीमन्नारायणभट्टसुतरामकृष्णभट्टात्मजभट्टदिनकरकृते दिनकरोद्योते विधानानि ॥ समाप्तो दिनकरोद्योतः ॥

Then follows what is evidently the beginning of a supplement to the work, treating of *aśauca*, by the author's son, viz. (cf. next MS.):

मीमांसैकधुरंधरः श्रुतिधरो न्याये ऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनाशौचनिबंधनो दिनकरोद्योतो ऽधुना पूर्यते ॥ १ ॥

श्रीमद्गुरुचरणानां प्रसादतो [–] मुदे सुविज्ञानां ।
श्रीमद्दिन(l. वा)करसूनुराशौचे किंचिदातनुते ॥

विश्वेश्वरापराख्यस्य गागाभट्टमनीषि[णः] । here the MS. terminates at the bottom of fol. 208*b* (72*b*).

The author's son *Gāgābhaṭṭa* is also quoted in the body of the work, foll. 39*a*, 53*a*, 179*b*, and his work *Viśveśvarī paddhati*, fol. 204*a*. Of other works quoted may be mentioned: *Nirṇayāmṛita*, foll. 67*a*, *b*, 98*b*, 100*b*; *Purāṇasamuccaya*, 88*b*; *Pṛithvīcandrodaya*, 63*b*, 84*b*; *Madanaratna*, 27*b*, 28*a*, etc.; *Rudrayāmala*, 95*b*, 104*b*; *Vishṇurahasya*, 71*a*, 73*b*, 108*b*, 124*a*.

The author's younger brother, *Kamalākara*, wrote his *Nirṇayasindhu* in 1611–12 A.D.

[H. T. Colebrooke.]

1606.

1335. Foll. 234 (originally numbered 1–272 on the right hand margin, of which are, however, missing 47–49, 136–143, 148–151, 197, 198, 209, 220–229, 232, 233, 235, 236, 238–241, 252–256, while three leaves have been inserted between 97 and 98); size 11½ in. by 5 in.; fairly good Devanāgarī writing of 1652 A.D.(?); twelve lines in a page.

Vrata-Dinakaroddyota, a digest of matters relating to voluntary fasts and penances, intended as a supplement to (or *Vratakāṇḍa* of) *Dinakara's* work, by his son *Viśveśvara Bhaṭṭa*, surnamed *Gāgābhaṭṭa*. It begins:

नीलोत्पलाभिरामं कामं साकेतबालानां ।
दशरथतोषनिधानं जगन्निदानं तदाकलये ॥ १ ॥

मीमांसैकधुरंधरः श्रुतिधरो न्याये ऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनायं व्रतगोचरो दिनकरोद्योतो ऽधुना पूर्यते ॥ २ ॥

तत्र व्रतप्रशंसा हेमाद्रौ ०

The work consists of two parts, the first of which, ending fol. 199*a*, deals with the *vratas* performed at certain fixed times in the course of the year (*dvādaśamāsavratāni*), whilst the second part treats of miscellaneous other voluntary penances (*prakīrṇakavratāni*).

From fol. 95 a different hand has re-numbered the leaves 103 etc.

At the end of the first part the date of the MS., Saṃvat 1709, occurs.

It ends: इति पराशरोक्तो जलवासविधिः ॥ इति श्रीमन्मीमांसकभट्टनारायणसूनुभट्टरामकृष्णसुतभट्टदिनकरसूनुगागाभट्टापरनामकभट्टविश्वेश्वरपूरितो व्रतदिनकरोद्योतः समाप्तः ॥

For another copy of the same work see Rāj. Mitra, Bikāner Cat., no. 831; for other supplements to the *Dinakaroddyota*, by the same author, viz. *Śūdradharmoddyota*, below, no. 1652; *Pūrtakāṇḍa*, Bikāner Cat., no. 829; *Vyavahārakāṇḍa*, ib., no. 830.

[H. T. Colebrooke.]

1607.

181b. Foll. 21; sizo 10½ in. by 4 in.; legibly written, in Devanāgarī; ten lines in a page.

DR. RUPNATHJI (DR. RUPAK NATH)

Some portions of the *Vijayavilāsa*, by *Rāmakṛishṇa*.

Tho MS. begins:

नत्वा श्रीपार्वतीपुत्रं सिद्धिबुद्धियुतं गुरुं ।
स्नानसंध्याविधिं कुर्वे कर्काचार्योदितं मतं ॥ १ ॥
आलोच्य धर्मशास्त्राणि मन्वादिभिः कृतानि च ।
कात्यायनकृतं सूत्रं कर्कभाष्यं तथैव च ॥ २ ॥
भाष्यं हारिहरं चैव गदाधरकृतं तथा ।
सारमेव समुद्धृत्य स्मृतीनां वचनं तथा ।
सिद्धांतानि समूलानि विचार्य लिख्यते मया ॥ ४ ॥
स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते ।
किं तु वाचनिकं सर्वमतो ग्राह्यं च सज्जनैः ॥ ५ ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वेषां निर्णयमप्यसंशयात् ॥ ६ ॥

योगीश्वरः ॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत । ०

The passage on the division of the Vaidic *śākhās* referred to by Colebrooke, Misc. E., I., p. 14 (2nd ed., p. 13), foot-note, begins fol. 2*a*:

द्वापरादौ वेदव्यासेन चतुर्भ्यः स्वशिष्येभ्य उपदिष्टास् एव मुख्या वेदाः । तैर्व्यासशिष्यैर्विभज्य स्वशिष्येभ्यो दत्ताः शाखा इति ॥ भागवते ।

अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं । ० (XII. 6, 49)

इति ० शौचविधिः ॥ अथ स्नानविधिः । fol. 5*a*. The greater part of fol. 8 is left blank. अथ प्रातःसंध्याप्रयोगः fol. 13*b*; इति प्रातःसंध्या समाप्ता fol. 15*b*.

The MS. ends: इति श्रीरामकृष्णविरचिते विजयविलासे ब्रह्मयज्ञतर्पणविधिः ॥

[H. T. Colebrooke.]

1608.

78. Foll. 102 (numbered 105, foll. 39–42 being missing, and no. 51 double); size 9¾ in. by 3¾ in.; good Devanāgarī writing of about 1650 A.D. (the last leaf by a modern hand); nine, from fol. 61 ten, lines in a page.

Mādhavaprakāśa, or *Sadācāracandrodaya* (or *Ācāracandrodaya*), a digest of rules regarding religious observances, according to the *Vājasaneyins*, compiled by *Maheśa Śarman*, son of *Śārasvatadurga Śarman*, and pupil of (*Viṭṭhala*) *Purushottama Kavivara* of Mithilā; under the patronage of *Mādhava*, a territorial chief at Lāvapura, on the banks of tho Irāvatī in Western India. Incomplete.

It begins:

गोपीवल्लभवल्लभं गुरुतमं श्रीविट्ठलं विट्ठलं
वंदे ऽहं पुरुषोत्तमं कविवरं विद्यागुरुं मैथिलं ।
यत्पादांबुजसेवया न नितरां श्रीकृष्णसेवारतिर्
मैत्रीसत्सु सदा सभासु विदुषां विद्याविलासोदयः॥१॥

विश्वं यत्कुरुते बिभर्ति हरते शैलूषवत्प्रत्यहं
यच्छासन्नवा नुवंति निगमाः सांगाः समूत्रागमाः ।
संसाराब्धितारणाय जगतां यन्नाम नौका दृढा
तद्वंदे सहजप्रकाशममलं चैतन्यरूपं महः ॥ २ ॥

ज्ञात्वा गोकुलमर्दितं मघवता विस्मापयन् भूधरं
धृत्वा वामकरे करीव कमलं यो ऽपादपायाद् व्रजं ।
गुंजाहारमयूरमौलिमुरलीपीतांबरालंकृतो
गोपीलोचनचुंबितो जयते गोपालचूडामणिः ॥ ३ ॥

अस्तीरावतिरोधसोह नगरं विद्वज्जनालंकृतं
धर्मश्रीसदनं विटंकविलसत्प्रासादमालांचितं ।
स्मृत्याम्नायविधाननित्यनिरतैर्वर्णाश्रमैः सेवितं
नाम्ना लावपुरं पुरंदरपुरीगर्वापहं पश्चिमे ॥ ४ ॥

सेवा यत्र गुरौ हरौ च नितरां धर्मेषु कार्पण्यधीस्
तर्के वादमतिर्गजेषु मदः सारीषु मारोक्तयः ।
बंधो वेणिषु मानितापणपथे स्नेहक्षयो दीपके
द्वारे देवगृहस्य दंडघटना संदृश्यते नान्यतः ॥ ५ ॥

तस्मिन् राजसभासु लब्धविभवः कालू[:]कवीनां प्रियो
ह्यासीदुप्प(?त्य)लवंशपंकजरवी राजन्यचूडामणिः ।
येनादायि हिरण्यमन्नमचला गावः सवत्सा हरेः
प्रीत्यै विप्रवरेषु बंधुजनतावर्गेषु मानद्वेयः ॥ ६ ॥

तत्पुत्रो ऽजनि बंधुवर्गनिरतो धर्मैकचित्तो ऽनिशं
ब्रह्मण्यो गुरुदेवपूजनरतो नान्नू नरेंद्राग्रणीः ।
येनेदं कुलकैरवं विधुरुचा नित्यं विकाशीकृतं
धर्माचारयशः प्रतापविभवैर्वैर्वैरिं सर्वोपरि ॥ ७ ॥

जातास्तज्जनयास्त्रयः सविनया गोपीशपादाश्रया
ज्येष्ठस्तत्र परोपकारकुशला (l. लः) ख्यातः स धीरो
वापीकूपतडागदेवभवनारामादिनिर्माणकृद् [ति यः ।
दाता बंधुजनाश्रयो नृपसभालब्धैकपूजोदयः ॥ ८ ॥

DR.RUPNATH JI (DR.RUPAK NATH JI)

तस्यानुप्रभवो बलैकविभवो दाता सदा धर्मधीर्
लोके यो भगवान इत्यभिहितो यस्यानुजो माधवः ।
रूपेणानुजगाम यो रतिपतिं भोगैः मुराणां पतिं ।
भक्त्या दैत्यपतिं नये भृगुपतिं शीले कुरूणां पतिं ॥९॥

तद्धर्मपत्नी समसूत रंगोनारायणानंतजनार्दनादीन् ।
सुतां(?l.तान्) सुराणां(?l.भान्) गुरुदेवभक्तां(?l.क्तान्)
[यशेशभक्तिर्विहिताखिलार्थान् ॥ १० ॥

तेनाचारमभीप्सता सविनयं विज्ञापितो धीमता
श्रीसारस्वतदुर्गशर्मतनयो नाम्ना महेशः कृती ।
ग्रंथे यत्र हि माधवादिरभवत्सार्थैः प्रकाशांतकः
शब्दस्तं कुरुते हिताय जगतामाचारचंद्रोदयं ॥ ११ ॥

अथास्यानुक्रमणिका समासेनैव कथ्यते । ° here follows an analysis of the eight chapters of which the work consists. The MS., however, breaks off abruptly in the 4th *pariccheda*, at the bottom of fol. 104*b*. An additional page, by a modern hand, has supplied some sort of conclusion with the colophon:

इति श्रीमहोपाध्यायश्रीसारस्वतदुर्गशर्मतनयमहेश्वरविरचिते आचारचंद्रोदयनामको ग्रंथः संपूर्णः ॥

The colophon of the other chapters runs thus: इति श्रीमाधवप्रकाशे महेशकविदर्शिते सदाचारचंद्रोदये ° परिच्छेदः ॥

Of rarer and comparativcly recent authorities have been noticed: *Ācāracintāmaṇi*, fol. 79*a*; *Karmapradīpa*, fol. 15*a*; *Kalpataruśākara*, fol. 12*a*; *Dharaṇikosha*, fol. 104*b*; *Smṛtisāra*, foll. 45*a*, 103*b*.

For a completo MS. of the work see Rāj. Mitra, Notices, V., p. 97.

[H. T. Colebrooke.]

1609.

1251a. Foll. 71; size 9 in. by 4 in.; fairly written, in Devanāgarī; ten, sometimes nine, lines in a page.

Ācārapradīpa, or *Ācāradīpa*, a manual of common every-day religious observances, by *Nāgadeva*.

It begins:

चंचन्नासपुटस्फुटाभिनयनव्यग्राग्रपादाहति-
क्षुभ्यन्नूपुरमंजुलध्वनिमिलत्क्षाणात् स्खलत्कंकणं ।
शुंडादंडविघट्टितोडुकुसुमैर्व्योमांगणं मंडयन्
संध्यातांडवडंबरं विरचयन् भूत्यै गणेशोऽस्तु वः ॥ १ ॥

उक्तो वाजसनेयेन याज्ञवल्क्येन धीमता ।
आचारो द्विजवर्याणां सुबोधः कथ्यते ऽधुना ॥ २ ॥

तत्र दक्षः । प्रातरुत्थाय कर्तव्यं यद्द्विजेन दिने दिने ।
तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकं ॥ ३ ॥ °

इति ° आचारप्रशंसा fol. 2*a*; ° आत्मचिंतनं fol. 2*b*; ° सुप्रभातविधिः fol. 3*a*; ° मूत्रपुरीषोत्सर्गविधिः fol. 3*b*; शौचविधिः fol. 5*a*; आचमनविधिः fol. 6*b*; दंतधावनविधिः fol. 7*b*; यज्ञोपवीतविधिः fol. 8*a*; प्रणवविधिः, शिखाबंधन ° fol. 10*a*; प्राणायाम ° fol. 11*a*; ° स्नानविवरणं fol. 13*b*; मालापकर्षणं fol. 20*a*; तिलकप्रकरणं fol. 22*a*; प्रातःसंध्याविधिः fol. 33*a*; अभिवादनविधिः fol. 34*a*; प्रातर्होमविधिः fol. 35*a*; नित्यदान ° fol. 36*b*; मंगलाचरण ° fol. 37*a*; अध्ययनविधिः fol. 39*b*; प्रतिग्रहाधिकारनिरूपणं fol. 41*a*; मध्याह्नस्नानविधिः fol. 45*a*; ब्रह्मयज्ञविधिः fol. 46*b*; स्थलतर्पणं fol. 48*b*; जलदेवतार्चन ° fol. 51*b*; गृहदेवतार्चन fol. 52*b*; पंचमहायज्ञविधिः fol. 58*b*; भोजनविधिः fol. 63*b*; सायंसंध्याविधिः fol. 64*a*; उपशयनविधिः fol. 65*a*; स्त्रीगमनविधिः fol. 65*b*; योगप्रकरणं fol. 67*a*; स्पृष्टास्पृष्टविधिः fol. 68*b*.

Colophon: इति द्रव्यशुद्धिप्रकरणं ॥ इति श्रीउपाध्यायनागदेवविरचिते आचारप्रदीपे अष्टमो ऽध्यायः ॥ आचारप्रदीपः समाप्तः ॥ संवत् १८३५ ॥

[H. T. Colebrooke.]

1610.

2324c. Foll. 81; size 11 in. by 5 in.; clearly written, in Devanāgarī, in the latter part of the last century; nine lines in a page.

The same work, called *Ācāradīpa* in the colophon, but *Ācārapradīpa* at the end of some sections. Not quite complete at the end.

It begins: उक्तो वाजसनेयेन याज्ञवल्क्येन धीमता °

Colophon: इति श्रीभट्टनागदेवविरचिते आचारदीपे स्त्र्यभिगमनविधिः ॥

The leaves are marked आहि

DR RUPNATHJI (DR RUPAK NATH)

For another MS. of this treatise (*Ācāradīpa*), beginning and ending as the present MS., see Rāj. Mitra, Notices, I., p. 73. For an *Ācāra-pradīpa*, by *Keśava Bhaṭṭa*, ib., VIII., p. 206. [Gaikawar.]

1611.

1278c. Foll. 17; size 13 in. by 5 in.; indifferent Bengalī handwriting, of the beginning of the present century; nine lines in a page.

Ācāramañjarī, a manual of rules of conduct and daily observances, compiled by *Mathurānātha(deva)*.

It begins:

प्रणम्य परमात्मानं सदसत्कर्मकारणं ।
शिशोः प्रथमशिक्षायै नित्याचारो निरूप्यते ॥

तत्रः मनुः । आचाराल्लभते विद्यां °

It ends:

न म्लेच्छभाषां शिक्षेत जीवेति ध्रुवतो वदेत् ।
इत्यमाह्निकं समाप्य नाद्रैपादस्तु संविशेत् ॥

इति मनुवचनात् शुष्कपाद एव शयीतेति ॥

स्मृतिनीरधिमूलतो मया मथुरानाथमहीसुपर्णेण ।
अनवज्ञविवृद्धये नवा रचिताचारमनोमञ्जरी ॥

इत्याचारमञ्जरी संपूर्णा ॥

[H. T. Colebrooke.]

1612.

521. Foll. 200; size 9½ in. by 4 in.; on the whole fairly written, in Devanāgarī, about the middle of the 17th century; eight lines in a page; foll. 145–173 (numbered 172–200) by a different, and the last three pages by a third, hand.

Ācārasāra, a compendium of every-day religious observances, by *Lakshmaṇa*, son of *Rāmakṛishṇa Bhaṭṭa* and *Umā*, grandson of *Nārāyaṇa Bhaṭṭa*, and younger brother of *Dinakara* and *Kamalākara*.

It begins:

सिंदूरारुणगंडं देवं विघ्नौघतिमिरमार्तंडं ।
नतिनभुंडादंडं सिद्धीशं गणपतिं वंदे ॥ १ ॥

सतिमिरजगदुद्द्योतद्युमणेर्वंशांकुरा(l. रं) श्रीमत् ।
तज्जयति रामनाम(!) रजनिचराणां विभेदनं धाम ॥ २ ॥

नारायणं राजभिरर्चितांघ्रिं
नमामि हंसोव यदीयकीर्तिः ।
तेजांतराल्लन्महसां विभेदं
स्वस्यापि कीर्त्यैतरतस्तमाह ॥ ३ ॥

विद्याप्रद्योतनोद्योतखद्योतीकृतवादितं ।
पितरं रामकृष्णाख्यं वंदे स्नेहभरान्वितं ॥ ४ ॥

स्पर्धामग्नोनिवेशादुमया प्राप्तामुमासमाख्यातः ।
द्युनदीनिर्मलचित्तां मातरमेकां सतीं सदा वंदे ॥ ५ ॥

येनेदृता स्वस्य कुलप्रतिष्ठा
महावराहेण महीव तोयात् ।
गंगेव विद्याभिससार यस्माद्
दिवाकरं नौमि तमग्रजाग्र्यं ॥ ६ ॥

अधीत्य लक्ष्मणाख्येन कमलाकरसोदरात् ।
आचारसारः सुधिया यथामति वितन्यते ॥ ७ ॥

तत्र परिभाषा । छंदोगपरिशिष्टे । °

इति ° परिभाषा । अथाह्निकं । fol. 9*a*; इति ° प्रातःस्मरणं fol. 12*b*; ° मूत्रपुरीषोत्सर्गविधिः fol. 18*a*; ° शौचविधिः fol. 23*a*; ° आचमनं fol. 35*a*; दंतधावनं fol. 39*a*; कुशप्रकरणं fol. 45*a*; प्रातःस्नानं fol. 57*a*; स्नानोत्तरकृत्यं fol. 61*b*; तिलकप्रकरणं fol. 68*a*; संध्याप्रकरणं fol. 94*a*; होमप्रकरणं fol. 101*b*; मध्याह्नस्नानं fol. 113*b*; माध्याह्निकनिरूपणं fol. 131*b*; पंचयज्ञप्रकरणं । अथ भोजनविधिः fol. 192*a*.

Colophon: इति श्रीनारायणभट्टात्मजरामकृष्णभट्टसुतलक्ष्मणभट्टकृत आचारसारनामको ग्रंथः समाप्तः ॥

Regarding the great *Bhaṭṭa* family, to which the author belongs, see V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxxvi. *Lakshmaṇa's* elder brother *Kamalākara* wrote his *Nirṇayasindhu* in 1611-12 A.D. [H. T. Colebrooke.]

1613.

1703B. Foll. 60; size 9½ in. by 3¾ in.; fairly good, Devanāgarī writing; 9–13 lines

DR.RUPAK NATHJI(DR.RUPAK NATH)

in a page. The first twelve leaves are more or less damaged, and part of foll. 1–3 has been torn off, or eaten away.

Ācārādarśa, a manual of daily religious duties, by *Śrīdatta*.

The first few lines of fol. 1 being partly wanting, the opening verses are here given from the other MSS.:

दीक्षितो रणयज्ञेषु विबुधानंददायिषु ।
हरिरग्निसुतावक्त्रसोमपीतो पुनातु नः ॥ १ ॥
अहोरात्राश्रितो धर्म इह वाजसनेयिनां ।
निबध्यते निबद्धो यो धर्मशास्त्रनिबंद्धृभिः ॥ २ ॥

अत्र मनुः । ब्राह्मे मुहूर्ते बुध्येत ° and a few lines further on: अथ मूत्रपुरीषोत्सर्गविधिः ;—अथाचमनानुकल्पविधिः fol. 11*b*; अथ दंतधावनं fol. 13*b*; अथ प्रातःस्नानादि fol. 15*a*; अथ स्नानविधिः fol. 17*b*; अथ संध्योपासनं fol. 28*a*; अथ ब्रह्मयज्ञः fol. 36*a*; अथ तर्पणं fol. 36*b*; अथ देवपूजनं fol. 44*a*; अथ नित्यश्राद्धं fol. 50*a*; अथ शयनविधिः fol. 58*a*.

It ends:

समूलवचनाभोगो मीमांसान्यायनिर्मलः ।
श्रीदत्तेन सतामेष आचारे दर्पणः कृतः ॥
दुरुक्तमपि सूक्तं मे मन्वादिवचनाश्रितं ।
अपि चर्मोदकं तोयैर्मलिनांतर्गतं शुचि ॥

इत्युपाध्यायश्रीदत्तकृत आचारादर्शः समाप्तः । संवत् १८५५ भाद्रपदमासे कृष्णपक्षे चतुर्दश्यां गुरुयुक्तायां द्वादश्यां लिखितं विप्रेण विद्याधरधीमता हरिपुरग्रामवासिना त्रिमुरारिराजनगरे कृपया भवानीविश्वनाथयोः ॥ °

Besides *Purāṇas*, *Smṛitikāras* and the *Mahābhārata*, the author quotes *Kalpatarukāra*, fol. 25*a*; *Kāmadhenu*, foll. 15*b*, 32*a*; *Gṛihyapariśishṭa* (fol. 34*a*); *Chandogapariśishṭa* (often); and *Harihara* (foll. 19*a*, 23*b*, 33*a*).

See Bhandarkar, Rep. for 1883-4, p. 47, where a commentary on the work, written by *Gaurīpati*, son of *Dāmodara*, in 1640 A.D., is mentioned. Another commentary, *Ācāradīpikā*, by *Harilāla*, Rāj. Mitra, Notices, V., p. 233; a MS. of the text, ib. p. 279.

[H. T. COLEBROOKE.]

1614.

2689. Foll. 65; size 9½ in. by 4 in.; indifferent Devanāgarī writing of 1799 A.D.; ten lines in a page.

The same treatise. [MACK. COLL.]

1615.

2177A. Foll. 52; size 10¾ in. by 4½ in.; legibly written, in Devanāgarī, about the middle of last century; ten lines in a page.

Śrīdatta's Ācārādarśa. [GAIKAWAR.]

1616.

2159. Foll. 75; size 11 in. by 5 in.; well written, in Devanāgarī, towards the end of last century; nine lines in a page.

Ācārārka, another manual of daily religious observances, composed, in Saṃvat 1743 (A.D. 1686), by *Divākara*, son of (*Bhāradvāja*) *Mahādeva*, and grandson of *Bālakṛishṇa*. It forms part of the author's *Dharmaśāstrasudhānidhi*.

As will be seen from the concluding verses, the author was, on his mother's side, a grandson of *Nīlakaṇṭha Bhaṭṭa* (author of the *Mayūkhas*). The treatise begins:

ज्ञानकोनयनयुग्मगोचरं मानिनां नयनयोरगोचरं ।
नीलमेघरुचिरच्छविं सदा भावये मनसि राघवं मुदा॥१॥
उच्चैरपर्णामुखचंद्रबिंबं परामृशंतं निजपाणिपल्लवं ।
गंगाधरं नौमि भुजंगराहुप्रकृष्टभीत्या चकितं मुहुर्मुहुः॥२॥
महादेवतनूजन्मा भारद्वाजकुलोद्भवः ।
दिवाकरो रविं नत्वा ह्याचाराकें तनोत्यसौ ॥ ३ ॥

तत्रादावौपोद्घातप्रकरणमारभ्यते । हारीतः । अज्ञानतमसावानां भ्रामितानां कुदृष्टिभिः । °

इति ° उपोद्घातप्रकरणं fol. 5*a*; इति शौचप्रकरणं fol. 12*a*; °आचमनप्रकरणं fol. 14*b*; दंतधावनप्रकरणं fol. 17*a*; स्नानप्रकरणं fol. 24*b*; संध्याविधिः etc.; इति पंच महायज्ञाः fol. 62*b*.

It ends: इति श्रीभारद्वाजमहादेवभट्टात्मजदिवाकरकृते आचाराकें ऽष्टमभागकृत्यं समाप्तिमफाणीदसावाचाराकें: ॥

DR RUPNATHJI (DR RUPAK NATH)

यत्पादपंकजपरागपवित्रदेहा
हित्वा कलेवरमिदं किल पार्षदंशाः ।
जग्राह गौतमवधूः कमनीयरूपं
तं जानकीपतिमजं मनसा स्मरामि ॥ १ ॥
यद्वाक्याद्विधिवाक्यार्थमपूर्वार्थाभिधातृता ।
नीलकंठो जयत्येष मीमांसकधुरंधरः ॥ २ ॥
श्रीबालकृष्णात्मजमनुनिर्मितं
वर्षे ऽग्निवेदाश्वहिमांशुसंयुते ।
जानाः प्रकुर्युः किल धर्मकार्यम्
आचारमूर्यं किल संविलोक्य ॥ १ ॥
प्रभवे चाश्विने शुक्ले पौर्णमास्यां कुजे दिवा ।
सोमेश्वरेण लिखितमाचाराकैस्य पुस्तकं (वर्याः) ॥ ६(!) ॥

इति गर्भिणीभोजननिषेधवाक्यानि ॥ पित्र्योः प्रत्याब्दिके प्राप्ते तर्पणं तु कथं भवेत् । जलेनैव प्रकर्तव्यं निवृत्ते पितृकर्मणि ॥ १ ॥ श्राद्धं कृत्वा तु विधिवद्वैश्वदेवादिकं ततः । ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु तिलैर्विना ॥ २ ॥ स्मृत्यंतरे ॥ इति आचाराकैः समाप्तः ॥

For the same author's *Dānahīrāvalīprakāśa*, see no. 1708. [GAIKAWAR.]

1617.

2042a. Foll. 59; size 11 in. by 5 in.; Devanāgarī character; by the same hand as the preceding MS.; ten lines in a page.

Another copy of the same treatise, apparently transcribed from the same MS. as the preceding one, and ending in the same manner. [GAIKAWAR.]

1618.

2324a. Foll. 70; size 11 in. by 5 in.; well written, in Devanāgarī, in the latter part of last century; nine lines in a page.

A third MS. of the *Ācārārka*, probably derived from the same original as the other two.

For another MS. of this treatise, incomplete at the beginning, and apparently without the final verse containing the date of the work, see Rāj. Mitra, Notices, I., p. 15. [GAIKAWAR.]

1619.

200. Foll. 146; size 11 in. by 4½ in.; legibly written, in Devanāgarī, by three different hands, in 1805 A.D.; 11 or 12 lines in a page.

Ācārenduśekhara, a similar manual of religious duties, by *Nāgojībhaṭṭa*, son of *Śivabhaṭṭa* and *Satī*. Incorrect.

It begins: अथ धर्मशास्त्रप्रवर्तका उच्यंते । याज्ञवल्क्यः । मन्वत्रिविष्णुहारीत ० धर्मशास्त्रप्रवर्तकाः (*Y.I.*, 4. 5) ॥ अत्रोशनः शब्दांतरो वृद्धैकवाक्यात्वेनेदं परिगणनं किंतु प्रदर्शनमात्रं । देवलः । मनुर्यमो वासिष्ठो ऽत्रिर्दक्षो विष्णुस्तथांगिराः । ०

Fol. 4*a*: अथाह्निकं ।

उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् ।
तिष्ठन्नैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः ॥
इति दक्षेण क्षणिकत्वं निषिद्धं । ०

It ends: इति शयनविधिः ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते आचारेन्दुशेखरः समाप्तिमगमत् ॥

[H. T. COLEBROOKE.]

1620.

1251b. Foll. 44; size 9 in. by 4 in.; fair Bengalī handwriting, of the earlier part of last century; eight lines in a page.

Āhnikapaddhati, a manual of daily ceremonial observances, with chapters on obsequial rites. Perhaps a section from some larger work, or intended as a practical manual to *Raghunandana's Āhnika-* and *Śrāddha-tattva*.

It begins: अथाह्निककृत्यं ॥ प्रमाणं आह्निकतत्वे ऽनुसंधेयं । तत्र प्रयोगः । ब्राह्मे मुहूर्ते उत्थाय ०

अथाचमनविधिः fol. 2*a*; अथ पद्मपुराणोयस्नानप्रयोगः fol. 3*b*; अथ पुराणोयतर्पणप्रयोगः fol. 4*b*; अथ वलिकर्म fol. 7*a*; अथ गोग्रासः fol. 8*b*; अथ रात्रिकृत्यं fol. 9*b*; अथ शयनविधिः fol. 10*a*; अथ दारोपगमनं fol. 10*b*; अथ शौचान्तद्वितीयदिनश्राद्धप्रयोगः fol. 11*a*; अथ सपिण्डीकरणं fol. 15*b*, etc.; अथान्त्येष्टिपद्धतिः fol. 40*a*.

It ends: इत्यन्त्येष्टिपद्धतिः ॥

[H. T. COLEBROOKE.]

DR.RUPNATHJI(DR.RUPAK NATH)

1621.

1274b (& 1492b). Foll. 129; size 13 in. by 4¾ in.; fairly good Bengalī handwriting, of 1806 A.D.; seven lines in a page.

Kṛityacintāmaṇi, a treatise on religious observances, compiled under directions of *Caṇḍeśvara* (son of *Vireśvara*, and grandson of *Devāditya*), minister of *Harasiṃha Deva*, King of Mithilā. It begins:

विघ्नेषां हितहेतवे यदपिबत्तत् कालकूटं पुरा
तज्ज्वालोपशमाय मूर्धनि धृते गाढ़े ऽपि वारां भवे ।
उत्तंसोपकृते तुषारकिरणे तन्मान्तरः पातु वः
शर्वाणीमुखपङ्कजाधरसुधापानेन सुस्थो हरः ॥ १ ॥

आसीन्मैथिलतीरभुक्तिविषये मन्त्रप्रभावादृतः
प्रत्यर्थिक्षितिनायकान्धतमसः शत्रुद्विजानां प्रियः ।
नित्योद्भासितमण्डलः सुमनसामर्घश्च पद्माशयो
देवादित्य इति त्रिलोकमहितो मन्त्रीन्द्रचूडामणिः ॥ २ ॥

श्रेष्ठो ऽसौ राज्यलक्ष्म्याः सचिवकुलगुरुश्चेतसा विश्वसाक्षी
क्षीणानाधानुकम्पापरवशहृदयो जङ्गमः पारिजातः ।
तृप्यत्सेनापतीनामपथगतिमतां बुद्धिसिन्धोरगस्त्यो
ऽक्षीवध्वान्तभानुर्निखिलनिजगुणैस्तोषयामास विश्वं ॥ ३ ॥

अस्मादभूद्भुसुमतीतलकल्पवृक्षः
प्रख्यातकीर्तिनिचयः सचिवावतंसः ।
वीरेश्वरो विविधदानकृतार्थितार्थि-
सानुः सपाथ इव निर्जितवैरिवीरः ॥ ४ ॥

धैर्याचर्यविचक्षणः कृतधियामाश्वासविश्रामभूर्
भूमीन्द्रान्यसुवैरिवारणविधावद्वैतदीक्षागुरुः ।
दाता दक्षिणमानसः प्रतिदिशं विख्यातकीर्तिः सदा
शत्रोरप्युपकारकः क्षितितले कारुण्यरत्नाकरः ॥ ५ ॥

अस्मादसावहिमरश्मिरिवोदयाद्रेर्
अम्भोजिनीपरिवृढादुदितादिवांशुः ।
अंशोः प्रकाश इव विश्वहिते प्रसूतश्
चण्डेश्वरो विजयते महनीयकीर्तिः ॥ ६ ॥

अस्मिन्मन्त्रिणि मैथिलेश्वरभुजस्तम्भप्रतापानल-
ज्वालोद्दीपनमारुते प्रतिपदं के कल्पिता न द्विषः ।
दुष्टानां फलिनामिवावनिभृतां वीर्योदयध्वंसिनी
दत्ता येन शिरःसजादिनिपतत्खाङ्गेव सिद्धौषधिः ॥ ७ ॥

यद्गाः संजातभङ्गाश्चकितकविघटाः कामरूपा विरूपाश्
चीनाः कुम्भादिलीनाः प्रमुदितविलसत्किंकरोताः ।
नेपालाद् भूमिपालाद् भुजबलदलितास्ते चलाटाश्च लाटाः
कर्णाटाः केन दृष्टाः प्रसरति समरे मन्त्रिरत्नाकरस्य ॥ ८ ॥

यस्य प्रभानलतापितानामरातितन्त्रीस्तनपर्वतानां ।
भियेव भूमिर्विषमापि युक्तावलीभिः करताडने सः(l. न)
[॥ ९ ॥
सवदमृतमहाभिषेकभाजं
शुभचरितैः सुमनोभिराप्तवालां ।
अयमधित पुरं पुरारिपाद-
प्रणतिपरो नगरीमिवामराणां ॥ १० ॥

फुत्कारोपहता फनीन्द्रशिरसि क्रीडानने दंष्ट्रया
विद्धा कूर्मकठोरचूर्णकपणैः पीडामुपेता चिरं ।
कर्णाटाधिपमन्त्रिणि प्रविलसत्कीर्तिप्रदाने महा-
ज्ञानैकव्यसनेन येन सुहृदि द्यौणी सुखं वर्तते ॥ ११ ॥

न्यायोपार्जितविभवैर्बहु यदा दानप्रदाता कृती
मीमांसानयतर्ककर्कशधिया सृष्ट्वा समाजं सतां ।
तत्पर्षं परितः परीक्ष्य बहुशो दृष्ट्वा निबन्धानसाव्
आम्नायस्मृतिनिर्णयाय कृतवांस्तान् सप्त रत्नाकरान् ॥
[१२ ॥
श्रीचण्डेश्वरमन्त्रिणा मतिमतानेन प्रसन्नात्मना
नेपालाखिलभूमिपालपरिखाधर्मेन्दुदुग्धाम्बिना ।
वाग्वत्याः सरितस्तटे सुरधुनीसाम्यं दधत्या[:] शुचौ
मार्गे मासि यथोक्तपुण्यसमये दत्तस्तुलापूरुषः ॥ १३ ॥

गर्गो वराहमिहिरः स च भोजराजः
स श्रीपतिर्मुनिवरः सपराशरादिः ।
एकेन को ऽपि न जगाद पुरा समस्तं
ग्रन्थेन कर्म सकलं किल संकलय्य ॥ १४ ॥

प्रचुरतरनिबन्धान् वीक्ष्य विख्यातकर्मा
बहुतरमुनिवाक्यान्येष सम्यग्विचार्य ।
सुरुचिरघटनाभिः संकलय्यात्र सर्वं
प्रचरदिह विदित्वा सत्यजीवेश्वरादीन् ॥ १५ ॥

सत्कीर्तिपूरपरिपूरितदिङ्मुखः श्री-
चण्डेश्वरो जयति जङ्गमपारिजातः ।
श्रीमान् समस्तजगतां स हिताय कृत्य-
चिन्तामणिं सचिवमौलिमणिः करोति ॥ १६ ॥

शशाङ्कतारयोः शुद्धिः कर्तव्या सर्वकर्मसु ।
ग्रहाणामपि सर्वेषां तच्छुद्धौ हि विशुद्धता ॥

जन्म त्रिषडेकादशदशसप्तमगः शशी शुभदः ।
द्विचतुःषडष्टनवगतास्तारः शुभा मताः ॥ ०

इति ० तारादिशुद्धिप्रकाशः fol. 6*a*; ० द्वितीयो गोचर-प्रकाशः fol. 16*a*; ० वेधशुद्धिप्रकाशः fol. 18*a*; ० संव-

DR.RUPNATHJI(DR.RUPAK NATH)

त्सरादिप्रकाशः fol. 26*a*; ° करणप्रकाशः fol. 32*b*; ° नक्षत्रप्रकरणप्रकाशः fol. 41*b*; ° मुहूर्तप्रकाशः fol. 43*a*; ° तपग्रहणताप्रकाशः fol. 43*b*; ° समयाशुद्धिप्रकरणं fol. 46*b*; ° अधिमासप्रकाशः fol. 51*a*; ° बालबन्धनप्रकाशः fol. 53*b*; ° गर्भाधानप्रकाशः fol. 56*b*; ° सीमन्तोन्नयनप्रकाशः fol. 59*a*; ° मातृपितृहायोगः प्रकाशः fol. 67*b*; ° रिङ्गप्रकाशः fol. 69*b*; ° कनकदण्डयोगादिप्रकरणं fol. 73*a*; ° मूलशान्तिप्रकाशः fol. 76*a*; ° बालतन्त्रप्रकाशः fol. 87*b*; ° आभ्युदयिकप्रकाशः fol. 88*a*; ° यष्टिकापूजाप्रकाशः fol. 89*a*; ° नामकरणप्रकाशः fol. 90*b*; ° निष्क्रमणप्रकाशः fol. 92*b*; ° पूगप्राशनप्रकाशः fol. 93*a*; ° अन्नप्राशनप्रकाशः fol. 97*a*; ° चूडाकरणप्रकाशः fol. 100*b*; ° शनैश्चरचारप्रकाशः fol. 105*b*; ° दिग्दाहप्रकाशः fol. 106*a*; ° संक्रान्तिप्रकाशः fol. 111*b*; ° ग्रहणफलप्रकाशः fol. 118*b*; ° ग्रहणशान्तिप्रकाशः fol. 126*a*.

It ends: इति कृत्यचिन्तामणौ नग्नप्रकरणप्रकाशः ॥

शाके सिन्धुरदोर्महीधरमहीमाने मनोज्ञं सतां
भेशाशेषभशोधनाद्यपरलग्नाह्यैक्रियं कश्चन ।
भूभृद्राजसुतांघ्रियुग्मकमलं सत्कृत्यचिन्तामणिं
चिन्त्यं देवगणैर्विचिन्त्य नभसि श्रत्यक्षि मे व्यालिखत् ॥
चण्डेश्वरेण कविना कृत एष सारं
ग्रन्थः सभापतिवरेण विलोक्य राज्ञः ।
नानाप्रबन्धघ[ट]नाटनशास्त्रसंघात्
मान्यो हि पण्डितवरैर्विनिवेदनं मे ॥

Regarding the author's date see above, no. 1390. [H. T. Colebrooke.]

1622.

70. Foll. 199; size 10½ in. by 5¼ in.; modern, legible Bengalī handwriting; European paper; nine or ten lines in a page.

Kṛityarāja, a calendar of ceremonial observances for the different months of the year, compiled by order of *Rājā Kṛishṇacandra* of Navadvīpa (Nādiyā, Nuddea). It begins:

नत्वा हेरम्बगौरीगिरिशहरिहरिद्राजिनः पञ्च देशान्
वाग्देवीकेलिगङ्गोज्ज्वलवलयनवद्वीपराज्याधिपस्य ।
राज्ञः श्रीकृष्णचन्द्रक्षितिपतितिलकस्याज्ञया प्राज्ञवर्गो
धर्मस्य स्थापनार्थं विदधति सुधियः पुस्तकं कृत्यराजं ॥
अपि च ॥
दृष्ट्वा तन्त्राणि यत्नाद्विविधबुधगणैः सार्धमग्निहोत्री
श्रीलश्रीकृष्णचन्द्रो भरतभुवि महा[राज]राजेन्द्रनामा ।
तेने यं कृत्यराजं कलिकलुषमहाध्वान्तविध्वंसनार्थं
धर्माणां स्थापनार्थं परमकृतिमतां तोषणार्थं च हृद्यं ॥
आलोक्य ग्रन्थसर्वान् विबुधबुधगणैः सार्धमाकृष्य सारं
वार्धीयं नित्यकृत्यादिकमिह विदुषां संशयोत्सारणार्थं ।
तेने वेदप्रभेदोदितमपि महतां श्रौतकर्मादिकं च
गौडीयस्मृत्यबोध्यं यदकरणवशात् प्रत्यवायस्तदत्र ॥
अध्यापयत निःशङ्कं कुरुध्वं धर्मसंचयं ।
तनुध्वं स्मृतिशास्त्रार्थं ग्रन्थं ज्ञात्वा मनीषिणः ॥

अथ शुचि स्त्रीकालजीवी कर्म कुर्यादित्यादि श्रौतस्मार्तकर्मणि अधिकारितावच्छेदकतया कालस्य श्रुतेः । परमेकाहुतिः काले नाकाले लक्षकोटयः । °

अथ व्रतविधिः fol. 52*b*; इति चैत्रराज्यं 55*b*; इति वैशाखराज्यं 66*b*; इति ज्यैष्ठकृत्यानि 73*a*, etc.; इति फाल्गुणकृत्यं । अथ मलमासकृत्यं 173*a*; अथ संक्रान्तिनिर्णयः 174*a*; अथ ग्रहणस्य व्यवस्था 176*b*.

It ends:

काशीकाञ्चीगयोद्र(l.यौड्र)द्रविण(ड)धटमहाराष्ट्रसौराष्ट्रवीरैर्
आरूढोद्दामदन्तावलमतनिकरे क्षुब्धसंक्षुब्धशास्त्रे ।
भूपालालोलचूडामणिरवनिपतिः श्रीयुतः कृष्णचन्द्रो
दम्भोलिं वारणार्थं ग्रहणविधिमहाराष्ट्रमेतच्चकार ॥
इति ग्रहणनिर्णयः समाप्तः ॥

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 212.

[H. T. Colebrooke.]

1623.

2558. Foll. 84; size 13 in. by 5 in.; well written, in Devanāgarī; nine lines in a page.

Kṛityaratnāvalī, a calendar of religious duties, compiled, in 1648 A.D., by *Rāmacandra Bhaṭṭa* (with the family name of *Tatsat*), son of *Viṭṭhala Bhaṭṭa*, and grandson of *Bālakṛishṇa Bhaṭṭa*. It begins:

नमस्कृत्य रमानाथं भट्टविट्ठलसूनुना ।
कृत्यरत्नावली रम्या रामचन्द्रेण रच्यते ॥

DR.RUPNATHJI DR.RUPAK NATH

तत्र तिथिकृत्ये तु कृष्णादिं व्रते शुक्लादिमेव चेति वचनाच्चैत्रकृष्णप्रतिपदमारभ्य तिथिकृत्यान्युच्यन्ते ।

तत्र चैत्रकृष्णप्रतिपदि कृत्यविशेषः पद्मपुराणे । ०

It ends:

गृहे तस्य स्थिरा लक्ष्मीर्यो दद्यात्सूर्यसंनिधौ ।
दारिद्र्यं न भवेत्तस्य रोगक्लेशविवर्जित इति ॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यवालकृष्णभट्टांगजविठ्ठलभट्टाभिधबुधवरसूनुधर्मशास्त्रपारावारीणश्रीमद्रामचंद्र-भट्टविरचिता कृत्यरत्नावली संपूर्णा ॥ ० संवत् १८६४ ॥

[Mack. Coll.]

1624.

527. Foll. 91; size 9½ in. by 4 in.; legibly written, in Devanāgarī, in 1734 A.D.; ten lines in a page.

Krityaratnāvalī. [H. T. Colebrooke.]

1625.

2781. Foll. 107; size 10½ in. by 3½ in.; legibly written, in Devanāgarī, about the middle of last century; eight lines in a page.

The same work.

[Coll. of Fort William.]

1626.

397. Foll. 84; size 12¼ in. by 4½ in.; indifferent, modern Devanāgarī handwriting; nine lines in a page.

The same work. [H. T. Colebrooke.]

1627.

1720. Foll. 114; size 8½ in. by 3¾ in.; legibly written, in Devanāgarī, in 1798 A.D.; ten lines in a page.

The same work. [H. T. Colebrooke.]

1628.

2362. Foll. 50; size 10¼ in. by 6 in.; well written, in Devanāgarī, in the former part of last century; twelve lines in a page.

Krityaratnāvalī.

At the end this MS. has the following verses:

भूतशून्यऋषिचंद्रमिते ऽब्दे (*i.e.* Saṃv. 1705)
माघकृष्णमहरौ रविवारे ।
ग्रंथपूर्तिमकरोत्किल रामः
श्रीरमापतिसमर्पणबुद्धा ॥

तत्सद्वंशप्रसूतो यो रामचंद्रेति विश्रुतः ।
तेनेयं निर्मिता सम्यक् कृत्यरत्नावली शुभा ॥

अनया प्रीयतां लक्ष्मीर्नृसिंहो भक्तवत्सलः ।
कुलदैवतमित्येतद्दृष्ट्वा स्याच्छुभा मतिः ॥

इति श्रीमद्वेदतदर्थाभिज्ञतत्सद्वालकृष्णभटसुतविठ्ठलभटसूरिसूनुभटरामचंद्रविरचिता कृत्यरत्नावली समाप्ता ॥

For another copy of this work, see Rāj. Mitra, Bikāner Cat., no. 872.

[Gaikawar.]

1629.

अतंत्रज्ञानां ये मूलं पृच्छंति पंडिताः ।
तेषां प्रेक्ष्या इमे ग्रंथा इति दत्तं मयोत्तरं ॥

इत्यादित्यभट्टोपाध्यायस्य सूनुः (!l. सूरेः) कविवल्लभापरनाम्नो गणेकलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयः समाप्तः॥

This might seem to be the end of the work, as is the case in the Calc. MS., referred to (which, however, omits the six *ślokas*). The present MS., however, after two blank pages (148-9), proceeds:

प्रबुध्ये (!) च शुक्लपक्षे हरेर्दिन इति ।
तत्कुत्र श्रवणोपेते पावने परिकीर्तिते ॥ ०

इति ० अपाकर्मनिर्णयप्रकरणं । अत्र चंद्रदर्शनवर्जमाह पराशरः । fol. 156*a*; इति ० पर्वद्वयनिर्णयः fol. 251*a*; इति ० अमावास्यानिर्णयः ॥ अथ मन्वन्तरादीनां युगादीनां निर्णयः । ० fol. 261*a*.

In this second portion several lacunæ occur, esp. at foll. 229-30, 237-38, which are left blank.

It ends rather abruptly: आवृता प्रकारेण । तमाह बृहन्मनुः ॥ --

For another (incomplete) MS., see Bikāner Cat., p. 399.

The work must have been composed prior to the middle of the 14th century, as it is quoted in the *Kālamādhava* (ed., p. 83).

[Mack. Coll.]

DR. RUPNATH JI (DR. RUPAK NATH)

1656.

2490. Foll. 203; size 11 in. by 4½ in.; excellent Devanāgarī writing; nine lines in a page.

Mādhavīya-Kālanirṇaya, also called *Kālamādhava* or *Kālamādhavīya*, another work, in five chapters (*prakaraṇa*), on the same subject, by *Mādhavācārya* (? *Sāyaṇa*).

The work was written (probably about 1360 A.D.) after the completion of the author's commentary on the *Parāśarasmṛiti* (and his *Vyavahāramādhava*), to which it forms a kind of supplement. It has been edited, in the Bibliotheca Indica, by Paṇḍit Candrakānta Tarkālankāra (1885–88). See also Weber, Cat. Berl., no. 1166-67; Aufrecht, Cat. Bodl., no. 642.

The MS. is dated; संवत् १६७९ वर्षे आषाढवदि ११ बुधवासरे लिखितम्।

[Gaikawar.]

1657.

2056. Foll. 186; size 11½ in. by [illegible] in.; fairly good, modern Devanāgarī writing; 9 or 10 lines in a page.

The same work. [Gaikawar.]

1658.

1097. Foll. 113; size 12½ in. by 4½ in.; fair Devanāgarī writing, of 1790 A.D.; 10 lines in a page.

Mādhavīya-Kālanirṇaya.

[H. T. Colebrooke.]

1659.

116b. Foll. 32; size 10 in. by 3¼ in.; legibly written, in Devanāgarī, about A.D. 1750 (foll. 1–6 by a different hand from the rest); 7–11 lines in a page.

Kālanirṇayadīpikā, a summary, in 300 couplets, of the subjects treated in the preceding work, by *Rāmacandrācārya* (son of *Kṛishṇācārya*, and grandson of *Anantācārya*), pupil of *Gopāla*.

According to Prof. Bhandarkar, Report for 1883-84, pp. 58–60, *Rāmacandra*, who was also the author of the *Prakriyākaumudī* (sec nos. 613 seq.), lived in the 15th century (c. 1450).

It begins:

कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरून्।
धर्मज्ञानार्थमात्मनः कालनिर्णयदीपिकां ॥ १ ॥
यद्यप्यधीयशास्त्राणि स्पष्टतायै क्वचित् क्वचित्।
प्रपंच्यते स्वशक्त्या मूलग्रंथानुसारतः ॥ २ ॥
मासाः सार्क्षसौरचांद्रभभुवोर्हां त्रिंशता संक्रमाद्
आसंक्रांतसितादिपक्षयुगतः सर्वैर्युक्ता क्रमात्।
नक्षत्रैर्मितिमाकैराश्यनुगतत्रिंशांशभाक्त्रिंश्यव-
च्छिन्नो भावधिरेवमेव दिवसः प्रोक्तश्चतुर्धा बुधैः ॥ ३ ॥

It ends:

दुर्बोधग्रंथसिद्धांत[ध्वांत]संघातभंजिका।
सुश्लक्ष्णा ऽकारि रामार्यैः कालनिर्णयदीपिका ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यकृता कालनिर्णयदीपिका समाप्ता ॥

[H. T. Colebrooke.]

1660.

2513. Foll. 157; size 10½ in. by 4¾ in.; well written, in the Devanāgarī character; mostly ten lines in a page.

Kālanirṇayadīpikā, with a commentary (*vivaraṇa*), by *Rāmacandra's* son *Nṛisiṃha* (A).

The commentary begins:

श्रीविट्ठलं श्रुतिशिरःप्रथितप्रभावं
भावाद्रिमानससरोवरराजहंसं।
श्रीरामचन्द्रगुरुमेकमनेकशास्त्र-
पारीणकोविदपुरीणमहं नमामि ॥ १ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तानुमता च वैष्णवमहासिद्धान्तसद्दीपिका।
कालज्ञानविधौ व्यधायि विबुधानन्दप्रबन्धत्रयं
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥ २ ॥

DR.RUPAK NATH JI(DR.RUPAKNATH)

श्रीरामचन्द्रकृतिना निधिना कलानां
आनीतमेतमधुना वसुधासुतायाः (? ° सुधायाः) ।
श्रीकालनिर्णयकृदुक्तिसुधाब्धिसारम्
आपीय कर्णपुटकैः कलयन्तु कालं ॥ ३ ॥

तत्सूनुना समयनिर्णयदीपिकायां ।
गाम्भीर्यगर्भपदपद्यगुणान्वितायां ।
निर्णीयते विवरणं कणशः प्रवीणैर्
आचूलमूलमवलोक्य विवेचनीयं ॥ ४ ॥

It ends:

इति विवरणमेतद्दीपिकाया मया यत्
कृतमनुसृतवाक्यं न्यायविन्यासगर्भं ।
स्वमतिसदृशतर्कैर्हर्षितानेकभावं
सुजनजनमनस्तद्दीप्य वैलक्ष्यमेतु ॥ १ ॥

श्रीरामस्वामिनामा रघुपति(*)रकरोन्मन्त्रशास्त्रे ऽभिषेकं
यस्याचार्याभिधां च स्वयमदित ततो ज्ञातसर्वागमार्थैः ।
यश्चक्रे पञ्चरात्रागमहृदयमयं वल्लभानां त्रयं सो
ऽनन्ताचार्यैः कुलेशः शमयतु दुरितं मे विमुक्तायसूनुः॥२॥

तत्सूनुः श्रीशसेवाचरणविबुधगणानन्दि यो न्याययुक्तं
भाष्यं सारं श्रुतीनामकृत नृपसभे वादिवृन्दं विजित्य ।
गोपालाचार्यमुख्यान् सुतरतिरभवद्यस्य सो ऽस्मान्नृसिंहा-
चार्यो ऽव्यात् कल्पवर्त्ति† प्रभवति सततं यस्य गोत्रं
[त्रचित्रं ॥ ३ ॥

तत्पुत्रः पात्रभूतो निगमनयसुधाष्टदशानां गिरां यो
व्याकृत्यां सूत्रवृत्तिं सदसि नरपतेः संदधौ रामनाम्नः ।
यस्याभूतां सुतौ द्वौ द्विजकुलतिलकौ श्रीनृसिंहायरामा-
चार्याख्यौ सो ऽवतान्नो निजजनसुखकृत् कृष्ण आ-
[चार्यवर्यः ॥ ४ ॥

तत्पुण्यानां फलं यः सुतमयमभवद् भ्रातृभक्तिप्रसक्तो
गोपालाचार्यदीक्षाक्षपितकलिमलोऽनेकविद्याविदग्धः।
प्रख्याताः सर्वविद्वत्सदसि बहुविधा यस्य ते ते प्रबन्धाः
सो ऽस्तर्वाणिप्रणम्यो मम मनसि सदा वर्ततां राम-
[चन्द्रः ॥ ५ ॥

तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्
काव्यानां येन टीका व्यरचि स करुणाम्भोनिधिर्ज्ञा-
[नसिन्धुः ।
श्रीकृष्णाचार्यसंज्ञो गुरुरयमवतान्मां कृपां प्राप्य यस्य
श्रीरामाचार्यसूनुर्विवरणमकरोद्दीपिकाया नृसिंहः॥६॥

इति श्रीमत्सर्वशास्त्रज्ञसकलसदागमाचार्यपरमहंसपरिव्राजक-
श्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यसुतश्रीनृसिंहाचार्य-
विरचितं कालनिर्णयदीपिकाविवरणं समाप्तं ॥

[GAIKAWAR.]

* नरपति ° D. † कल्पवृत्तिं A.

1661.

1323. Foll. 82; size 12¾ in. by 4½ in.; legibly written, in Devanāgarī, by two hands, in 1805 A.D.; eleven lines in a page.

Nṛisiṃha's Kālanirṇayadīpikā-vivaraṇa (B).

[H. T. COLEBROOKE.]

1662.

2644. Foll. 145; size 10 in. by 4¼ in.; fairly written, in Devanāgarī, ten linos in a page.

The same work (C).

Dated: संवत् १६०४ वर्षे माघवदि ११ रवौ लिखितं ॥

[GAIKAWAR.]

1663.

181a. Foll. 134; size 10½ in. by 4 in.; legibly written, in Devanāgarī, A.D. 1678; foll. 105–131 by a different hand from the rest; ten lines in a page.

Kālanirṇayadīpikā, with *Nṛisiṃha's* commentary (D).

For other MSS. of these works see Rāj. Mitra, Notices, I., p. 75; VII., 53 (without the final verses 2–6).

[H. T. COLEBROOKE.]

1664–1666.

885, 886, 887. Foll. 1–179, 180–380, 381–558, the first 36 of which were apparently lost, and replaced by 35 leaves in a more modern handwriting, as was also the last leaf (including the date); size 10½ in. by 4 in.; on

DR.RUPNA JHA (DR.RUPAK NATH)

the whole fairly written, in Devanāgarī, by different hands, about the middle of the last century; 7–10 lines in a page.

Rāmaprakāśa, a commentary on *Rāmacandra's Kālanirṇayadīpikā*, composed by (order of) *Kṛipārāma(nṛipati)*.

The real author probably was *Rāghavendra*, son of *Kāśīnātha;* see his digest of matters relating to *ācāra* (nos. 1600–1602), bearing tho same title as the present commentary.

It begins: श्रीसांबसदाशिवाय ॥

यतः सर्वं विश्वं भजति जनिसज्जाल[य]मिदं
य आत्मा सर्वेषां स्थिरचरजडानामपि विभुः ।
तमेतं भास्वंतं विधिहरिमहेशानवपुषं
नमस्यामः कामं परमकमनीयं सुकृतिनां ॥ १ ॥

अज्ञानध्वांतहर्तारं कर्तारं सर्वसंपदां ।
आनंदामृतदातारं सवितारं भजामहे ॥ २ ॥

लोकाभिरामं श्रीरामं भक्तानां कामदं परं ।
नीलोत्पलदलश्यामं सरामं तं भजामहे ॥ ३ ॥

धर्मज्ञानार्थमित्यनेन धर्मजिज्ञासुरत्राधिकारीति निर्धारितं कालनिर्णयविधानेनैव कालनिर्णयार्थस्या ऽस्याश्च प्रकाश्य प्रकाशभावलक्षणः संबंधो ऽवोधि । दीपिकेत्यनेन स्मृत्यैतां सूचितेति भाव इति ०

इति गौरक्षत्रकुलोद्भव(l.गौड०)० नृपतिश्रीकृपारामविरचिते विधेयाविधेयविचारमहातरंगितकालतत्त्वार्णवसंचारोपायसेतुतरणिभूते रामप्रकाशनामग्रंथे संवत्सरांतकालस्वरूपनिर्णयः fol. 90*b*; इति ० घटिकामुहूर्तादिविभागादिकथनमान्यतिथ्यंतनिर्णयप्रकरणं fol. 133*b*; इति० व्रतादिविषयतिथ्यादिकालनिर्णयः fol. 511*b*.

It ends: अत्र वर्ज्यान्याह परिशिष्टे ।

शाकमांसं मसूरं च चणकान्कोरदूषकान् ।
मांसं मधु परान्नं च वर्जयेदौपवस्तके इति ॥

इति गौडक्षत्रकुलोद्भवमाणिक्यचंद्रान्वयमहामतिकपरमज्ञानविराजमानमानोन्नतकीर्तिप्रतापोर्जितनृपतिश्रीकृपारामविरचिते इष्टिकालनिर्णयसेतुभूते रामप्रकाशनामग्रंथ समाप्तिमफाणीत् ॥ संवत् १८६२ ॥

[H. T. Colebrooke.]

1667, 1668.

2104, 2105. Foll. 493; size 9¾ in. by 4½ in.; written, in Devanāgarī, by different hands, in the earlier part of the last century; 8–17 lines in a page.

Kālatattvavivecana, another treatise on the times and seasons suitable for the performance of religious and civil obligations, compiled by *Bhaṭṭa Raghunātha* (*samrāṭ-sthapati*), son of *Bhaṭṭa Mādhava*, grandson of *Bhaṭṭa Rāmeśvara* and nephew of *Bhaṭṭa Nārāyaṇa* (and *Śrīdhara*), in the year Saṃvat 1677 (A.D. 1620).

It begins:

पितरं माधवमंत्रं ललितां नारायणं पितृव्यं च ।
सहजमथ विघ्ननाथं गणपतिमीशां च शारदां नत्वा॥१॥

रामं च सोदरोपेतं रघुनाथेन रच्यते ।
सम्राट्स्थपतिना सम्यक् कालतत्त्वविवेचनं ॥ २ ॥

तत्रादौ बहुवाच्यत्वान्निथितत्त्वं विविच्यते ।
पश्चान्मासाधिमासादि यथामति विवेक्ष्यते ॥ ३ ॥

अत्र तिथिनीमामासंज्ञकसर्वानुस्यूतनित्यकलाव्यतिरिक्तानां पदं ०

It ends:

अज्ञस्य शोकमग्नस्य कृत्ये ऽस्मिन्नतिदुःशके ।
यत्पारगमनं तत्र हेतुर्गुरुकृपैव मे ॥ १ ॥

सप्त[सप्त suppl. B.]रसभूमिमिते ऽब्दे
कार्त्तिकासितमुनौ रविवारे ।
ग्रंथपूर्तिमुकृतिं रघुनाथो
राघवस्य परमर्पयति स्म ॥ २ ॥

चतुःसमुद्रीपरिखा धरित्री
शिष्यप्रशिष्यैर्गृहिभिश्चुवर्यैः ।
यस्याचिता ब्रह्महरीशकल्पैः
स्वसूनुभिर्यश्च तुरीयरूपः ॥ ३ ॥

नारायणश्रीधरमाधवाख्यै
रामेश्वरः सो ऽजनि गार्धिवंशे ।
तस्यांतसूनो रघुमाधवस्य
षड्दर्शनीसागरपारगस्य ॥ ४ ॥

वर्णाश्रमाचारसमूलसंवित्
तत्पूर्वकानुष्ठितिविश्रुतस्य ।
मध्यः सुतो ऽजायत विश्वनाथ-
प्रभाकराभ्यां जनुषा गुणैश्च ॥ ५ ॥

DR. RUPNATHJI (DR. RUPAK NATH)

सम्राट्स्यपतिर्यज्ञोयो रघुनाथ इति श्रुतः ।
तेनेदं निर्मितं सम्यक् कालतत्त्वविवेचनं ॥ ६ ॥
तत्संतो द्रष्टुमर्हंति सदसद्व्यक्तिहेतवः ।
मीमांसाधर्मशास्त्रेषु सम्यक्कृतपरिश्रमाः ॥ ७ ॥ ० ११ ॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीभट्टमाधवविद्वद्वर्यौत्मजसम्राट्स्यपतिभट्टरघुनाथकृतं कालतत्त्वविवेचनं संपूर्णं ॥

[GAIKAWAR.]

1669.

1840. Foll. 392; size 13⅓ in. by 6 in.; fair, modern Devanāgarī writing; twelve lines in a page.

Kālatattvavivecana.

[DR. JOHN TAYLOR.]

1670.

1468. Foll. 174 (and 2 *śuddhipattras* between foll. 9 and 10); size 9 in. by 3¾ in.; indifferent Devanāgarī writing; eleven lines in a page.

Kālanirṇayaprakāśa, another treatise on the same subject, by *Rāmacandra* (son of *Vitthala Bhaṭṭa*, and grandson of *Bālakrishṇa Bhaṭṭa*, with the family name of *Tatsat*).

It begins:

श्रीनृसिंहपदद्वंद्वं नत्वा गणपतिं गुरुं ।
रामचंद्रो ऽतिसंक्षिप्तं कुरुते कालनिर्णयं ॥

तत्र कालो द्विविधः । नित्यः खंडश्च । नित्यस्त्वीश्वररूप एव । अनादिरेष भगवान् कालो ऽनंतो ऽजरो ऽमर इति वचनात् । खंडः क्षणादिपरार्धांतः । तत्र नित्यस्य न निर्णयो ऽनुपभोगात् । खंडस्तु संवत्सरायनर्तुमासादिरूपेणानेकविधिः । तत्रादौ संवत्सरो निर्णीयते । स च द्वादशमासात्मकः कालविशेषः । द्वादश मासाः संवत्सर इति श्रुतेः । ०

The arrangement is similar to that adopted by *Mādhava*, who is frequently quoted by the author.

Date of MS.: शंवत् १८५६ वैशाषकृष्णपक्षे परिवा १ शंण १२०६ । ०

For other MSS., see Rāj. Mitra, Notices, IV., p. 284; Bikāner Cat., p. 401.

According to Prof. Bhandarkar, Report for 1883-84, p. 50, the mother of this *Rāmacandra* was the daughter of *Raghunātha Bhaṭṭa*, the son of *Mādhava Bhaṭṭa*, and grandson of *Rāmeśvara Bhaṭṭa*. If so, the author's date would be approximately determined (latter part of 17th century) by that of his grandfather, who wrote his *Kālatattvavivecana* (nos. 1667-68) in 1620 A.D. [H. T. COLEBROOKE.]

1671.

2044. Foll. 124; size 11 in. by 5 in.; well written, in Devanāgarī; 7–13 lines in a page.

Kālanirṇayasiddhānta, a summary of the rules laid down by some of the preceding writers, in 114 *ślokas*, with a commentary, composed in 1653 A.D. (by *Mahādevavid*, son of *Śrīkālajit;* from materials compiled) by *Raghurāma*, son of *Jayarāma*, and grandson of *Vaikuṇṭha* of Velāvatapura near Sihor in Kathiawar (A).

It begins:

शिवं कालतनुं नत्वा विपश्चिज्जनतुष्टये ।
कालनिर्णयसिद्धांतं वक्ष्ये ग्रंथानुसारतः ॥

The commentary begins with three *ślokas*, the first of which is:

प्रणम्यैकरदं देवं शारदां गुरुमेव च ।
कालनिर्णयसिद्धान्तं व्याकुर्वे विशदोक्तितः ॥ ०

अथ ग्रन्थकर्ता स्वाभीष्टं प्रतिजानीते । ० । ग्रन्थानुसारत इति । ग्रन्था माधवाचार्यैरामचन्द्राचार्यैरघुनाथवाजपेयिप्रभृतिरचिता निबन्धाः ०

At the end the following account is given of the author:

श्रीनृसिंहपुरांतिके द्विनिगमो वेलावटाख्ये पुरे
श्रौतस्मार्तविधानसारचतुरो वैकुंठनामाभवत् ।
तत्सूनुर्जयराम आद्य उदितः श्रीरामनामापरस्
तत्पृष्ठे हरिराम इत्यभिधया ब्रह्मेशविष्णूपमाः ॥ ११५ ॥

DR. RUPNATHJI (DR RUPAK NATH)

तत्र श्रीजयरामजेन रघुरामेणात्र बुद्धा स्वया
ज्ञात्वानेकनिबंधकान् विलिखितं निश्चित्य यद्यद्यतः ।
तद् दृष्ट्वा गिरिनाराराजमहितः श्रीकालजित् तत्सुतो
वृत्तैस्तर्कैहरोन्मितैर्व्यरचयद्ग्रंथं महादेववित् ॥ ११६ ॥

स्वस्त(!) श्रीमन्नृपविक्रमाब्दवियत्सप्तेंदुसंख्ये ऽब्दके
मार्गे मासि सिते दले स्मरतिथौ वारे भृगोर्वह्निभे ।
साध्ये युज्यथ तैतलाख्यकरणे श्रीमद्भुजाख्ये परे
दृष्ट्वार्थं रघुरामकूप्रमकरोद्ग्रंथं महादेववित् ॥ ११७ ॥

शाके विक्रमभूपतेर्गगनभूसप्तेन्दुसंख्ये ऽयने
सौम्ये माधवमासि उज्ज्वलदलभानोस्तिथौ पुष्यभे ।
जीवारे युजि गंजनाह्नि करणे षष्ठे भुजे पत्तने
व्याख्येयं जयरामजेन रघुणा ग्रंथस्य बुद्धा कृता ॥ ११८ ॥

Commentary thereon: अथ ग्रंथकर्ता स्वात्मानमुपदिशति । श्रीमत्सिंहपुरस्य लोकप्रसिद्धशीहोरपुरस्यांतिके समीपे वेलावटाख्ये पुरे लोकप्रसिद्धवेलावटपुरे* द्विनिगमी द्विवेदी वैकुंठनामा द्विजो ऽभवत् ॥ ११५ ॥

० अनेकनिबंधकान् माधवकालतत्त्वविवेकादिनिबंधान् ज्ञात्वा ० ॥ तत्सर्वं दृष्ट्वा विलोक्य श्रीगिरिनारो रैवताचलः तस्य राजा तेन महितः पूजितः श्रीकालजिद् वाडवः तस्य सुतो महादेववित् तर्कैहरोन्मितैर्वृत्तैः षोडशोत्तरशतैरिमं(!) ग्रंथं व्यरचयदिति ॥ ११६ ॥

०११०८ संख्ये ऽब्दके० स्मरतिथौ त्रयोदश्यां भृगोर्वासरे कृत्तिकानक्षत्रे साध्ये युजि साध्ययोगे तैतलाख्यकरणे एवंविधांगे श्रीमद्भुजाभिधे पुरे रघुरामेण कूप्रं रचितमर्थं विलोक्य महादेववित् ग्रंथमकरोदलिखच्च ॥ ११७ ॥

अथ टीकालिखनसमयं(!) व्याख्याता रघुमुपदिशति ॥ ११७० ॥ एतादृशे समये भुजे नगरे द्विवेदिजयरामजेन रघुरामेण ग्रंथस्येयं व्याख्या बुद्धा मनीषया कृतेति ॥ ११८ ॥

इति श्रीद्विवेद्यग्निहोत्रिजयरामसुतरघुरामविरचितो निर्णयसिद्धान्तः सटीकः समाप्तिं समगमत् ।

[GAIKAWAR.]

1672.

2045. Foll. 124; the same size and handwriting.

The same work (B). [GAIKAWAR.]

* Thus A; ० उपदिशति । श्रीमत्सिंहपुरे लोकप्रसिद्धे वेलावटपुरे ॥ B.

1673.

2521b. Foll. 23; size 10¼ in. by 4½ in.; fairly good Devanāgarī writing of 1705 A.D.; 13 or 14 lines in a page.

[*Hemādri-*] *Kālanirṇaya-saṃkshepa* (or *saṃgraha*), by *Bhaṭṭoji Dīkshita*, son of *Lakshmīdhara Sūri;* on the divisions of time with reference to the observance of expiatory, obsequial and domestic rites, in accordance with *Hemādri's* digest.

It begins: मासश्चतुर्धा । त्रिंशता दिनैः सावनः । सूर्यस्य संक्रमादा संक्रांतिः सौरः । पक्षद्वयेन चांद्रः । अश्विन्यादिरेवत्यंतनक्षत्रपरिवर्तनेन नाक्षत्रः । दिवसो ऽपि चतुर्धा । अहोरात्रः सावनः । सौरमासत्रिंशांशः सौरः । तिथ्यवच्छिन्नश्चांद्रः । चंद्रसंबंधनक्षत्रावच्छिन्नो नाक्षत्रः । अत्रास्त्यधा । उक्तं हि ब्रह्मसिद्धांते ।

It ends:

मुख्यकालमुपाश्रित्य [गौण]मप्यस्तु सायनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् ॥

विस्तारो हेमाद्रौ बोध्यः ॥

भट्टोजिद्वैरचितः कालनिर्णयसंग्रहः ।
गुणगृह्यैर्बुधैः सो ऽयमादरेण विभाव्यताम् ॥

इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन हेमाद्रिकालनिर्णयसंक्षेपः समाप्तः ॥ संवत् १७६२ वर्षे कार्त्तिकमासे लिखितं देवभक्षिणा ज्येष्ठेन तृतीया भौमे स्तंभतीर्थवासिना राजनगरस्थेन ॥ अथ दानविधिः । तुलापुरुषकोटीरथचक्रमध्ये० a few more lines.

For another MS. of this treatise (there ascribed to *Hemādri*), see Rāj. Mitra, Notices, VIII., p. 28; for the author's *Tithinirṇaya-pradīpa* (or *saṃkshepa*), see no. 1677.

[GAIKAWAR.]

1674.

1597d. Foll. 14; size 9½ in. by 4½ in.; fairly written, in Devanāgarī; twelve lines in a page.

Parvanirṇaya, a disquisition on the proper time for the Full and New Moon and cor-

DR.RUPANATHJI(DR.RUPAKNATH)

responding obsequial offerings, composed, in 1685 A.D., by *Gaṇapati Rāvala*, son of *Śrī Rāvala Hari*, and grandson of *Rāmadāsa*.

It begins :

श्रीशिवं सहुरुं नत्वा कर्कैगर्गादियाज्ञिकान् ।
दर्शे च पौर्णमासे च यागकालो निरूप्यते ॥ १ ॥

ऋग्युक्श्रुतिसूत्रभाष्यनिचयं श्रीकर्कदेवोदितान्
श्रीनंताभिधरामयाज्ञिकमतांस्तान् पर्वणो निर्णयान् ।
श्रीगंगाधरनिर्मितं हरिहरं रेणुं तथा मंडनं
श्रीकात्यायनयज्ञपार्श्वसहितं कर्मप्रदीपं तथा ॥ २ ॥

हेमाद्रिं प्रथितं च माधवमतं स्मृत्यर्थसारामृतं
[सारं]श्रीमदनस्य निर्णयमहासिंधुं तथा भास्करं ।
तत्त्वं कालविवेचनं स्मृतिगणान् श्रीकौस्तुभं ज्योतिषं
सिद्धांतस्मृतिचंद्रिकादिनिखिलग्रंथान् विचार्योदरात् ॥
श्रुतिसूत्रस्मृतिभाष्यप्राचीननिबंधसागरानेतान् । [३ ॥
गणपतिरावलविदुषा निर्मथ्येषां विधीयते सारः ॥ ४ ॥

श्रीदोचद्विजगुर्जरेषु महितः श्रीरामदासो ऽभवद्
गौडाधीशमनोहरार्चितपदो यो याज्ञिकः कीर्तिमान् ।
तत्पुत्रो हरिशंकरो ऽध्वरकृती श्रीरावलख्यातिभृत्
तत्सूनुर्यजुषां स्थितिर्गणपतिर्व्रूते नयं पर्वणः ॥ ५ ॥

पर्वण्यखंडे स कथं विधेयः
खंडे ऽथवा पिंडयजिः कदा स्यात् ।
राकानुमत्योः सकलं तदेतद्
विचार्य वक्ष्ये सुगमैर्वचोभिः ॥ ६ ॥
धीरान्कुशाग्रधिषणान् धिषणप्रगल्भान्
संप्रार्थये मुहुरहं प्रहितप्रणामः ।
यत्पार्वकालिकविनिर्णयसारमेत
सानुग्रहाः सुमनसः प्रविचारयितुं ॥ ७ ॥

दर्शपौर्णमासयागं प्रकृत्य ब्रूयते । स यो हैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजत अमावास्येनामावास्यां क्षिप्र एव पाप्मानमपहत इति ॥ कात्यायनसूत्रे च । ०

Iti paurṇamāsīnirṇayaḥ, fol. 5*a*; *anvādhānapiṇḍapitṛiyajñakālanirṇayaḥ*, fol. 8*b*.

It ends :

सत्पर्वनिर्णयः पंथाः पुमर्थोध्वापि धर्मभूः ।
शिवसंप्रापको ऽकारि यज्ञेशः प्रीयतां ततः ॥ १ ॥

पर्वद्वयसमुल्लासो भाति सत्पद्मनंदनः ।
माधवाभ्युद्धृतश्चित्रः पर्वनिर्णयचंद्रमाः ॥ २ ॥

शतपथविकटेषु श्रौतमार्गेष्वटंतो
विविधविधिविकल्पध्वांतगूढेषु खिन्नाः ।
पथि गणपतिदिष्टे पर्वणो निर्णयेंदाव्
अमृतकिरणदीपे याज्ञिकाः संचरंतु ॥ ३ ॥

नेत्रांभोभिधराधरक्षितिमिते श्रीविक्रमार्के शके १७४२
मासीपे विजयातिथौ रविदिने माल्हेरदुर्गाचले ।
यागे पर्वविनिर्णयं गणपतिः श्रीरावलाख्यो मुदा
नानाग्रंथविलोकनाब्धिमलधीरेनं समापूरयत् ॥ ॥ ४ ॥

इति श्रीमदग्निहोत्रचातुर्मास्यादियजनसमासादितपुरुषार्थसार्थश्रीरावलहरिसूनुगणपतिरावलकृतो ऽयं पर्वनिर्णयः संपूर्णः॥ संवत् १८०७ विक्रमसंवत्सरे माघमासे कृष्णपक्षे ५ पंचमी स्थिरवासरे समाप्तः ॥ [H. T. Colebrooke.]

1675.

1138. Foll. 38 (the last but one of which is missing); size 8¼ in. by 3¾ in.; fairly written, in Devanāgarī; six lines in a page.

Another MS. of the same work, apparently copied from the preceding MS.

Dated : संवत् १८४२ मीतौ जेष्ठशुदि ६ वारसोमारके ०
[H. T. Colebrooke.]

1676.

1843. Foll. 11; size 12 in. by 4 in.; fair, modern Devanāgarī writing; eight lines in a page.

Tithisārasaṃgraha or *Tithinirṇaya*, an abstract of the rules regarding the lunar days appropriate for religious performances.

It begins : अथ तिथिनिर्णयः ।

स्मृत्यर्थसारं हेमाद्रिमाधवनिर्णयामृतं ।
वीक्ष्य निर्णयसिंधुं च स्मृतिदर्पणमादरात् ॥

निर्णयोदन्वतः सारमुद्धारं करोम्यहं ।
[राघवो विदुषां प्रीत्यै संक्षेपात्तिथिनिर्णयं ॥ Bomb.
तत्र तिथिर्द्वेधा । ० [ed., 1864.]

It ends : फाल्गुनकृष्णप्रतिपदि अपचं स्पृष्ट्वा स्नायादिति निर्णयसिंधुः । ततो होळाकामभेन(!) सिंचयेत् । तद्दिने चूतकुसुमप्राशनं च कुर्यात् । इति फाल्गुनः॥ इति संक्षेपेण तिथिसारसंग्रहः समाप्तः ॥ [Dr. John Taylor.]

DR.RUPNATHJI(DR.RUPAK NATH)

1677.

1140. Foll. 42; size 7¾ in. by 3¾ in.; fairly good, modern Dovanāgarī writing; nine lines in a page.

Tithinirṇaya-pradīpa (or *saṃkshepa*), a similar work, by *Bhaṭṭojidīkshita*, son of *Lakshmīdhara Sūri*.

It begins: चैत्रशुक्लप्रतिपदि वत्सरारंभः। तत्र औदयिकी तिथिर्ग्राह्या।

चैत्रमासि जगद् (? l. जगद्) ब्रह्मा ससर्ज प्रथमे ऽहनि।
शुक्लपक्षे समग्रं तु तया (l. तदा) सूर्योदये सति॥

इति हेमाद्रौ ब्रह्मोक्तेः॥

दिनद्वये ऽपि तद्ग्राह्यौ अन्याह्नौ वा पूर्वैव [वा]।
वत्सरादौ वसंतादौ बलिराज्ये तथैव च।
पूर्वविधैव कर्तव्या प्रतिपत्सर्वदा बुधैः॥

इति गोविंदार्णवे वृद्धवसिष्ठोक्तेः। °

It ends: इति होलिकानिर्णयः॥ इति ° तिथिनिर्णयप्रदीपः समाप्तिमगमत्॥

See Weber, Cat. Berl., no. 1176. To the authorities there mentioned may be added: *Anantabhaṭṭa, Kāladarśa, Tristhalīsetu, Dhanvantarinighaṇṭu, Rāmārcanacandrikā, Smṛiticandrikā*.

See also Notices, IV., p. 264.

[H. T. Colebrooke.]

1678.

1052b. Foll. 14; size 16¼ in. by 3¾ in. (folded to half the length); modern Bengalī handwriting; seven lines in a page.

Tithisvarūpa, or *Sarvatithisvarūpa*, a manual of feasts and fasts to be observed on the several days of the fortnight; by *Sureśvara*.

It begins:

नत्वा गुरूणां चरणं निधाय हृदीश्वरं सर्वशुभैकहेतुं।
बुधप्रमोदाय सुरेश्वरेण वितन्यते संवैतिथिस्वरूपं॥

अथ तिथिव्यवस्था। तत्र सर्वकर्मणि मुहूर्तान्यूनकालव्यापिनी तिथिर्योग्या कृष्णजन्माष्टम्यादौ तु मुहूर्तैन्यूनकालो ऽग्राह्यः। तादृशकालबोधकवचनात्। एवं षष्टिदण्डात्मिकायां। परनिष्क्रान्ता च योग्या। °

Fol. 2*a*: अथ प्रतिपत् °॥ अथ द्वितीया। सा च शुक्ला परयुता कृष्णा प्रतिपद्युता ग्राह्या। आषाढशुक्लद्वितीयायां रथयात्रा पुष्याभावे ऽपि कार्या। तद्योगे फलातिशयः। तेन पुष्यादरेण न पूर्वेद्युः °

It ends: चातुर्मास्यव्रतस्योदीच्यङ्गपूजादक्षिणादिकं हरेरुत्थानात्परं द्वादश्यामेव दिवा कार्यं द्वादश्योत्तरोत्थाने तु बोधोत्तरं दिवा कार्त्तिक्यामेव तुलासंक्रान्त्यामारम्भपक्षे वृश्चिकसंक्रमणात्परं दिवा करणीयं शयने सत्युत्थानोत्तरपूर्ववद् द्वादश्यां कार्त्तिक्यां वेति॥ इति तिथिस्वरूपं समाप्तं॥

[H. T. Colebrooke.]

1679.

84d. Foll. 34; size 10¾ in. by 4¾ in.; indifferent Devanāgarī writing; nine lines in a page.

Sārasaṃgraha, an anonymous treatise on auspicious and unauspicious days for the performance of religious rites.

It begins:

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनाम्
आत्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषां।
लोकानां प्रलयो भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचन्तः(वाचं वः) स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः॥ १॥

काष्ठानिमेषैर्नवभिर्द्विकम्मैस्
त्रिंशत्फलास्ता दशपंचयुक्ताः।
कलात्रयीशाद्रिमितो मुहूर्तस्
त्रिंशन्मुहूर्तं द्युनिशं वदंति॥ °

The treatise consists of 881 verses, ending thus: ° [६]७६॥ इति शिवरात्रिचतुर्दशीनिर्णयः। °

पृथिव्यां यानि पापानि ब्रह्महत्यादिकानि च।
अन्नमाश्रित्य तिष्ठंति तस्मादन्नं त्यजेन्नरः॥ [६]८०॥

अनुराधा यतिपूज्या विष्णुः पूज्यो गृही सदा।
रेवती वानप्रस्थेन पूज्या च हरिवासरे॥ [६]८१॥

इति सारसंग्रहः॥ संवत् १७९४ चैत्रवदि ११ सोमे पंप्रामाणिकेश्वरलिखितं °॥

For a MS. copied from the present one, see Aufrecht, Cat. Bodl., no. 668.

[H. T. Colebrooke.]

DR.RUPNATHJI(DR.RUPAK NATH)

1680.

799. Foll. 142; size 10½ in. by 4 in.; good Devanāgarī writing of A.D. 1604; nine lines in a page.

Samayāloka, a manual of rules regarding the times and seasons for religious observances, compiled—under the patronage of *Durgāvatī*, queen of King *Dalapati*, and mother of *Vīra Sāhi*—by *Padmanābha Miśra Bhaṭṭācārya*, son of *Balabhadra Miśra* and *Vijaya Śrī*.

The work apparently forms the first of seven sections of a general digest of Law, entitled (*Durgāvatī-*) *Prakāśa*.

It begins:

वामांशीभूय रागातिशयवशतया निर्भरं संगतायाः
प्रारंभे तांडवस्य त्रिपुरविजयिनः प्राप्तनृत्योद्यमायाः ।
सद्यःस्विद्यत्कपोलं चलदलकलसद्भालमामुक्तकेश-
प्रोद्वेल्लन्मल्लिमालं क्षपयतु दुरितासंगमंगं भवान्याः॥१॥ ०

यस्याः पुरः स्फुरति नर्मे नृणां दिशंती
सा नर्मदेति तटिनी जगति प्रसिद्धा ।
या दृष्टितो ऽपि जनतामवधूय पापं
भूयः पदे नयति तन्नुहिनांशुमौलेः ॥ १९ ॥ ० १८ ॥

तस्यामविष्णुपृथिवीपतिवाधशास्त्र-
प्रामाण्यतः सकलदेवगणानुमत्या ।
संग्रामसाहिमिषतो द्विषतो निहत्या
भागो हरेर्धरणिनाथतयाविरस्तु ॥ १९ ॥ ० २५ ॥

तस्माद्बभूव निखिलक्षितिचक्रशक्रो
ऽलर्कोधिको वृषदिवाकरतिग्मतेजाः ।
राजा भुजार्जितजयो ऽजितराज्यलक्ष्मीर्
मानोन्नतो दलपतिर्दलितारिवर्गः ॥ २६ ॥ ० ३१ ॥

तस्यात्मजो विजयते ऽयमसीमभूमी-
नाथः पृथातनयसार्थयशःकृतार्थः ।
आजानुबाहुरजनीकरकांतवक्त्रः
श्रीवीरसाहिनृपतिर्दिननाथतेजाः ॥ ३२ ॥ ० ३७ ॥

अस्यां श्रीवीरसाहेर्दलपतिनृपतिप्रेयसी कल्पवल्लिः
द्योत्स्यामन्या वदान्यावधिरमलगुणा भाति दुर्गावतीह ।
या कन्या शालिवाहक्षितिरमणमणेर्या च मुख्या स्नुषासु
श्रीमत्संग्रामसाहेरपि च कविजनानन्दभूः पावितोर्व ॥
[३८ ॥ ० ४५ ॥

संग्रामविजयं वीक्ष्य यस्या दलपतिस्त्रियाः ।
मन्यंते मनुजास्तथ्यं दुर्गायाः समरे जयं ॥ ४६ ॥

तस्या निदेशेन विशेषभाजा श्रीपद्मनाभो बलभद्रसूनुः ।
निबंधृनिःपूर्वविवेचितेषु करोति धर्मेषु विवेचनानि ॥
दुर्गावत्या निदेशेन विजयश्रीतनूद्भवः । [४७ ॥
लिखितानि निबंधृणां विचारयति सादरः ॥ ४८ ॥

दुर्गावत्याः प्रकाशेन दूरीकृततमस्ततौ ।
विचरंतु जना धर्ममार्गे विगतमत्सराः ॥ ४९ ॥ ० ५२ ॥

आदिमः समयस्यायं व्रतस्योक्तस्ततः परः ।
आचारस्य ततः पश्चात् व्यवहारस्य तत्परः ॥ ५३ ॥

दानस्य तेषः प्रोक्तः शुद्धेः षष्ठः प्रकीर्तितः ।
आराधनस्य जगतामधीशस्य तदुत्तरः ॥ ५४ ॥

इत्यं श्रीपद्मनाभेन भट्टाचार्येण निर्मिते ।
दुर्गावत्याः प्रकाशे ऽस्मिन् सप्तालोकाः प्रकीर्तिताः ॥५५॥

धर्मो विवेचितो ऽस्माभिर्विचार्याचार्यनिर्मितौ ।
दुर्गावत्या लसत्कीर्त्याः कल्याणानि प्रयच्छतु ॥ ५६ ॥

तत्र धर्मे विधिः साक्षान्मान स च विधिः क्वचिदपूर्वः यथा ०

तत्रादौ समयो निरूप्यते fol. 10*a*; अथ मलमासनिर्णयः 14*a*; अथ संक्रांतिनिर्णयः 24*a*; अथ ग्रहनिर्णयः 29*b*; अथ युगादिनिर्णयः 34*b*; अथ तिथयो निर्णीयन्ते 36*a*; अथ नक्षत्रनिर्णयः 50*a*; अथायाचितनिर्णयः 52*a*; अथ दानहोमादिदेवकालनिर्णयः 53*a*; अथ प्रतिपन्निर्णयः 54*b*; अथ द्वितीयानिर्णयः 63*b*, etc.; इति चतुर्दशीनिर्णयः ॥ अथ पौर्णमासीनिर्णयः 130*a*; अथोत्सर्गनिर्णयः 137*a*; इति होलिकानिर्णयः 138*b*; इति पौर्णमासीनिर्णयः॥ अथामावास्यनिर्णयः 139*b*; अथ नक्षत्रनिर्णयः 140*b*.

Colophon: इति श्रीमन्निरवद्यगद्यहृद्य ० महाराजाधिराजदलपतिप्रेयस्याः श्रीदुर्गावत्याः प्रकाशचिदशसिंधुबंधुरवाग्विलासोदयदूरीकृतनिःशेषदेशप्रभवविद्यार्थिस्तोमाज्ञानपंकपरमप्रति-ष्ठितसन्मिश्रश्रीबलभद्रात्मजविजयश्रीगर्भसंभवसकलशास्त्रारविं-दप्रद्योतनभट्टाचार्यनिर्मितश्रीपद्मनाभकृते समय[ा]लोके प्रथमः प्रचारः पूर्णः ॥ संवत् १६६१ वर्षे फाल्गुनसुदि ७ गुरुवासरे पातिसाहकैद्वरभुंजमाने तस्मिन्काले वर्तमाने पोथी लिषाइ श्रीपोजापरमानंदसुपुत्रश्रीपोजामनोहरदास ॥ लिषापितं ठा श्रीपाडेनरायणदास । तत्पुत्र ठा श्रीपाडे राघोदास ॥ कायस्थ श्रीगौरकरलग्रामकोशालालिखो ॥

Whilst the colophon seems to indicate that this is only the first portion of the *Samayāloka*,

DR.RUPNATHJI(DR.RUPAK NATH)

the colophon of a MS., in Rāj. Mitra's Bikāner Cat., p. 450, containing the same matter, represents it as the complete work.

Besides *Smṛitis* and *Purāṇas*, the following authorities have been met with: *Anantabhaṭṭāḥ*, foll. 55*a*, 120*b*, etc.; *Nirṇayāmṛita*, 55*a*, 69*b*, etc.; *Brahmasiddhānta*, 29*b*; *Madanapārijāta*, 136*b*; *Madanaratna*, 17*b*, 39*b*, etc.; *Mādhavācāryāḥ*, 42*a*, 46*b*, 49*a*, etc.; *Ratnamālā*, 23*a*; *Laghusaṃhitā*, 61*b*; *Viśvarūpanibandha*, 61*b*; *Śivarahasya*, 33*b*; *Śuddhamiśrabheda*, 79*b*; *Śuddhāvikā*(?), 83*b*; *Smṛitisaṃgraha*, 20*b*.

The author wrote his *Vīracampū* in 1578 A.D.; see Peterson, Report, I., p. 101.

[H. T. Colebrooke.]

1681.

416*b*. Foll. 21; 4to.; size 11¾ in. by 9 in.; large, thick, modern Devanāgarī handwriting; sixteen lines in a page.

Samayanirṇayoddyota, a calendar of religious feasts and fasts, being the first of seven sections (*uddyota*) which make up the *Madanaratnapradīpa*, a general digest of civil and sacred law, by *Madana Siṃha Deva*, son of *Śakti Siṃha*. Incomplete. It begins:

आदायेंदुकलां शंभोर्मुखे विसधिया क्षिपन् ।
द्वितीयरदनीकुर्वन् पातु बालो मदोनतः ॥ १ ॥

उच्छिष्टन्यसुनानिकुंजभवने सोच्छ्वासमभ्युद्गतः
शृङ्गारं परिभावयन्सखितयानीतश्च कुंठस्थलीं ।
इत्येवं भगवानिव प्रियधुराधारीकृतो राधया
गोविंदस्य जगद्विमोहनरसो वंशीरवः पातु वः ॥ २ ॥

जामातुर्नै पिता पितामहकथां कन्यापि न स्वीकरो-
त्येतस्मिन्गहने कथं नु भविता कन्याप्रदानं विधिः ।
इत्थं जल्पति नारदे सकुतुकं वस्तुस्थितेर्मौनिनोर्
गौरीशंकरयोस्तयोरवतु वो व्रीडाविनम्रं शिरः ॥ ३ ॥

तरुणतिमिरहन्ता पद्मिनीप्रेमरत्ना
गगनवनविहारी भक्तसाम्राज्यकारी ।
मुरविरचितसेवः स्वर्भुजामेकदेवः
स जयति दिननाथः सिद्धसङ्गीतगाथः ॥ ४ ॥

इष्टारंभविभावनीयचरणश्चिंताम्यिसञ्चारणम्
त्रैलोक्याभयदानचिह्नविभवस्तुद्य(?प्य)द्वियत्संभवः ।
उद्यद्विघ्नतमोवियातनरणिर्भक्तेषु चिंतामणिः
पायाद्वः सुकृतैककर्मठमतिर्देवो गणानां पतिः ॥ ५ ॥

आस्ते देशः प्रशस्तद्विजवरललिताचारचित्तानितांता-
राध्योऽध्यो विपक्षक्षितिपतिनिकरैर्निर्भरैः सङ्करेऽपि।
ढिल्लीनामा निकामाहवनवमहिमोद्दण्डदोर्दण्डदीप्त-
प्रारंभध्वस्तदंभप्रतिबलयरिपद्वीरनीराजितश्रीः ॥ ६ ॥

चत्वारो यत्र वर्णाः श्रुतिनियतविधेः स्वस्ववृत्तिं[भजन्ति]
यत्राचारो विशालो यदवधिविरता वीरवार्त्ता भवंति।
दानं यत्राभिमानं क्षरति सुरतरो क्षत्रियाणां वराणां
सो ऽयं रम्यप्रदेशो जगति विजयते को ऽपि ढिल्लीति
[देशः ॥ ७ ॥

तत्रा Here the MS. breaks off, leaving a blank of more than two pages, and resuming at *śloka* 22.

यो वेदाखिलवेदबोधितविधानाचारपारङ्गमो
येनाद्यापि च संस्कृतेरवधिना संध्या न वंध्या कृता ।
यो देवद्विजजातकर्मचितसद्धर्मक्रियातत्परः
सोऽयं श्रीमदनो नृपो विजयते विद्यावसिष्ठद्युतिः॥ २२॥

तेनाहूय मनोपिमंडनमणिं सन्मिश्ररत्नाकरं
गोपीनाथमनुज्ञमं च सुधियं श्रीविश्वनाथं तथा ।
मुग्धं पंडितमुन्नतद्युतिमतिं भट्टं च गंगाधरं
राज्ञा शक्रनसूनुना सुकृतिना ग्रंथो ऽयमारभ्यते ॥ २३ ॥

अमुष्य परिनिर्मितान्मदनरत्नदीपादुधा(?*r.* धा)
विधाय मतिमंदतातिमिरजातघातक्रियां ।
श्रुतिस्मृतिविबोधिते विहितनिंदिते कर्मणो
निरीक्ष्य नृपतेः कृतः कलयतेह पुण्याशिपः ॥ २४ ॥

उर्वी यावदहीन्द्रदंडशिखरासीनातपत्रा[ᴗ]ते
यावत्तत्कृतकोच्चकुंभणुपमापुष्टाति(?णाति) हेमाचलः ।
यावद्बालमृगांकमंजुलकलामौलौ मृडानीपतेर्
उद्द्योतैमदनप्रदीपमहिमा तावत्समुज्जृंभताम् ॥ २५ ॥

उद्द्योताः समयाचारव्यवहारविवेचकाः ।
प्रायश्चित्तस्य दानस्य शुद्धिशान्त्योश्च सप्तमे ॥ २६ ॥

तत्रादौ राजसिंहेन सर्वधर्मो ऽयं योगतः ।
तन्यते मदनेंद्रेण समयस्य विनिर्णयः ॥ २७ ॥ ०

सुखावगमसिद्ध्यर्थमस्मिन्समयनिर्णये ।
उद्द्योते विहिता येऽर्थाः क्रमस्तेषां निरूप्यते ॥ २९ ॥

DR.RUPNATHJI(DR.RUPAK NATH J)

तत्रादौ समये मानं तत्स्वरूपमथोदितं ।
कर्मांगत्वमथास्योक्तं ततो वत्सरनिर्णयः ॥
अयनस्य तथर्तोश्च मासस्याथ विनिर्णयः ।
निर्णयो मलमासस्य तत्र वर्ज्यादिनिर्णयः ॥
सामान्यतः सवैतिथिनिर्णयश्च ततः कृतः ।
एकभक्तस्य भक्तस्य तथैवापाचितस्य च ॥
तथैव दानहोमादेः कालस्य च विनिर्णयः ।
तत्रत्रिष्युपवासस्य तत्रत्रिथिविनिर्णये ॥

etc., 77 more *ślokas*; the two last of which are (fol. 7*b*):

ततः कालविशेषेषु यद्वर्ज्यं तत्प्रपंचितं ।
निरूपितं ततः सम्यग्वर्जनीयं कलौ युगे ॥
एतावंतः क्रमेणार्था यथाशास्त्रं प्रपंचिताः ।
अस्मिन्प्रथम उद्द्योते समयस्य विनिर्णये ॥

इति श्रीकोण्ड(श्रीकोदण्ड in some colophons)परशुरामेत्यादिविविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे समयनिर्णयोद्द्योते ऽनुक्रमणिका ॥

अथ निर्णयसमयसद्भावे किं प्रमाणं किं च तस्य स्वरूपं उच्यते । श्रुतिस्मृतिपुराणानि तत्र प्रमाणानि । तत्रापि [illegible]

The MS. ends with the disquisition on the intercalary month (*malamāsa*), and thus contains only a small portion of the treatise.

The complete digest thus consists of the following sections (*uddyota*): 1. *Samayanirṇaya;* 2. *Ācāra;* 3. *Vyavahāra;* 4. *Prāyaścitta;* 5. *Dāna;* 6. *Śuddhi;* 7. *Śānty-uddyota.*

The *Madanaratna*(*pradīpa*) was largely used by *Nīlakaṇṭha* for his *Bhagavantabhāskara;* see West and Bühler, Digest, 3rd ed., I., p. 20.

[H. T. Colebrooke.]

1682.

416a. Foll. 20; 4to.; size 11¾ in. by 9 in.; European paper; fairly written, in Devanāgarī; fifteen lines in a page.

Samayaprakāśa, being the section on the times and seasons suitable for religious ceremonies, of a general Digest of Sacred and Civil Law, called *Kīrtiprakāśa,* by *Vishṇuśarman* (*svarāṭ samrāṭ agnicit*), minister of worship to King *Kīrtisiṃha,* son of *Kanakasiṃha,* and descendant of *Jaitrasiṃha,* of the *Gaura-vaṃśa.* The MS. contains only a small portion of this section. There are many lacunæ.

The MS. begins: अथ सर्वांगकर्मणां मुख्यांगरूपः कालो निर्णीयते ॥ तत्र केचित्प्रत्यवतिष्ठंते नित्यत्वव्यापकत्वाभ्यां प्राप्तत्वादेव कालस्य निर्णयो न संभवति । निर्णयो नाम नानाविरुद्धविधायकवाक्यानां व्यवस्थापनेन सिद्धो ऽर्थ उच्यते । ०

इति कालस्य निर्णेयत्वविचारः fol. 7*b*; इत्यहोरात्रभेदाः 9*b*; इति मासस्वरूपं 10*b*; इति मासविनियोगाः 12*a*; इत्यृतवः 14*a*; इत्ययनानिर्णयः 15*a*.

इति श्रीमद्गौरवंशावतंसमहारायश्रीजैत्रसिंहकुलतिलकमहारायश्रीकनकसिंहात्मजकोदंडपरशुरामसमानोन्नतमहारायश्रीकीर्त्तिसिंहप्रयुक्तस्वराट्संम्राडग्निचित्स्यपतिमहायाज्ञिकश्रीविष्णुशर्मविरचिते कीर्त्तिप्रकाशे निबंधराजे समयप्रकाशे क[ाल]स्य निर्णेयत्वमहोरात्रमासत्वयनसंवत्सरनिर्णयः ॥ १ ॥

अथ मासशुद्ध्यनुरोधेन प्रसंगान्मलमासो निर्णीयते fol. 16*b*.

The MS. breaks off abruptly in the middle of this chapter.

Among the authorities quoted in this fragment may be mentioned: *Maṇḍanamiśra,* fol. 7*a*; *Trikāṇḍamaṇḍana,* fol. 12*a*; *Jyotir-Gārgya,* fol. 11*a*; *Uttara-Saura,* fol. 16*a*.

[H. T. Colebrooke.]

1683.

18a. Foll. 68; size 9½ in. by 4 in.; fairly written, in Devanāgarī; ten lines in a page.

Samayapradīpa, a treatise on the proper time for the performance of *vratas,* or voluntary acts of ceremonial observance, in three chapters, by *Śrīdatta.*

It begins:

श्रेयः सनादिशतु सालसपक्ष्मपाते
निद्राजिते ऽपि दृशौ भृशमुन्नमय्य ।
संवाह्यमानचरणांबुजजातहर्षो
लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥ १ ॥

DR. RUPA NATH JI

निबंधेषु निबद्धानि वचनानि विचिन्वता ।
श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते ॥ २ ॥

तत्र पूर्वेदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेकवारं भुक्त्वा दंतान् संशोध्य व्रतदिने प्रातः स्नात्वा सूर्योदये व्रतं गृह्णीयात् ॥ तत्र प्रयोगः । अद्य सूर्यवारेत्यादिना प्रकारेण व्रतोपयुक्तं कालविशेषं निर्दिश्य भगवन्सूर्य भगवत्यो देवताः उपवासं नक्तमयाचितं वाहं करिष्ये इत्यभिधाय संकल्पं कुर्यात् । अनेकाहसाध्ये व्रते अद्यस्थाने अद्यादीति प्रयोगः ॥ तत्र देवलः ।

अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः ।
सूर्याद्यदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥

प्रातर्व्रतमाचरेदिति संबंधः । प्रधानपदार्थान्वयस्याभिहितत्वात् ॥ अभुक्त्वाहारमित्यर्थात्पूर्वेदिने एकवचनानुरोधात्तु एकभक्तमायाति । °

Ch. I., *Samayapariccheda* ends fol. 37*b*; II., *Saṃvatsarakṛityap.*, fol. 63*a*; III., *Prakīrṇakapariccheda*, ends:

गतिमिष्टां यथाकामं प्रददाति त्रिविक्रमः ।
विघ्नो न जायते तस्य यजेद्यस्तु विनायकं ॥

अपहंतु तमः सकलं सम्यक्कर्मप्रचारमपनयतु । [नूनं ॥
समयप्रदीप एष मेतितिथिमेतु(l. स्थितिमेतु) सतां गणे ।

इति श्रीमहामहोपाध्यायश्रीश्रीदत्तकृते समयप्रदीपे प्रकीर्णकपरिच्छेदस्तृतीयः समाप्तः ॥ संवत् १७१९ ° ॥

Besides *Purāṇas* and *Smṛitis*—incl. *Gauḍasmṛiti*, viz.:

उपवासे तथा श्राद्धे न खादे(?*r.* कुर्याद्) दंतधावनं ।
दंतानां काष्ठसंयोगो दहत्या सप्तमं कुलं ॥ fol. 7*b*;
सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
तस्यां स्नानं च दानं च महापातकनाशनं ॥ fol. 59*a*.

the author quotes *Hari*, fol. 64*b* [अत्र हरिर्मेघादिच्छत्रस्यानिमित्तत्वमाह। ग्रासावच्छिन्नकालस्य गणितप्रमितत्वात्। दर्शनपदस्य तदुपलक्षकत्वात्। न च दर्शनविषयत्वमेव प्रयोजकं कर्मकाले तदभावात्। °]; *Harihara*, fol. 67*a* [हरिहरस्तु पौर्णमास्यमावास्ययोर्युगादित्वे विकल्पमुक्तवान्। केचित्तु राजाद्यवाक्यबलात्।]

For other MSS. of the work, see Rāj. Mitra, Notices, V., p. 259; Bikāner Cat., p. 452; for a different work of the same title, by *Harihara Bhaṭṭācārya* (the father of *Raghunandana*), Notiees, III., p. 55. [H. T. Colebrooke.]

1684.

1889. Foll. 312; size 11½ in. by 5 in.; on the whole fairly written, in Devanāgarī, about the middle of last century; eleven lines in a page.

Vratārka, a favourite Digest of matters connected with vows or voluntary rites of penanee, compiled by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*, and grandson of *Bhaṭṭa Śāṅkara*.

It begins:

दिवाकरपदद्वंद्वं सकलैश्वर्यप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

यो जाग्रन्निजकरमंदराद्रिमथैर्
निर्मथ्य प्रथिततरांधकारसिंधुं ।
लोकेभ्यो वितरति सत्प्रकाशरत्नं
तं वंदे वनजवनीविनोदबंधुं ॥ २ ॥

नामं नामं प्रणामोद्भुरभरतचलच्चोचनालिंगनेन
भ्राम्यद्भृंगाभ्रभूरिभ्रमजननपरौ जानकीवल्लभांघ्री ।
तातश्रीनीलकंठामलपदकृपया लब्धशास्त्रार्थतत्त्वः
कुर्वे श्रीशंकरोऽहं सहृदयप्रीतये सद्व्रतार्कं ॥ ३ ॥

तत्र व्रतारंभकालः ॥ हेमाद्रौ गार्ग्यः । °

अथ व्रतधर्माः fol. 4*a*; इति ° परिभाषा 19*b*.

अथादौ प्रतिपद्व्रतानि ib.; इति संवत्सरारंभविधिः 22*a*; ° आरोग्यप्रतिपद्व्रतं 22*b*; ° तिलकव्रतं 24*a*; ° श्रीशिवपुराणे बिल्वरोहणे बिल्वरोटकव्रतं 26*a*.

अथ [द्वितीयाव्रतानि। अथ] कार्त्तिकशुक्लद्वितीयाया यमद्वितीया। ib.; इति हेमाद्रौ भविष्ये यमद्वितीयाविधिः 26*b*.

अथ तृतीयाव्रतानि 27*a*; इति मात्स्ये सौभाग्यशयनव्रतं 28*b*; ° हेमाद्रौ स्कांदे अरुंधतीव्रतं 31*b*; ° भविष्योत्तरे अक्षयतृतीयाव्रतं 32*b*; ° स्वर्णगौरीव्रतं 35*b*; ° हरितालिकाव्रतं 40*a*; ° वृहद्गौरीव्रतं 42*a*; ° सौभाग्यसुंदरीव्रतं 46*a*.

अथ चतुर्थीव्रतानि ib.; इति स्कांदे संकष्टचतुर्थीव्रतं 49*a*; ° दूर्वागणपतिव्रतं 50*a*; ° सिद्धिविनायकव्रतं 54*a*; ° गौरीचतुर्थीव्रतं 65*b*.

अथ पंचमीव्रतानि 65*b*; ऋषिपंचमीव्रतं 67*b*; ° नागदृष्टपंचमीव्रतं 72*b*; उपांललितात्रतं । इति ° पंचमीव्रतानि 79*a*.

DR.PUPNATHJI(DR.RUPAKNATH)

अथ षष्ठीव्रतानि ib.; इति हेमाद्रौ स्कांदे कपिलाषष्ठीव्रतं 82*b*; ० स्कंदषष्ठीव्रतं ॥ इति ० षष्ठीव्रतानि 83*b*.

अथ सप्तमीव्रतानि ib.; इति हेमाद्रौ भविष्योत्तरे अमुक्ताभरणसप्तमीव्रतं 88*b*; ० रथसप्तमीव्रतं 90*b*; ० अचलासप्तमीव्रतं 92*a*; ० पुत्रसप्तमीव्रतं ॥ 92*b*.

अथाष्टमीव्रतानि ib.; इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे बुधाष्टमीव्रतं 97*a*; ० दशाफलव्रतं 99*b*; जन्माष्टमीव्रतपद्धतिः 103*a*; ० जन्माष्टमीव्रतं 111*a*; भविष्योत्तरे ज्येष्ठाव्रतं 113*b*; महालक्ष्मीव्रतं 119*b*; अशोकाष्टमीव्रतं 124*b*.

अथ नवमीव्रतानि ib.; इति स्कंदपुराणे ० रामनवमीव्रतं 132*a*; दुर्गाभक्तितरंगिण्यां महाष्टमीमहानवम्योः पूजा 139*b*.

अथ दशमीव्रतानि ib.; इति भविष्योत्तर आशादशव्रतं 140*b*; ० दशावतारव्रतं 141*b*; इति मदनरत्ने गौपथब्राह्मणे विजयादशमीविधिः 143*a*.

अथैकादशीव्रतानि ib.; इति० निर्जलैकादशीव्रतं 154*a*; ० शयन्येकादशीव्रतं 155*a*; ० गोपद्मव्रतं 158*a*; ० उत्थापनमहोत्सवविधिः 159*b*; ० हेमाद्रौ भीष्मपंचकं 161*b*; ० वैतरणीव्रतं 162*b*; कृष्णैकादशीव्रतं 164*a*; ० उभयैकादशीव्रतं 166*b*.

अथ द्वादशीव्रतानि ib.; इति० हे० भ० अवंद्वादशीव्रतं 172*a*; ० भ० वामनजयंतीव्रतं 174*b*; ० मुरूपद्वादशीव्रतं 177*a*.

अथ त्रयोदशीव्रतानि ib.; इति भ० गोत्रैरात्रव्रतं 185*a*; ० भ० अशोकत्रिरात्रव्रतं 187*b*; ० शांतिप्रदोषव्रतं 191*b*; भ० अनंगत्रयोदशीव्रतं 194*a*.

अथ चतुर्दशीव्रतानि ib.; इति हेमाद्रौ नृसिंहपुराणे नृसिंहचतुर्दशीव्रतं 197*a*; ० अनंतव्रतं 207*b*; इति भ० कदलीव्रतं 210*b*; वैकुंठचतुर्दशी 211*a*; इति श्रीलिंगपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं 222*b*; ० स्कांदे शिवरात्र्युद्यापनं 224*a*.

० स्कांदे (ज्येष्ठपूर्णिमायां) सोद्यापनं सावित्रीव्रतं 233*a*; ० नारदीये गोपद्मव्रतं 235*a*; ० वाराहे कोकिलाव्रतं 241*b*; ० नारदीये कोकिलाव्रतोद्यापनं 242*b*; ० रक्षाबंधनविधिः 243*b*; ० शिवरहस्ये उमामहेश्वरव्रतं 249*b*; ० कोजागरव्रतं 253*a*; ० स्कांदोक्तमधोदयव्रतं 255*a*; इति भविष्ये सोद्यापनं सोमवत्यमावास्याव्रतं ॥ इति ० अमावास्यव्रतानि ॥ 260*a*.

अथ चातुर्मास्यादिव्रतानि 260*a*; इति श्रीभविष्योत्तरपुराणे चरलक्ष्मीव्रतं 265*a*; ० स्कांदे दानाफलव्रतं 267*a*; ० भविष्योत्तरे धारणपारणव्रतं 268*b*; ० विष्णुरहस्योक्तं मासोपवासव्रतं 274*a*; ० देवीपुराणे मलमासव्रतं 278*b*; इति मासव्रतानि 279*a*.

अथ वारव्रतानि 279*a*; इति सौरधर्मोक्तं सूर्यव्रतं 281*a*; ० स्कांदे आदित्यव्रतं 282*b*; ० स्कांदे सोमवारव्रतं 285*a*; ० हेमाद्रौ पाद्मे भौमवारव्रतं 288*b*; ० पद्मपुराणोक्तं मंगलव्रतं ॥ इति ० वासरव्रतानि ॥ 289*b*.

अथ संक्रांतिव्रतानि हेमाद्रौ स्कांदे। ib.; इति धान्यसंक्रांतिव्रतं 290*b*; लवणसंक्रांतिव्रतं ib.; रूपसं०, तेजसं० 291*a*; सौभाग्यसं०, तांबूलसं०, ० मनोरथसं० 291*b*; आयुःसं० 292*b*; ० संक्रांत्युद्यापनं 293*a*; इति घृतकंबलविधा 293*a*;

अथ व्यतिपातव्रतं वाराहे। ib.; इति व्यतीपातव्रतं 297*b*; इति लक्षपूजनविधिः 299*b*; ० भविष्योत्तरे० लक्षनमस्कारविधा 301*a*; ० वायुपुराणे लक्षवर्त्तिकथा 304*b*; ० अगस्त्यार्घविधिः 306*b*; ० सोद्यापनं अश्वत्थव्रतं 308*a*; ० पार्थिवलिंगोद्यापनं 309*b*; इति व्रतार्के तुलसीविवाहः ॥ इति श्रीमीमांसापाराचारयारीणभट्टशंकरसूरिसूनुभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के समाप्तमगमत् ॥ 310*a*.

Then follows an *anukramaṇikā* in *ślokas*, beginning:

व्रतार्के वितनग्रंथे सुग्रहार्थैविपश्चितं ।
बहून्प्रपंचितानर्थान्दर्शयामि यथाक्रमं ॥ ०

It ends:

सनिर्णयानि यानीह कथितानि व्रतानि तु ।
तेषां दुताग्रये भट्टशंकरो ऽनुक्रमं व्यधात् ॥
इति व्रतार्कस्यानुक्रमणीका नाम समाप्तव्रतार्कः ॥

The author wrote his *Kuṇḍoddyotadarśana* (or *Kuṇḍabhāskara*) in 1671 A.D. For the family tree see V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxxvi. [Dr. John Taylor.]

1685, 1686.

1630, 1631. Foll. 1–215, 216–426; size 9¾ in. by 4 in.; good Devanāgarī writing of 1796 A.D.; nine lines in a page.

Vratārka.

Colophon: इति श्रीमीमांसकभट्टश्रीमन्नीलकंठात्मजभट्टश्रीमच्छंकरकृतौ व्रतार्के अनुक्रमणिका समाप्तमगमत् ॥

[H. T. Colebrooke.]

DR.RUPNATHJI(DR.RUPAK NATH)

1687, 1688.

2360, 2361. Foll. 1–224, 225–452; size 10¾ in. by 5 in.; good Devanāgarī writing of the latter part of the last century; nine lines in a page.

The same work. [GAIKAWAR.]

1689, 1690.

2784, 2785. Foll. 1–177, 178–343; indifferent Devanāgarī writing of the latter part of last century; ten lines in a page.

The same work.

[COLL. OF FORT WILLIAM.]

1691.

2485. Foll. 397 (253–263 of which are missing); size 11 in. by 4¾ in.; Devanāgarī character, legibly written in 1705 A.D.; ten lines in a page.

Another copy of *Bhaṭṭa Śaṅkara's Vratārka*.

For other MSS. see Weber, Cat. Berl. nos. 1178–80; Rāj. Mitra, Notices, IX., p. 303; Bikāner Cat., p. 499; Burnell, Tanjore MSS., p. 138*b*. [?]

1692, 1693.

2196, 2197. Foll. 1–344, 345–667; size 11 in. by 5 in.; well written, in Devanāgarī, towards the end of the last century; ten lines in a page.

Vratarāja, another digest of matters relating to voluntary fasts and observances, highly esteemed in Western India, and compiled at Benares, in 1736, by *Viśvanātha* (*Daivajñaśarman*), son of *Gopāla*.

For an analysis of part of the work, see Aufrecht, Cat. Bodl., nos. 663, 664.

Vol. II. begins in the *ekādaśīvrata*.

[GAIKAWAR.]

1694, 1695.

2199, 2200. Foll. 1–342, 343–674; size 11 in. by 5¼ in.; fairly written, in Devanāgarī, about the end of last century; ten lines in a page.

The same work. [GAIKAWAR.]

1696, 1697.

2061, 2062. Foll. 1–344, 345–383; size 10¾ in. by 5 in.; legibly written, in Devanāgarī, about the end of last century; ten lines in a page.

The same work. [GAIKAWAR.]

1698.

773. Foll. 122; size 10 in. by 4½ in.; legibly written, in Devanāgarī, towards the end of last century.

Another MS. of the *Vratarāja*, differing considerably in its introductory verses, and omitting the one containing the date of its composition:

भवानीतनयाद्याद्यतनयानंददायक ।
ततः सर्वे जनाद्यौद्यौ हारीत् (?यतः सर्वो जनाद्यौघो
[ऽहारीत्) दुंढे नमो ऽस्तु ते ॥ १ ॥
जयति जयति काशी काशितज्ञानराशिः
शिवहरिहरधातृश्रीगणेशांबिकानां ।
निवसतिरियमाद्या तां भजध्वं भजध्वं
स्मरत नमत शुद्धां शुद्धये कीर्तयध्वं ॥ २ ॥
विलोक्य विविधान् ग्रंथाँल्लिख्यते सुजनाय वै ।
तन्निमित्तो मयारंभः किमज्ञातं मनोषिणः ॥ ३ ॥
चित्रा(*r.* चित्र)पावनजातीयशांडिल्यकुलमंडनः ।
गोपालात्मजदैवज्ञः संगमेश्वरसंस्थितः ॥ ४ ॥
नत्वा श्रीविघ्नराजं च गुरून् पितृपितामहान् ।
कुर्वे वै विघ्ननाशो ऽहं व्रतराजं सुविस्तरं ॥ ५ ॥
अथ व्रतराजप्रारंभः । ०

The MS. is incomplete, ending with the *śukla-ekādaśī-udyāpana*.

[H. T. COLEBROOKE.]

DR.RUPNATHJI DR.RUPAK NATH JI

1699, 1700.

2178, 2179. Foll. 1–320, 321–675; size 11 in. by 5 in.; clear Devanāgarī writing of the latter part of last century; eleven lines in a page.

The same work. [GAIKAWAR.]

1701.

1818. Foll. 489, two of which (221 and 222) are missing; size 12 in. by 5 in.; well written, in Devanāgarī; 11 or 12 lines in a page.

Another MS. of the *Vratarāja*, beginning in the same way as the *Vratārka*.

Dated: शके १६९५ वर्षे वर्तमानविजयनामसंवत्सरे आश्विनशुद्धपंचम्यां इंदुवासरे व्रतराज समाप्तमगमत् ॥

There are, besides, three leaves containing two separate tables of contents.

[DR. JOHN TAYLOR.]

1702.

1647. Foll. 164; size 9 in. by 4 in.; fairly written, in Devanāgarī, at the end of the last century; nine lines in a page.

Vratodyāpanakaumudī, a manual for the performance of *vratas* (especially the concluding rites) by *Śaṅkara*, son of *Vallāla Sūri*.

It begins:

नत्वा गणेशं संतुष्ये शंकरेण वितन्यते ।
मुदा पुराणविख्यातव्रतोद्यापनकौमुदी ॥

तत्र तावत्सर्वव्रतोपयोगित्वात् किंचिन्निर्णयादिकं लिख्यते । तत्र व्रतलक्षणं । अभियुक्तव्रतप्रसिद्धिविषयः संकल्पविशेष एव व्रतं । तत्र व्रतकालमाह हेमाद्रौ गार्ग्यः । ०

It ends: इति श्रीस्कंदपुराणे ईश्वरपार्वतीसंवादे ककैटिव्रतोद्यापनं संपूर्णं ॥ इति श्रीमच्चित्रपावनकुलाम्बिसंभवद्या(?घा)रोपनामकवल्लालसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौमुदी समाप्ता ॥

For another MS. of this treatise, see Rāj. Mitra, Notices, V., p. 132. For the same author's *Tīrthakaumudī*, ib., VII., p. 257.

[H. T. COLEBROOKE.]

1703.

838. Foll. 70; size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; seven lines in a page.

Saṃkalpakaumudī, a treatise on the mental resolve (*saṃkalpa*) to undertake some religious observance, by *Rāmakṛishṇa*. It begins:

प्रणम्य कमलाकान्तं देवचन्द्रपदाम्बुजं ।
तन्यते रामकृष्णेन रम्या संकल्पकौमुदी ॥

यद्यपि संकल्पपदं नानार्थं तथापि संकल्पः कर्म मानसं इत्यमरकोषे मानसं कर्म नूनःसंकल्पितत्वमाहार्यारोपविषयत्वं । यथा रुद्रयामले । न्यायेनोपार्जितं वित्तं मनसोपार्जितं तु वा ।
निवेदयेदिष्टदेवे भक्तिश्रद्धासमन्वितः ॥
निवेदनमेतत लाभार्थैक-विधातोस्तेन लाभयेदित्यर्थः । ०

It ends: इति छात्रपाठाय गुरुकल्पितं गृहं मठो न तु छात्रार्थं स्वत्वं आदित्याग्रहमतिथ्यादि मीमांसकैर्विग्रहस्वीकारे इष्टं तस्या देवतात्वं गम्यते ॥ इति सङ्कल्पकौमुदी समाप्ता ॥

For an analysis of the treatise, see Rāj. Mitra, Notices, IV., p. 222.

[H. T. COLEBROOKE.]

1704, 1705.

719, 720. Foll. 1–154, 155–709; size 15¾ in. by 5 in.; excellent, modern Bengalī handwriting; eight lines in a page.

Dānasāgara, a digest of matters relating to gifts, their special virtues and modes of consecration, compiled (with the assistance of *Aniruddha*), in Śaka 1091 (A.D. 1169), by *Rājā Vallāla Sena Deva* of Bengal, son of *Vijaya Sena*, and grandson of *Hemanta Sena*.

It begins (with the numbers supplied):

ये साक्षादवनीतलामृतभुजो वर्णाश्रमज्यायसां
येषां पाणिषु निक्षिपन्ति कृतिनः पाथेयमामुष्मिकं ।
यद्वक्त्रोपगताः पुनन्ति जगतीं पुण्यास्त्रिवेदीगिरस्
तेभ्यो निर्भरभक्तिसंभ्रमनमन्मौलिद्विजेभ्यो नमः ॥ १ ॥

इन्द्रो विश्वैकवन्द्यः श्रुतिनियमगुरुः क्षत्रचारित्रचर्या-
मर्यादागोत्रशैलः कलिचकितसदाचारसंचारसीमा ।
सद्वृत्तस्वच्छवर्णोज्ज्वलपुरुषगुणाच्छिन्नसंतानधारा-
वन्द्यैर्मुक्तामरश्रीर्निरगमदवनेर्भूषणं सेनवंशः ॥ २ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

तत्रालंकृतसत्पथः स्थिरघनच्छायाभिरामः सतां
स्वच्छन्दप्रणयोपभोगसुलभः कल्पद्रुमो जङ्गमः ।
हेमन्तः परिपन्थिपङ्कजसरःसङ्घस्य नैसर्गिकैर्
उन्नीतः स्वगुणैरुदात्तमहिमा हेमन्तसेनो ऽजनि ॥ ३ ॥

तदनु विजयसेनः प्रादुरासीन्नरेन्द्रो
दिशि विदिशि भजन्ते यस्य वीरध्वजत्वं ।
शिखरविनिहताज्ञा वैजयन्तीं वहन्तः
प्रणतिपरिगृहीताः प्रांशवो राजवंशाः ॥ ४ ॥

सर्वाशाः परिपूरयन्नुपचितश्रीर्दीनवारां घनैर्
आसारैरभिषिक्तनिर्मलयशःसानेयभूमण्डलः ।
दैन्योन्नायभूतानुकालजलदः सर्वोन्नरः क्ष्माभृतां
श्रीवल्लालनृपस्ततो ऽजनि गुणाविर्भावगर्भेश्वरः ॥ ५ ॥

वेदार्थस्मृतिसंकथादिपुरुषश्लाघ्यो वरेन्द्रीतले
निस्तन्द्रोज्ज्वलवीचिलासनयनः सारस्वतं ब्रह्मणि ।
षट्कर्मोभवदाढ्यशीलनिलयः प्रख्यातसत्यव्रतो
वृत्तारेरिव गोप्यतिर्नरपतेर्यस्यानिरुद्धो गुरुः ॥ ६ ॥

अधिगतसकलपुराणस्मृतिसारः श्रद्धया गुरोरस्मात् ।
कलिकल्मषावसादं दाननिवन्धं विधत्ते कामो ऽपि*॥ ७॥

दुरधिगमधर्मनिर्णयविषयाध्यवसायं संशयस्तिमितः ।
नरपतिरयमारेभे ब्राह्मणचरणारविन्दपरिचर्यां ॥ ८ ॥

श्रुश्रूषापरितोषितैरविरतं संभूय भूदेवतैर्
दत्तामोघवरप्रसादविषदस्वान्तस्खलंसंशयः(?) ।
श्रीवल्लालनरेश्वरो विरचयत्येतं गुरोः शिष्यया
स्वप्रज्ञावधिदानसागरमयं श्रद्धावतां श्रेयसे ॥ ९ ॥

भूयो भूयः प्रणम्य क्षितिवलयमिलन्मौलिवन्द्यौ द्विजेन्द्रौ
श्रीमद्वल्लालसेनः स्थविर(वि)नयनिबद्धाञ्जलिर्याचते वः।
काले काले भवद्भिः स्मृतसुकृतलवैः पालनीयो ममायं
सामान्यः पुण्यभाजां भवजलधिमहासेतुवन्धो निवन्धः
[॥ १० ॥

ब्राह्मं वाराहमाग्नेयं भविष्यं मात्स्यमेव च ।
वामनं वायवीयं च मार्कण्डेयं च वैष्णवं ॥ ११ ॥

शैवं स्कान्दं च पाद्मं च पुराणं कौर्ममेव च ।
पुराणानि तथा कूर्मपुराणादिपुराणयोः ॥ १२ ॥

उक्तान्युपपुराणानि व्यक्तदानविधीनि च ।
आद्यं पुराणं शाम्बं च कालिकाह्वयमेव च ॥ १३ ॥

नन्दिमादित्यसंज्ञं च नारसिंहं तथैव च ।
मार्कण्डेयकृतं तद्वद् विष्णुधर्मोत्तराह्वयं ॥ १४ ॥

शास्त्रं च विष्णुधर्माख्यं गोपथब्राह्मणश्रुतिं ।
श्रीरामायणमाख्यानं महाभारतसंहितां ॥ १५ ॥

मनुं वशिष्ठं संवर्त्तं याज्ञवल्क्यं च गौतमं ।
कात्यायनं च जाबालं व्यासं दानं बृहस्पतिं ॥ १६ ॥

वृद्धं वशिष्ठं हारीतं पुलस्त्यं विष्णुमेव च ।
शातातपं यमं योगियाज्ञवल्क्यं च देवलं ॥ १७ ॥

बौधायनं चाङ्गिरसं दानव्यासं बृहस्पतिं ।
द्वौ शङ्खलिखितावापस्तम्बं शाङ्खायनं तथा ॥ १८ ॥

महाव्यासं लघुव्यासं लघुहारीतमेव च ।
छन्दोगपरिशिष्टं च कात्यायनमशेषतः ॥ १९ ॥

इत्यालोच्य पुराणोपपुराणश्रुतिसंहिताः ।
समाहृतानि दानानि निवन्धस्यास्य सिद्धये ॥ २० ॥

महादानानि कीर्त्यन्ते तत्रादौ षोडश क्रमात् ।
पर्वतानां च दानानि दशैव तदनन्तरं ॥ २१ ॥

ततो गुडादिधेनूनां चत्वारिंशदनुक्रमात् ।
लक्षोनानि दानानि वध्यन्ते ऽत्र यथाविधि ॥ २२ ॥

अलंकृतानां पञ्चाशच्चत्वारिंशन्नवाथ ।
दानान्यलंकृतगवीसमूहस्य ततस्त्रिधा ॥ २३ ॥

ततो ऽनलंकृतगवीदानानि दश पञ्च च ।
तथानलंकृतगवीसमूहस्य च सप्तधा ॥ २४ ॥

अलंकृतानां दानानि वृषाणामष्टधा तथा ।
ततो ऽनलंकृतानां तु दश दानानि पञ्च च ॥ २५ ॥

गवाह्निकप्रदानानि दशधा तदनन्तरं ।
भूमेर्दानानि कीर्त्यन्ते पञ्च पञ्चाशदेव तु ॥ २६ ॥

आसनस्य प्रदानानि षडेतन्नदनन्तरं ।
ततो वारिप्रदानानि षट्त्रिंशदिह संख्यया ॥ २७ ॥

तैजसानां च पात्राणां दश दानान्यनन्तरं ।
दानानि जलयात्राणां ततश्च नव संख्यया ॥ २८ ॥

ततो ऽन्नस्य प्रदानानि त्रिचत्वारिंशदेव तु ।
ततस्तोयेव भक्षस्य पञ्चधा लवणस्य च ॥ २९ ॥

ततो घृतस्य सप्तैव त्रीणि दध्नस्तदनन्तरं ।
क्षीरस्य च ततस्त्रीणि पञ्च चैक्षववस्तुनः ॥ ३० ॥

पानकस्याथ चत्वारि फलानां नवधा ततः ।
ततश्चत्वारि मधुनो ऽभ्यङ्गस्य षडनन्तरं ॥ ३१ ॥

त्रयोदशाथ गन्धस्य ततो धूपस्य पञ्चधा ।
अनुलेपनदानानि चत्वारि तदनन्तरं ॥ ३२ ॥

* ? l. विधत्ते ऽपि, or निवन्धुकामो ऽपि. The MS. reads विधत्ते (marg. विनुत्ते) कामोमो ऽपि ॥

DR.RUPNATHJI(DR.RUPAK NATH)

अष्टौ (नव corr.)पुष्पस्य वस्त्राणां पञ्चविंशतिस्ततः।
त्रीणि यज्ञोपवीतस्य दानानि तदनन्तरं ॥ ३३ ॥

सुवर्णस्याथ दानानि सप्तविंशदनुक्रमात् ।
रजतस्य च दानानि चत्वारि तदनन्तरं ॥ ३४ ॥

सामान्यदेवताभ्यस्तु चतुर्विंशं यथाक्रमात् ।
अलंकारस्य चत्वारि वर्णस्य नवधा ततः ॥ ३५ ॥

गृहाणां चैव दानानि ततः सप्तदशैव तु ।
नव प्रतिश्रयस्याथ शय्यायास्तु ततो नव ॥ ३६ ॥

इन्धनस्याथ चत्वारि दीपस्यैकोनविंशतिः ।
दानानि च पुराणानामेकोनविंशतिस्ततः ॥ ३७ ॥

नानाविधानां विद्यानां चतुर्विंशतिरेव च ।
त्रिंशद्दानानि कन्यानां प्रेष्याणां तु ततो दश ॥ ३८ ॥

शस्यानामथ दानानि पञ्चविंशतिरेव च ।
तिलस्य दश दानानि तथारामस्य पञ्चधा ॥ ३९ ॥

कीर्त्यन्ते षोडशैवात्र वृक्षस्य तदनन्तरं ।
संभारस्याथ चत्वारि पशूनामष्टधा ततः ॥ ४० ॥

कृष्णाजिनस्य सप्तापि च्छत्रस्य दश पञ्च च ।
कीर्त्यन्ते पञ्चदशधा ततो दानान्युपानहः ॥ ४१ ॥

तथा द्वादश यानानां चत्वारि करिणामथ ।
द्वादशाश्वस्य दानानि चत्वारि महिषस्य च ॥ ४२ ॥

अष्ट चारोग्यदानानि कीर्त्यन्ते तदनन्तरं ।
अभयस्य च दानानि चयस्त्रिंशत्ततः [illegible] ॥ ४३ ॥

सूर्यादिवाररहितान्येकादशमतः परं
मासोपलक्षितेष्वत्र दिनेषु नियतेष्वथ ॥ ४४ ॥

सप्तमीः परिकीर्त्यन्ते दानान्यि तदनन्तरं ।
मासेष्वनियतेष्वत्र नियतासु तिथिष्वथ ॥ ४५ ॥

क्रमाद्दानानि कीर्त्यन्ते नानारूपाणि विंशतिः ।
मासतिथ्योर्नियतयोस्त्रिपञ्चाशदनन्तरं ॥ ४६ ॥

चतुर्दश च नक्षत्रनियतासु तिथिष्वथ ।
ततो नक्षत्रविहितान्यष्टौ पञ्चाशदेव तु ॥ ४७ ॥

मासव्यापीनि दानानि षडेव तदनन्तरं ।
रविसंक्रमणेष्वेवमेकोनविंशदेव तु ॥ ४८ ॥

धातृपदिष्टानि ततो दानानि दश पञ्च च ।
वत्सरादिप्रदानानि सप्तैव तदनन्तरं ॥ ४९ ॥

विप्रकीर्णानि दानानि त्रिपञ्चाशदनन्तरं ।
सामान्यदेवताभ्यस्तु चतुर्विंशतिधा ततः ॥ ५० ॥

एको(r. एक)न्यूनानि सूर्याय चत्वारिंशदनन्तरं ।
महेश्वराय दानानि ततः सप्तदशैव तु ॥ ५१ ॥

विष्णवे चैव दानानि चतुर्विंशशतं ततः ।
विच्छिद्य पञ्चसप्तत्या वर्त्तिरेका पृथक्कृतैः ॥ ५२ ॥

नानामुनिप्रवचनामृतनिर्यासराशिभिः ।
पञ्चसप्ततिसंयुक्तत्रयोदशशतं मितैः ।
दानैर्निरूप्य यत्नेन नानागमसमाकृतः ॥ ५३ ॥

विद्वत्सभाकमलिनीराजहंसेन भूभुजा ।
श्रीमद्बल्लालसेनेन कृतो ऽयं दानसागरः ॥ ५४ ॥

जलाशयानां दानानि तथा च सुरवेश्मनां ।
नोक्तानि कस्यचिदुक्तानि प्रतिष्ठासागरे यतः ॥ ५५ ॥

श्रुतान्यतिपुराणे तु दानान्यष्टविभागतः ।
आचारसागरोक्त्वात्र कीर्त्यन्ते ऽत्र कृत्स्नशः ॥ ५६ ॥

भागवतं च पुराणं ब्रह्माण्डं चैव नारदीयं च ।
दानविधिशून्यमेतत्त्रयमिह न निबन्धमवधार्यं ॥ ५७ ॥

बृहदपि लिङ्गपुराणं मत्स्यपुराणोदितैर्महादानैः ।
अवधार्यं लघ्वसारं (?)दानानिबन्धेतरनिबन्धं ॥ ५८ ॥

सप्तम्यवधिपुराणं भविष्यमपि संगृहीतमतियत्नात् ।
त्यक्ताष्टमीनवम्योः कल्पौ पाषण्डिनिर्ग्रन्थौ ॥ ५९ ॥

लोके प्रसिद्धमेतद्विष्णुरहस्यं च शिवरहस्यं च ।
द्वयमिह न परिगृहीतं संग्रहरूपत्वमवधार्यं ॥ ६० ॥

भविष्योत्तरमाचारप्रसिद्धनविरोधि च ।
प्रामाण्यं ज्ञापकादृष्टैर्न्यादस्मात्पृथक्कृतं ॥ ६१ ॥

प्रचरद्रूपतः स्कन्दपुराणैकांशतो ऽधिकं ।
यत्स्वल्पचित्रयं पौरुषरेवावनिकथाश्रयं ॥ ६२ ॥

तार्क्ष्यं पुराणमपरं ब्राह्मनाग्नेयमेव च ।*
त्रयोविंशतिसाहस्रं पुराणमपि वैष्णवं ॥ ६३ ॥

षट्साहस्रमितं लिङ्गं पुराणमपरं तथा ।
दोषाप्रतिष्ठापाषण्डमुक्तिरत्नपरोक्षशैः ॥ ६४ ॥

मृषा वंशानुचरितैः कोषव्याकरणादिभिः ।
असंगतकथाबन्धपरस्परविरोधतः ॥ ६५ ॥

तन्मोनकेतनादीनां भण्डपाषण्डलिङ्गिनां ।
लोकवञ्चनमालोक्य सर्वमेवावधीरितं ॥ ६६ ॥

तत्तत्पुराणोपपुराणसंख्यावहिष्कृतं कल्पकमेयोगात् ।
पाषण्डशास्त्रानुमतं निरूप्य देवीपुराणं न निबद्धमत्र॥६७॥

* Colebrooke notes in the margin: 'Interpolation. See quotation in *Vardhamāna's Tattvāmṛita.*'

DR.RUPNATHJI(DR.RUPAKNATH)

ये दानधर्मविधिसंस्तुतये पुराणपुण्या-
गमस्मृतिगिरां बहवो विवक्षाः ।
ते ग्रन्थविस्तरभयादविचिन्त्य केचि-
दस्माभिरत्र कथित[ा]: कलयन्तु सन्तः ॥ ६८ ॥

एवं निरूप्य यत्नेन प्रारब्धे दानसागरे ।
आदौ ब्राह्मणमाहात्म्यं ततो दानगुणस्तुतिः ॥ ६९ ॥

पात्रप्रशंसा पात्राणामपवादस्ततः परं ।
दानस्वरूपं कर्त्ता च श्रद्धादानविधि प्रति ॥ ७० ॥

दानस्य कालदेशाश्च देयस्य च निरूपणं ।
अपवादश्च दानानामसंधाननिरूपणं ॥ ७१ ॥

ततो दानस्य च विधिः प्रतिग्रहविधिस्ततः ।
सचैतः परिभाषा चेत्यर्थाः पञ्चदश क्रमात् ।
निरूप्य मुखबन्धार्थं वक्ष्यन्ते ऽत्र महीक्षिता ॥ ७२ ॥

अथ ब्राह्मणप्रशंसा । °

Tho *purāṇadāna* is dealt with at fol. 191*b* ff., where the eighteen Purāṇas are enumerated, their extent stated and tho merits attaching to gifts of copies of them set forth, in accordance with a passago from the *Matsyapurāṇa*.

The colophon runs thus: इति महाराजाधिराजनि:-शङ्कमङ्करश्रीमद्बल्लालसेनविरचिते श्रीदानसागरे वसुदेवसंवादे नकदानावर्त्तः ॥

धर्मस्याभ्युदयाय नास्तिकपदोच्छेदाय जातः कलौ
श्रीकान्तो ऽपि सरस्वतीपरिवृढः प्रत्यक्षनारायणः ।
पादाम्भोजनिषण्णविश्वसुधासाम्राज्यलक्ष्मीपुतः
श्रीवल्लालनरेश्वरो विजयते सद्वृत्तरत्नामणिः ॥

ब्रह्मपुराण वराहपुराण अग्निपुराण भविष्यपुराण मत्स्यपुराण वामनपुराण वायुपुराण मार्कण्डेयपुराण विष्णुपुराण शिवपुराण स्कन्दपुराण पद्मपुराण कूर्मपुराण शाम्बपुराण कालीपुराण देवीपुराण नन्दिपुराण आदित्यपुराण नरसिंहपुराण लिङ्गपुराण महाभारत श्रीभागवत श्रीरामायण विष्णुधर्मोत्तर छन्दोगपरिशिष्ट लघुहारीत बौधायन शाङ्खायन मनु याज्ञवल्क्य देवल पैठीनसि कात्यायन शातातप दानव्यास दक्ष देवल वशिष्ठ बृहस्पति यम हारीत पुलस्त्य जाबाल आङ्गिरस आपस्तम्ब महाव्यास लघु-व्यासाः ॥ एतेषां ग्रन्थानां मतमालोच्य श्रीवल्लालसेनदेवेन दानसागरः कृतः ॥ इति दानसागरः समाप्तः ॥

Then follow five leaves containing a tablo of contents up to fol. 292*b*.

On the second page of the fifth leaf the authorities are repeated with numbers after them, the *Devīpurāṇa* and *Śrī-Bhāgavata* being omitted. Then follows:

अथ वङ्गदेशीयराज्ञामनुक्रमेण नामानि । तत्र प्रथमं हेम-न्तसेनः १ ततः विजयसेनः ततो बल्लालसेनः तेन दानसागरः कृत इति ॥ अस्य गुरुः अनिरुद्धः ॥ अत्र सम्वत्सरादिसमयवि-शेषपरिचयाय दानसागरनिर्माणवंशस्यैव सम्वत्सरत्वप्रतिपादनाय लिख्यते । निखिलभूपचक्रतिलकश्रीमद्बल्लालसेनदेवेन पूर्वे शशिनवदशमित १०९१ शकवर्षे दानसागरो रचितः ॥

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 151 (where tho date is made to be Śaka 1019); for a different work of the same title (by *Mahārāja Kāmadeva*), ib., VI., p. 239. [H. T. Colebrooke.]

1706, 1707.

260, 261. Foll. 253 and 289 (the latter numbered 254–498, 490–532); size 9¾ in. by 5½ in.; written, in Devanāgarī, by several hands, in the last century; 12–18 lines in a page.

Dānaratnākara, a comprehensive treatise on gifts, compiled, under directions of King *Anūpa Siṃha*, of Jodhāpur in Marvār, by *Bhaṭṭa Rāma* (with the family name of *Hosiṅga*), son of *Bhaṭṭa Viśvanātha*, and grandson of *Bhaṭṭa Mudgala*. It begins:

शर्वाणीतनयं देवं सर्वाभीष्टप्रदायकं ।
वंदे मंदेतरप्रज्ञाकारणं वारणाननं ॥ १ ॥

कापि कल्पलतिकेव कवीनां
या मतिं वितरतीह नवीनां ।
राजहंसविहितासनां सतीं
तां भजामि वरदां सरस्वतीं ॥ २ ॥

मोचनं सर्वपापानां शशिसूर्यविलोचनं ।
करुणावरुणावासं लक्ष्मीनारायणं नुमः ॥ ३ ॥

विस्फूर्जच्चंद्रहासप्रतिहतरिपुणा प्राज्यसाम्राज्यभाजा
ख्यातं जोधापुरं तद्गुरुमरुविषये येन धात्रेव सृष्टं ।
वीराणामग्रगण्यः प्रबलभुजबलाक्रांतभूमंडलः स
श्रीमान्सूर्यान्वये ऽभून्नृपमुकुटमणी रावयोधाभिधानः ॥ ४ ॥

DR.RUPANATHJI(DR.RUPAK NATH)

तत्सूनुः प्रथितो ऽभवत्पृथुसमो वीकाख्यया विक्रमी
राजाजानुभुजो ऽखिलक्षितिभुजां मान्यो वदान्योत्तमः ।
पित्र्यं मानभरादुपेक्ष्य नगरं यः स्वीयनाम्नाकरोद्
वीकानेरमिति प्रतीतमपरं व[ा]सुं महाजांगले ॥ ५ ॥

तस्माच्छ्रीलोनकर्णः समजनि विजयी शस्त्रशास्त्रप्रवीणो
ज्ञाता दाता दयालुर्दिशि दिशि कविभिर्गीयमानोरु-
[कीर्तिः ।
छत्राधीशैरसह्यान्दहत इव ततुं मंत्रवन्नामवर्णान्
आकर्ण्याकर्ण्य कर्णे प्रतिभटभुजगैः स्तंभ एवावृतो ऽभूत्
[॥ ६ ॥
जयसिंहस्तस्मादभवदवनीपालतिलको
न को ऽपि स्यातुं यत्पुरत इह शक्तः किल रणे ।
यदीये तेजोऽग्नौ ज्वलति परितो वैरिसुदृशां
व्यवर्धताश्वर्यं नयनकमलेभ्यो जलसराः ॥ ७ ॥

रणोद्भटद्वेषिनिखातशस्त्रः
कल्याणमल्लः क्षितिपस्ततो ऽभूत् ।
कल्याणवान्येन समस्तधन्वा
यो जागरूको निशमान्नधन्वा ॥ ८ ॥

ततो रायसिंहो ऽभवद्भूमिपालः
प्रतिस्पर्धिकालः प्रतापी कराल: ।
मतौ यो विशालः किलात्युच्चभालः
सदंतमरालः स्फुरत्कीर्तिजालः ॥ ९ ॥

आसीत्तस्माद्विलासी प्रतिबलदलनः साहसी शूरसिंहः
शूरः क्रूरस्वभावः किल सकलकलाकौशलं संदधानः ।
पुण्यागण्यप्रभावा सुरसरिदिव यत्कीर्तिरुच्चस्वरूपा-
कूपारं संप्रयाता ह्यपरिमितमुखैश्चैः प्लुवाना धरित्रीं ॥ १० ॥

सौंदर्यादतिदानतो ऽप्यनुगतामाख्यां समाख्यापयन्
विख्यातो नृपतिस्ततः समभवत्कर्णो गुणार्णोनिधिः ।
श्रीनारायणपादपंकजयुगाभ्यर्चाप्रभावस्फुरत्-
साम्राज्यप्रतिनंदितार्थिनिवहः स्वातंत्र्यमुच्चैर्भजन् ॥ ११ ॥

वादैः पंडितमंडलीविरचितैः काव्यैः कदाचित्कवि-
प्रारब्धैः सरसैस्तथा नटगणैः संगीतसंगीतकैः ।
आलापैर्भिषजां परस्परमथ ज्योतिर्विदां चर्चया
प्रीतिं नीतिपरो वहन्मरुमहीराज्यं स चक्रे महत् ॥ १२ ॥

तत एष महाननूपसिंहो
मरुदेशाधिपतिः स्फुरत्प्रतापः ।
अभवन्मतिमान् प्रभुर्मनस्वी
यशसा व्याप्तजगत्त्रये ऽतिशूरः ॥ १३ ॥

आक्रांते यवनैरिहावनितले दांतात्मनां द्वेषिभिर्
ध्वस्ते वेदपथे ऽप्युपेयुषि तथा धर्मे कथाशेषतां ।
धीरो धर्मधुरंधरः क्षितिभुजां दुष्टात्मनां शासिता
वीरः श्रीमदनूपसिंहनृपतिर्धात्रा धरित्र्यां कृतः ॥ १४ ॥

पात्रेभ्यो यः समस्तान्यपि कनकतुलादीनि दानानि नित्यं
प्रादाद्यो ऽतिप्रतापी जगदिदममुचत्किंच दारिद्र्यदावात् ।
तेन क्षोणीशचूडामणिखचितपदानूपसिंहेन राज्ञा
ग्रन्थो ऽयं दानरत्नाकर इति सुधिया तन्यते प्राज्ञहेतोः
[॥ १५ ॥

मीमांसाद्वयपारगः श्रुतिषु यः सांगासु च ज्ञानवान्
न्यायोद्भावनतीक्ष्णधीः किल वरेण्यो धर्मशास्त्रबुद्धौ ।
होसिंगान्वयभूषणं द्विजवरं तं रामभट्टाभिधं
सत्कृत्य प्रणयात्मयुक्तसुधियं ग्रंथे ऽत्र सो ऽयं नृपः ॥ १६ ॥

तदाज्ञयासौ बुधरामभट्टो विचार्य तत्त्वेन महानिबंधान् ।
नानायुक्तिग्रथनप्रकारैरेनं प्रबंधं विशदीकरोति ॥ १७ ॥

मया पूर्वं कृताः पंच ग्रंथा राजनियोगतः ।
चमत्कारकरास्ते च यथाबुद्धतिसोज्ज्वलाः ॥ १८ ॥

आद्यो ऽनूपविवेकाख्यः शालग्रामपरीक्षणे ।
ततो ग्रंथो ऽनन्यः पूर्वैः सहस्रद्वयसंमितः ॥ १९ ॥

संतानविषये सम्यक् नवसाहस्रिको ऽपरः ।
संतानकल्पलतिका तस्याख्यैव शुभप्रदा ॥ २० ॥

तत्संख्यया कौतुके च ह्यनूपकुतुकार्णवः ।
कृतो ग्रंथस्तृतीयो ऽयं साधकानां हिताय च ॥ २१ ॥

विघ्नबाधानिवृत्त्यर्थमुपायानां प्रदर्शकः ।
सार्धत्रिभिः सहस्रैश्च संमितो ऽयं चतुर्थकः ।
शिष्टानां संमतो नूनमस्याख्या स्मृतमंजरी ॥ २२ ॥

चतुःसहस्रसंख्यातः कृतो ग्रंथस्तु पंचमः ।
चिकित्सामालतीमाला तस्याख्यान्वर्थिकी शुभा ॥ २३ ॥

एवं पंच कृता ग्रंथा नानाशास्त्रगताश्च ते ।
इदानीं क्रियते सम्यग् दानरत्नाकराभिधः ॥ २४ ॥

दानरत्नाकरे ह्यस्मिन्ग्रंथे ऽगाधे ऽतिदुस्तरे ।
दानरत्नान्यनेकानि महांत्यपि लघूनि च ॥ २५ ॥

दानांगानि तदंगानि सप्रयोगाणि यानि च ।
निमग्नानीति नो भांति क्रमशस्तान्ययत्नतः ॥ २६ ॥

प्राप्त्यर्थं तन्यते तावन्मयानुक्रमणी शुभा ।
वंशानुक्रमणं पूर्वं कृतं मंगलपूर्वकं ॥ २७ ॥

DR.RUPANATHJI(DR.RUPANATH)

राजानूपक्षितीशस्य निबंधे यः प्रयोजकः ।
होसिंगाख्याभिधो रामः कर्ता ग्रंथस्य दर्शितः ॥ २८ ॥
दुर्लक्षणनिरासेन कृतं दानस्य लक्षणं ।
स्वत्वस्य लक्षणं प्रोक्तं स्वत्वोत्पत्तेश्च कारणं ॥ २९ ॥
दत्तद्रव्यापहरणे दोषसंकीर्तनं कृतं ।
चतुर्विधविधानां च साकल्येन निरूपणं ॥ ३० ॥
अधिकारप्रसंगेन विचारो बहुशः कृतः ।
नित्यनैमित्तिकादीनां कृतं सम्यङ्निरूपणं ॥ ३१ ॥ °

The *anukramaṇikā* occupies about 200 *ślokas;* after which:

अथ दानस्यात्र प्रतिपाद्यत्वात्तस्य स्वरूपलक्षणमंतराप्रतिपादनं न संभवतीति दानलक्षणं तावदुच्यते ॥ °

इति ° प्रशंसा fol. 20*a*; ° सर्वविधदानस्वरूपनिरूपणप्रकरणं fol. 23*a*; ° दानांगप्रकरणं fol. 48*a*; ° परिभाषाप्रकरणं fol. 118*a*; ° उपोद्घातः fol. 130*a*; अथ दानानि प्रतिपाद्यंते fol. 131*a*. It ends:

मीमांसारत्नमाला विलसति हृदये यस्य बुद्धिः प्रबुद्धा
श्रद्धालुर्धर्मसिंधौ वितरणचतुरस्तारको यः परेषां ।
मात्सर्यं यस्य चित्ते न भवति सहसा ब्राह्मणाग्र्यो ऽत्र वेद्यः
सो ऽस्मिन्ग्रंथे नवीने क्षितिपविरचिते हृष्टचित्तः
[प्रभूयात् ॥

स्वस्ति श्रीमत्सकलभूमंडलदिङ्मंडलमंडणनिजभुजार्जितप्रतापासादितसकलसाम्राज्यभाजनस्वपदच्युतसंस्थापितानेकमंडलाधीश्वरसकलसामंतचक्रचूडामणिकिरणरंजितचरणारविंदमहाराजाधिराजमहाराजानूपसिंहाज्ञया होसिंगोपनामकभट्टमुद्गलांगज-भट्टविश्वनाथात्मजभट्टरामविरचिते दानरत्नाकरे कर्मविपाकोक्तदानानि समाप्तश्चायं निबंधः ॥

For another MS. of this work (where, by mistake, the patron is called *Bhūpa Siṃha*), see Bikāner Cat., p. 374. For another work of the same title (by *Caṇḍeśvara*), see above, no. 1388.

An *Anūpa Siṃha* figures as the patron of several other works, *e.g.* the *Anūpavilāsa*, by *Maṇirāma* (Bikāner Cat., p. 360), the *Ayutalaksha-Homaprayoga*, by *Bhadrarāma* (ib., p. 365); the *Śrāddhaprayogacintāmaṇi* (ib., p. 471); the *Anūpa-Saṃgītavilāsa*, by *Bhāva Bhaṭṭa* (ib., p. 510).

[H. T. Colebrooke.]

1708.

50. Foll. 332; size 9 in. by 3¾ in.; fairly written, in Devanāgarī, by two or three different, modern hands; ten lines in a page.

Dānahīrāvalīprakāśa, a compendium of matters relating to gifts, compiled by *Divākara*, son of (*Bhāradvāja*) *Mahādeva;* and supplied with a versified summary of its contents, by the author's younger son, *Vaidyanātha*.

The author wrote his *Ācārārka* in 1686 A.D. (see nos. 1616–18).

It begins:

पद्मिनीरमणदीधितिकाशकारणं पाकशासनदिशो विभूषणं ।
यज्ञकर्मचयहेतुमन्वहं भावये द्युमणिदेवमन्वहं ॥ १ ॥
रत्नसानुसमकमनीयमपूर्वं स्नानदानजपसंमुखपूर्वं ।
सेवितं पितृमुखैर्मम पूर्वैः तन्ममास्तु हृदये मतिपूर्वं ॥ २ ॥
भवभीतिहरं सुरेश्वरं जगतां कारणकारणं परं ।
अविमुक्तपुराधिवासिनं शिवमीडे प्रणतार्त्तिभंजनं ॥ ३ ॥
श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो महान्
येनाकार्यविमुक्तके सुविधिना विश्वेश्वरस्यापना ।
तत्पुत्रो विबुधाधिपः क्षितितले श्रीशंकरस्तत्सुतो
जीवेंद्रारिपुरोहितामलमतिः श्रीनीलकंठाभिधः ॥ ४ ॥
तत्पुत्रोतनयो दिवाकरकृतौ शास्त्रेष्वधीतौ पितुर्
मीमांसानयकोविदः पुरभिदः क्षेत्राधिवासी सुधीः ।
सद्विद्याविनयादिसद्गुणगणग्रामाभिरामान्गुरून्
देवं चोणकरं प्रणम्य तनुते श्रीदानहीरावलिम् ॥ ५ ॥

ननु हेमाद्यादिषु सत्सु नायमुद्यमस्तव सफल इति चेद्विद्वदविद्वत्साधारणसंक्षेपप्रदर्शनार्थमित्यवधारणपात्रे स्वसन्नात्यागपूर्वकः °

इति श्रीमुक्तावलीप्रकाशकारभारद्वाजमहादेवसूरिसूनुसकलविद्यानिधानश्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ दानहीरावल्यन्तीप्रकाशे(!)दानोपयोगी(*r.* ग)निर्णयः fol. 11*b*.

इति श्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ दानहीरावलीप्रकाश आशौचनिर्णयः fol. 88.

The work ends fol. 325*b*: इति श्रीमद्भारद्वाजमहादेवभट्टात्मजसकलविद्यानिधानश्री-
दिवाकरविरचिते धर्मशास्त्रसुधानिधौ ।
दानहीरावलिग्रंथे ऽनुक्रमं व्यादधात्स्वयं ॥ [१] ॥

DR.RUPAKNATH(DR.RUPAKNATH)

मंगलाचरणं पूर्वं मातृवंश्यनुवर्णनं(?मातृवंशानु°)।
दानलक्षणमत्रोक्तं विधिकारिण एव च ॥ २ ॥ °

इत्थं दिवाकरसुतेन कनीयसा श्री-
रामानुजेन गुरुभक्तिपरायणेन।
श्रीतातपादरचिते सुजनप्रिये ऽस्मिन्
ग्रंथे क्रमो विलिखितः सवितुः प्रसादात् ॥ ११३ ॥

इति श्रीमद्भारद्वाजदिवाकरसूरिसुतवैजनाथशर्मविरचिता दानहीरावलीप्रकाशानुक्रमणिका समाप्ता ॥ श्रीरविः ॥ श्रीतिथ्यार्काचाराकौ श्राद्धप्रायश्चित्ते प्रतिष्ठा च संस्काराशौचयुक्तौ दानग्रंथो दिवाकराज्ज्ञातः ॥ १ ॥

[H. T. Colebrooke.]

1709.

1756. Foll. 82; size 8½ in. by 3½ in.; legibly written, in Devanāgarī; 12–14 lines in a page.

Dānacandrikā, a manual of rules regarding pious donations, by *Bhaṭṭa Divākara*, surnamed *Kāla*, of Benares, son of *Bhaṭṭa Mahādeva* (son of *Bālakṛishṇa*?) and *Gaṅgā* (daughter of *Bhaṭṭa Nīlakaṇṭha*, author of the *Mayūkhas*).

It begins:

प्रणम्य मातरं गङ्गां भैरवं वनशङ्करं।
महादेवाख्यपितरं श्रीतस्मार्तविशारदं ॥ १ ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः।
शिष्टानां तन्यते तुष्यै दानसंक्षेपचंद्रिका ॥ २ ॥

तत्र परस्वत्वो[त्प]त्त्यंतो द्रव्यत्यागो दानं। देवलः। °

इति प्रतिग्रहस्थानानि। अथादौ तुलापुरुषदानं fol. 5*a*; इति ° तुलाकल्पलक्षणं 7*a*; ° घृतादितुलादानफलं 9*a*; ° नानारोगनिरासार्थं द्रव्यविशेषतुलाः 9*b*; इति श्रीदानोद्योतदानरत्नदानमयूखाद्यनुसारेण च कालोपनामकभट्टदिवाकरकृतदानसंक्षेपचंद्रिकायां ताम्रघृतादितुलापुरुषदानप्रयोगः 13*b*; ° गोसहस्रदानप्रयोगः 14*b*; गोशतदान ° 15*b*; गोदशदान 16*a*; इति दश महादानानि 32*a*; इति (दश) गोदानानि 45*a*; इति भूमिदानं, तिलदानं, हिरण्यदानं 45*a*; इति मंदाग्नित्वहरं मेषदानं 43*a*; इति दशाचलदानानि 55*b*; ° नानाशिखरदानानि 56*b*; त्रिशूलदानं 57*a*; दारिद्र्यहरं धनदमूर्तिदानं 57*b*; लक्ष्मीनारायणमूर्तिदानं, हरिहर°, सूर्य°, गणपति°, गणेश°, सरस्वतीमूर्तिदानं 58*a*, etc.; इति घंटादानं, शंखदानं 59*a*; कालचक्रदानं, कालपुरुषदानं 59*b*; कृष्णाजिनदानं 61*b*; शय्यादानं, शयनदानं 62*a*; वस्त्रदानानि 63*b*; ° पात्रदानानि 64*b*; पुस्तकदानं 65*b*; रत्नदानानि 66*a*; ° हेमंते अग्निदानं, दीपदानं, पांथपरिचर्या 67*a*; गोपरिचर्या, धनघटदानं 67*b*; कलशदानं, यज्ञोपवीतदानं 68*a*; अथ मासदानानि 68*a*; ° संक्रांतिदानानि 69*b*; अथ नानाधान्यदानमंत्राः। तत्रादौ तंडुलदानमंत्रः 70*a*; अथ वासरदोषापनोददानानि, सहस्रब्राह्मणभोजनविधिः 75*a*; अथ प्रतिग्रहशुद्धिः 77*a*; अथ राजप्रतिग्रहप्रायश्चित्तं 80*a*; अथ प्रतिपदोक्तानि प्रायश्चित्तानि 81*b*.

It ends: इति दानचंद्रिकायां प्रायश्चित्तानि ॥ समाप्तेयं दानचंद्रिका ॥ अस्ति श्रीमद्विक्रमार्कराज्यातीताब्दसंमितिः। भूचाष्टद्विद्विसंख्याकाः १८२२ शुचिकृष्णचतुर्थिका ॥

The work has been published at Benares (1861, 1863). [H. T. Colebrooke.]

1710.

618. Foll. 95; size 9½ in. by 5 in.; clear, modern Devanāgarī writing; 11–13 lines in a page.

The same work.

Colophon: इति श्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुभट्टदिवाकरविरचिता दानचंद्रिका समाप्ता ॥

[H. T. Colebrooke.]

1711.

1467. Foll. 133; size 9 in. by 4 in.; good Devanāgarī writing of 1798 A.D.; eight lines in a page.

Another MS. of the *Dānacandrikā*.

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 4; for a different work of the same title, ib., VI., p. 162.

[H. T. Colebrooke.]

1712.

248. Foll. 88; size 12¾ in. by 4¼ in.; careless, modern Bengalī handwriting; seven lines in a page.

DR.RUPNATHJI(DR.RUPAK NATH)

Dānakriyākaumudī, another treatise on religious gifts, by *Govinda Kavi*.

It begins:

श्रीगोविन्दपदद्वन्द्वनखेन्दुरुचिसन्ततिः ।
अनश्चिन्ताभिरुद्भान्तचित्तध्वान्तं धुनोतु नः ॥

आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगथो विविच्य मुनिभिर्मन्वादिभिः संहिताः ।
श्रीमन्नातपदारविन्दविगलद्धूलीभरोद्देशतः
श्रीगोविन्दकविः करोति गहनां दानक्रियाकौमुदीं ॥

अथ दानविधिः ॥ तत्र संवर्तः । दानं वै विधिवद्देयमशुभानां च नाशनं । °

अथ भूमिदानं fol. 22*a*; अथान्नदानं 24*a*; अथ गन्धदानं 26*b*; अथ पुष्पदानं° फलदानं 27*a*; अथ छत्रदानं 29*a*; अथ वृषदानं 31*b*; अथ गुडधेन्वादिदानं 32*b*; अथ तिलदानं 33*b*; अथ ग्रामशिलादानं 36*a*; अथ कृष्णाजिनदानं 44*b*; अतः प्रसङ्गसंगत्या वृषोत्सर्गो विधिच्यते 49*b*.

It ends:

कनकालंकृतां कृत्वा जले गामवतारयेत् ।
सामवेदी तु विशेषं दात्रा कर्म कारयेत् (!) ॥

इति श्रीगोविन्दकविकृतदानक्रियाकौमुदी समाप्ता ॥ लिखितं श्रीकृष्णमोहनदेवशर्मणा ॥

[H. T. Colebrooke.]

1713.

2585. Foll. 276 (foll. 49–64 of which are wanting); size 12 in. by 4½ in.; fairly written in Devanāgarī, by several hands; 8–13 lines in a page.

Nityadānādipaddhati, a compilation (from *Purāṇas* and other works) on various kinds of legal gifts and their consecration, as well as various other religious observances, by (*Tripāṭhin*) *Śāmajit* (? *Śyāmajit*).

It begins:

नित्यदानादिपद्धतिर्लिख्यते ॥ तत्रादौ प्रातःस्नानादि देवपूजनांतं विधाय दानादिकं कुर्यात् ॥ तत्रादौ छायादानं । तत्प्रतिग्राहकब्राह्मणपूजां विधाय प्रयोगं कुर्यात् ॥ प्रयोगश्च । अत्राद्येत्यादिदेशकालावुच्चार्य मम शरीर उत्पन्नदिव्यांतरिक्षभौमात्मकत्रिविधतापपापपरिहारार्थं शयनसमयोत्पन्नदुःस्वप्नाद्यनेकदोषनिवृत्त्यर्थमिदं ताम्रपत्रं घृतपूर्णं हिरण्यपात्रप्रत्यास्नायद्रव्यसहितं ब्राह्मणायाहं संप्रददे ॥ °

इति दानखंडे बहूचपरिशिष्टोक्तं स्वस्तिवाचनं समाप्तं fol. 8*b*; इति नवरात्रव्रतविधिः fol. 20*a*; इति दीपावलिकृत्यं (or दीपदानकर्म) fol. 26*b*; इति सकुदानसंकल्पः fol. 35*a*; then follow various kinds of worship; (*Śiva*, foll. 42–46*b*); इति मत्स्यपुराणोक्तग्रहणशांतिविधिः fol. 48*a*; at the end of fol. 48: अथ ग्रहणदानानि; fol. 65 begins: अथ पंचशत आमान्नानि the intermediate leaves being missing); इति व्रतदानादिफलं fol. 67*b*; ° प्रतिमादिलक्षणं fol. 68*a*; various kinds of स्नान (जल° दधि° गोमय° तुलसी etc.); अथ अर्द्धोदयसमयपद्धतिर्लिख्यते fol. 87*a*; ° दशावतारदानप्रयोगः fol. 90*b*, etc.; इति श्रीमत्त्रिपाठिशामजिद्विरचिता सर्वोत्पातशांतिः । अथ नवग्रहजपस्य मृत्युंजयजपस्य च दशांशहोमपूर्णाहुतिप्रकारो लिख्यते fol. 112*a*; अथ महार्णवोक्तसर्वज्वरहरकुंभदानविधिर्लिख्यते । fol. 157*b*, here follow various *vratodyāpanāni*; foll. 201–7, various kinds of *dāna* (*bhūyasī-*, *gomithuna-*, *vaitaraṇī-*, *aśṭa mahā-*, *hiraṇya-*, etc.); various kinds of *aśauca* (*garbhasrāva-*, °*pāta-*, etc.); कुंडमंडपपद्धतिः from fol. 223*b* (begins: तत्रकुंडाधारत्वात्प्रथमं मंडपो विचार्येत ।); [अथ मंडपारोपस्थानानि fol. 248*b*; इति श्रीविश्वकर्माकृताजयप्रस्थाधिकारे लक्ष्मीप्रियमंडपः fol. 251*b*; इति ° प्राग्ग्रीवादिपंचाशन्मंडपनिर्णयः fol. 255*b*, etc.]; वापीकूपतडागानां विधिः from fol. 259*b* (begins: सूत उवाच । कथमाराध्यते विष्णुर्जलशायी सदा विभुः । °)

The compilation ends: इति श्रीभविष्यपुराणोक्तविधिना त्रवाडोश्रीशामजीकृता श्रीकृष्णजन्माष्टमीव्रतोद्यापनपद्धतिः ॥

[Mack. Coll.]

1714.

2715. Foll. 42; size 8¾ in. by 3¾ in.; fair Devanāgarī writing of about 1700 A.D.; 10–12 lines in a page.

Shoḍaśa-Mahādānapaddhati, or *Dānapaddhati*, a handbook of matters relating to 'great' gifts, written by *Rāmadatta*, minister to King

DR. RUPNATHJI (DR. RUPAK NATH)

Nṛisiṃha of Mithilā, with the assistance of *Bhavaśarman*, his domestic priest.

It begins:

आनम्रक्षितिपालमौलिवलभीप्रत्युप्तरत्नांकुर-
ज्योतिःक्षालितपादपद्मयुगलः श्रीमान्नृसिंहो नृपः ।
सौधैश्रीनिकषः प्रशास्ति सिथिलाभूमंडलं रंजयन्
कार्णाटान्वयभूषणः कृतधियां निर्व्याजकल्पद्रुमः ॥ १ ॥
मंत्री तस्य मरुत्वतो गुरुरिव श्रीरामदत्तः सताम्
आधारः सुकृती समस्तभुवनप्रख्यातदानोत्सवः ।
सौजन्यांबुनिधिः क्षमाकुलगृहं पाङ्क्तेयपारंगमो
दाक्षिण्यैकनिकेतनं विजयते प्रज्ञाप्रकर्षाश्रयः ॥ २ ॥
किं ब्रूमो धर्मकृत्यं सकलनयनिधेरस्य यन्नाकनाथः
श्रुत्वा वैराग्यमग्नो भवति निजपदप्रच्यवं शंकमानः ।
किं त्वस्मै देवमंत्री कथयति भगवन्नायमन्यायकारी
वीरः किंचिद्विधत्ते भवति पुनरसौ तेन वाक्येन
[स्वस्थः ॥ ३ ॥
मीमांसाणीवकर्णधारकुलको सत्रकैचिंतामणिः
सत्याचारविचारचारुचरितः खौपालवंशोद्भवः ।
तं तेन द्विजराजमौलिमणिना वेदांतविद्याविदं
श्रीमन्तं भवशर्मसंज्ञकममुं साग्निं नियुञ्जादरात् ॥ ४ ॥
मंत्री (?मंत्रिणोः) पुत्रपौत्रेण मंत्रिरत्नेन धीमता ।
श्रीमता रामदत्तेन क्रियते दानपद्धतिः ॥ ५ ॥

अथ तुलापुरुषदानविधिः ॥ तत्र दानपूर्वदिने प्रातः स्नातः कृतनित्यक्रियो यजमानः प्राङ्मुख उदङ्मुखो वा शुचिराचांतः कुशत्रयतिलजलान्यादाय ० ओं प्रतिलोकान्यस्थानाधिकरण-कप्रतिमन्वंतस्वासोन्नराकैवर्णकिंकणीजालमालिविमानकरणक-वह्नप्सरःपूज्यमानात्मविष्णुपुरगमनकल्पकोटिशतावच्छिन्नतल्लोक-महितद्वैतल्लौकिकभूपालमौलिमणिराजितपादपीठात्मकर्तृकभूत-लाधिकरणकराजराजत्वभवनश्रद्धाचितदीप्रतापजितसर्वमही-पलोकात्मकर्तृकयज्ञसहस्रयाज्ययनुभवमकामः(!) श्रस्तुलापुरुष-महादानमहं संप्रतिपादयिष्ये । इति प्रधानसंकल्पं कुर्यात् ॥ ततो मातृपूजनमाभ्युदयिकं च विधाय कुशतिलजलान्यादाय । ओं अद्य श्वःकर्तव्यतुलापुरुषमहादानप्रतिबंधकविघ्ननिवृत्तिकामो भगवंतं गोविंदमुमापतिं विनायकं च पूजयिष्ये । इति संकल्प्य । ओं भगवन् गोविंद इहागच्छ इह तिष्ठेत्यावाहनस्थापने विधाय एतानि पाद्यार्घाचमनीयस्नानीयपुनराचमनीयानि ओं गोविंदाय नमः । इदमनुलेपनं ओं गोविंदाय नमः । एतानि पुष्पाणि ओं गोविंदाय नमः । एष धूपः ओं गोविंदाय नमः । ०

The 16 *mahādāna* dealt with are the following:—*tulāpurusha* ends fol. 11*b*; *hiraṇya-garbha*, 14*a*; *brahmāṇḍa*, 16*a*; *kalpapādapa*, 18*b*; *gosahasra*, 20*b*; (*hiraṇya-*) *kāmadhenu*, 22*a*; *hiraṇyāśva*, 23*b*; *hiraṇyāśvaratha*, 24*b*; *hemahastiratha*, 26*a*; *pañcalāṅgala*, 27*b*; *pṛithvī*, 30*a*; *viśvacakra*, 35*a*; *kalpalatā*, 37*a*; *sapta-sāgara*, 38*a*; *ratnadhenu*, 40*a*; *mahābhūta-ghaṭa*, 41*a*.

It ends: अथ वितान् ग्रामरत्नैः संपूज्य तदनुज्ञयान्येभ्यो ऽपि ब्राह्मणेभ्यो दद्यात् । भागद्वयं गुरवे भागाष्टकमृत्विग्भ्यः प्रतिपादयेदिति भूपालः । परिशिष्टमन्यत्तुलापुरुषवत् ॥

महामहत्तममहासामन्ताधिपतिमहाराजाधिराजरामदत्तविर-चिता षोडशमहादानपद्धतिरियमावसथिकाग्निहोत्रिमहामहो-पाध्यायभवशर्मणः कृतिः समाप्ता ॥ ० श्लोकसं० ११०० श्रावणे मासि दक्षिणायने चतुर्थे तिथौ भौमे ॥

On the fly-leaf at the end, the work is also called *Hemādrishoḍaśadāna* both in Nāgarī and Telugu characters. The leaves are marked महा० षो० [Mack. Coll.]

1715.

676. Foll. 125; size 10¼ in. by 4¼ in.; indifferent Devanāgarī writing of A.D. 1530 (illegible through wear in places); 14–16 lines in a page.

[*Rūpanārāyaṇīya-*] *Mahādāna - paddhati*, a digest of rules regarding gifts and other religious rites, by *Rūpa Nārayaṇa*.

It commences with 17 couplets, the first, and part of the second of which are illegible:

त[द्]वंशमौक्ति[क]मणिर्भुवि मुग्धसींहो(l.० सिंहो)
राजा बभूव भुजनिर्जितभोगिराजः(?l. भोगिराजः) ।
तस्याभवन्मदनसींह(l. सिंह) इति क्षितींद्र(l. क्षितींद्रः)
सूनुः सपत्नदशनो मदनश्च कांत्या ॥ ३ ॥

The following genealogical line is enumerated in the succeeding *ślokas*: *Kṛishṇasiṃha*, *Devasiṃha*, *Lakshmaṇasiṃha*, *Kaivartasiṃha*, *Diksiṃha*(?), *Amarasiṃha*, *Anehasiṃha*(?), *Vikramasiṃha*, *Tejahsiṃha*, *Saukhyāyasiṃha*(?), *Śaktisiṃha*, *Udayasiṃha* (?*Dayāsiṃha*).

DR RUPANATHJI (DR RUPAK NATH)

स्मृत्यागमपुराणानि निबंधानार्विलोच्य च ।
कुरुते ऽसौ महादानपद्धतिं सिद्धतेच्छया ॥ १६ ॥
निखिलानां निबंधानां मतमंत्रमवेक्ष्य यत् ।
तेन ग्रंथांतरालोककौतुकं याज्यतां बुधाः ॥ १७ ॥

तत्र मत्स्यपुराणे । ०

तुलपुरुषदानं fol. 7*a*; इत्याभ्युदयिकश्राद्धविधिः ॥ अथ संक्षिप्तश्राद्धं 12*b*; इति ० मधुपर्कविधिः 16*b*; अथ ग्रहादिदेवताहोमः 21*a*; अथ याजुर्वेदिकहोमविधिः 39*a*; अथ ग्रहादिदेवताहोममंत्राः 39*b*; अथ सामगानां कुशकंडिकेतिकर्तव्यताप्रकारः 51*a*; अथाथर्वणवेदस्य कुशकंडिका 57*b*;--इति तुलापुरुषप्रयोगः । अथ हिरण्यगर्भदानं 75*a*; इति सामगानां गर्भाधानादिसंस्कारमंत्राः 82*b*; इत्यथर्ववेदस्य गर्भाधानादिसंस्कारमंत्राः 85*a*; इति हिरण्यगर्भमहादानप्रयोगपद्धतिः 85*b*; ० ब्रह्मांडमहादानप्रयोगपद्धतिः 89*b*; कल्पपादपमहादान० 92*b*; गोसहस्रमहादान० 94*a*; हिरण्यकामधेनु० 99*a*; हिरण्याश्वदान० 100*b*; हेमाश्वरथदान० 103*a*; हेमहस्तिरथ० 105*b*; पंचलांगलमहादान० 109*a*; पृथ्वीमहादान० 112*a*; विश्वचक्रमहादान ० 116*a*; कल्पलतामहादान ० 118*a*; सप्तसागरमहादान० 120*b*; रत्नधेनुदान० 123*a*; महाभूतघटदान०

It ends: इति श्रीरूपनारायणीये महादानप्रयोगपद्धतौ महाभूतघटदानप्रयोगपद्धतिः समाप्ता॥ शाके १४५२ विकृतसंवत्सरे भाद्रपदवदि ५ रवौ पुस्तकं रामोपाध्यायेन लिखितं ॥

[H. T. Colebrooke.]

1716.

52. Foll. 207, the first two of which are wanting; size 9½ in. by 3½ in.; legibly written, in Devanāgarī, in A.D. 1581; 10–13 lines in a page.

Saṃgrāmasāhīya-Vivekadīpikā, another treatise on gifts, compiled by *Dāmodara* (under the auspices of *Saṃgrāma Śāha*).

इति श्रीसंग्रामसाहीये विवेकदीपके श्रीदामोदरविरचिते सामान्येतिकर्तव्यतानिर्णयः ॥ अथ प्रत्येकं दानानां प्रमाणनिर्णये प्रयोगपद्धतौ ० fol. 8*b*.

इति नानातुलादानप्रकारः ॥ इति ० तुलापुरुषनिर्णयः ॥ अथ तुलापुरुषमहादानप्रयोगः ॥ fol. 48*b*.

इति माध्यंदिनीयमधुपर्कविधिः 60*b*; ० सामगानां कौथुमशाखीयानां मधुपर्कविधिः ॥ अथाथर्वणिकमधुपर्कविधिः 62*a*; अथ यजुर्वेदाग्निस्थापनं 66*b*; अथ दशलोकपालहोमः 76*a*;--इति सामवेदीयशान्तिकाध्यायः (propitiatory verses), 112*a*; अथर्ववेदीयशौनकशाखीयशान्तिकाध्यायः 127*a*; then follow some chapters on *pūrṇāhuti*; after which the sixteen *mahādāna*, in the same order as above, p. 550*a*, *b*.

Colophon: इति श्रीसंग्रामसाहीये विवेकदीपके श्रीदामोदरविरचिते महाभूतघटमहादानपद्धतिः ॥ ० संवत् १६३८ समये कार्त्तिकवदि ९ शनौ लिखितं केशवभटेन ग्रंथसंख्या ७५०० ॥

For another MS. incomplete at the beginning, see Rāj. Mitra, Notices, X., p. 6; for a *Divyanirṇaya*, likewise compiled by *Dāmodara Ṭhakkura*, under the auspices of *Saṃgrāma Shāh*, ib., VI., p. 40. [H. T. Colebrooke.]

1717.

1469. Foll. 109 (foll. 43 and 44 of which are missing); size 9 in. by 4 in.; indifferent Devanāgarī writing of about the middle of last century; nine lines in a page.

Jalāśayārāmotsargavidhi, a treatise on the dedication of tanks, wells, groves etc., by *Bhaṭṭa Nārāyaṇa*, son of *Bhaṭṭa Rāmeśvara*. Rather incorrect.

The MS. begins:

तत्रादौ तद्विध्युन्नायिकाश्रुश्रुतुविधौ (*?r.* यिकोत्सर्गविधौ) तत्कार्यप्रवृत्युत्वमिका (*?r.* ० प्रवृत्तिस्तुत्यात्मिका) ज[लाश]यप्रशंसा॥ यमः। कूपारामप्रदाकारी तथा वृक्षं च रोपकः। कन्याप्रदं सेतुकारी स्वर्गं प्राप्नोत्यसंशयं ॥ तडागे यस्य पानीयं सततं खलु तिष्ठति। स्वर्गलोके गतिस्तस्य नात्र कार्या विचारणा ॥ ०

इति नारायणभट्टकृते जलाशयाद्युत्सर्गविधौ जलाशयप्रशंसा॥ अथ जलाशयदेशः। fol. 4*a*; इति ० जलाशयदेशतत्परिमाणारंभोत्सर्गकालनिरूपणं 7*b*; इति ० त[डागा]द्युपया[त]शुद्धिः 13*b*, etc.

Fol. 50*a*: इति ० मंडपकुंडवारुणमंडलनिर्माणादिप्रकारः॥

अथ जलाशयोत्सर्गप्रयोगः। उत्तरायणे माघादिमासषट्कान्यतमे मासि कार्त्तिके च मकरककर्कुंभमीनवृषभिथुनकन्यातुलावृश्चिकान्यतमराशिस्थिते वा सूर्ये मेषधनुःस्थेऽपीति रूपनारायणः। ० इति ० तडागोत्सर्गविधिपद्धतिः 98*a*.

DR.RUPNATHJI(DR.RUPAK NATH)

Fol. 99*b*: इति वापीकूपोत्सर्गविशेषविधिः ॥

उक्ता जलाशयोत्सर्गे भट्टरामेश्वरात्मजः ।
भट्टनारायणो व्रत आरामोत्सर्गपद्धतिं ॥

तत्र वृक्षारोपणे फलमुक्तं भविष्ये । °

It ends:

भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
व्यधत्त रुचिरां काश्यामारामोत्सर्गपद्धतिं ॥ इति °

[H. T. Colebrooke.]

1718.

785a. Foll. 36; size 11½ in. by 4¼ in.; indifferent Devanāgarī writing of about the middle of last century; 10 or 11 lines in a page.

The second (or practical) portion of *Bhaṭṭa Nārāyaṇa's* treatise; corresponding to foll. 50–109 of the preceding MS.

[H. T. Colebrooke.]

1719.

515. Foll. 73; size 10 in. by 3¾ in.; fair Devanāgarī writing of c. 1780 A.D.; 10 or 11 lines in a page.

Tristhalīsetu (or *Tīrthatrayīsetu*), a comprehensive treatise on pilgrimage, by *Nārāyaṇa Bhaṭṭa*, son of *Bhaṭṭa Rāmeśvara Sūri*, and grandson of *Govinda Bhaṭṭa*.

Part I., or *Sāmānyaprāghaṭṭaka*, treating of the ceremonies to be performed at sacred bathing-places generally. It begins:

सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।
यदेकतानचित्तानां चित्ते संविशति क्षमा ॥ १ ॥
विघ्नाधिप नमस्तुभ्यं विघ्नसंघं विघातय ।
प्रपञ्चं रचयात्युच्चं बुद्धिशुद्धिं विधेहि च ॥ २ ॥ ° ३ ॥

विश्वामित्रकुलोदधौ विधुरिवाखंडः कलानां निधिर्
वाग्गुंफे निखिले ऽपि यस्य च सुधा शिष्यप्रशिष्यैश्चिता ।
विद्यापद्मविकाशनैकतरणिः श्रीभट्टगोविंदजः
संख्यावज्ञणनाग्रणीर्विजयते श्रीभट्टरामेश्वरः ॥ ४ ॥

श्रिता वाराणसी तेन नगरी न गरीयसी ।
यतो ऽन्या नगरी हेमनगरीतिमुपेयुषी ॥ ५ ॥

शास्त्रेष्वधीती पितुरेव यः श्रुतीः
स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तन्नयो ऽविमुक्ते
तीर्थत्रयीसेतुमसौ विधत्ते ॥ ७ ॥ ° ९ ॥

साधारणस्तीर्थविधिः प्रथमं सम्यगुच्यते ।
प्रयागादित्रयविधिः पश्चादित्यत्र संग्रहः ॥ १० ॥

इह खलु संसारचक्रे परिवर्तमानानां चत्वारः पुरुषार्था धर्मार्थकाममोक्षाख्याः सकलस्मृतीतिहासपुराणादिषु श्रूयंते सेव्यत्वेन । °

See Rāj. Mitra, Notices, II., p. 202, where an analysis of this section is given; Bikāner Cat., p. 484.

Colophon: इति श्रीविद्वन्मुकुटमाणिक्यश्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके प्रकीर्णकतीर्थधर्मप्रकरणं समाप्तं ॥ समाप्तश्च प्रघट्टकः ॥ [अतः परं प्रयागप्रकरणं भविष्यति obliterated] ॥

As the author's grandson *Kamalākara* wrote his *Nirṇayasindhu* in 1611-12 A.D., the present work was probably composed somewhere about 1550 A.D. Cp. the author's *Prayogaratna*, above, no. 471.

For another *Tristhalīsetu* (or *Tīrthayātrāvidhi*), by *Bhaṭṭoji Dīkshita*, see Weber, Cat. Berl., no. 1234; Rāj. Mitra, Bikāner Cat. p. 485. [H. T. Colebrooke.]

1720.

683b. Foll. 84; size 9½ in. by 4 in.; legibly written, in Devanāgarī, by different hands; foll. 45–76 about 1650 A.D.; the remainder towards the end of last century; 9–12 lines in a page.

The same section of the *Tristhalīsetu*.

[H. T. Colebrooke.]

1721.

264c. Foll. 34; size 12½ in. by 4½ in.; rather careless Devanāgarī writing of the latter part of last century; eleven lines in a page.

DR.RUPNATHJI(DR.RUPAKNATH)

Tristhalīsetu. Part II., *Prayāgāditrayaprakaraṇa;* chapter I., *Prayāga-kṛitya* (or *prakaraṇa*).

It begins:

सुरमुनिदितिजेंद्रैः सेव्यते यो [ऽ]स्ततंद्रैर्
गुरुतरदुरितानां का कथा मानवानां ।
खभुवि सुकृतकर्तुर्वांछितावासिहेतुर्
जयति विजितयागस्तीर्थराजः प्रयागः ॥ १ ॥

वाणी वर्णयते यस्या वर्णैनायामणीयसी ।
तीर्थैश्रेणिमणिवेंणी स्वर्निश्रेणिः प्रवर्ण्यते ॥ २ ॥

अथ प्रथमप्रकरणं । ०

In the introduction the author discusses the question as to whether, in a pilgrimage to these three sacred *sthalas* κατ' ἐξοχήν, precedence is to be given to one of them, and declares that there is no binding rule on that point; but that the *dākshiṇātyas, pāścātyas* and *prācyas* should begin each with the *tīrtha* nearest to them, and then visit the others in their turn. The principal topics are as follows:

इति प्रयागमहिमा ॥ अथ प्रयागस्मरणमहिमा fol. 7*a*; अथ प्रयागगमनं 9*a*; अथ प्रयागादिपरिमाणं 9*a*; इति प्रयागवासफलं ॥ अथ वपनविचारः 9*b*; अथ प्रयागमुंडने नानाकाम्यकर्माणि 14*a*; अथैकाहस्नानवचनानि 18*a*; अथात्र स्नाने दिनविशेषे फलविशेषः 19*a*; अथ माघप्रयां विशेषः 19*b*; अथ प्रसंगान्माघस्नानविधिः 20*a*; अथ माघस्नानविधिः 20*b*; अथ माघस्नाने नियमाः 22*a*; अथ प्रयागमरणविधयः 23*b*; अथ प्रयागीयनानातीर्थानि 27*b*; अथ विकिरं (one of those *tīrthas*), 28*b*; अथावटमहिमा (*Avaṭa*, another *tīrtha*), 29*b*; इति गंगामहिमा ॥ अथ प्रसंगाद् यमुनामहिमा 33*a*.

Colophon: इति भट्टरामेश्वरसूनुभट्टनारायणविरचिते त्रिस्थलीसेतौ प्रयागप्रकरणं समाप्तं ॥

[H. T. Colebrooke.]

1722.

1708A. Foll. 61; size 9¼ in. by 4 in.; indifferent Devānagarī writing, of about the middle of the last century; 13–15 lines in a page.

Two chapters of the *Prayāga-*(or *Prayāgāditraya*)*prakaraṇa* of *Bhaṭṭa Nārāyaṇa's Tristhalīsetu.*

a) Foll. 1–32, *Prayāgakṛityam.*

b) Foll. 33–61, *Gayākṛityam.*

This section begins:

वादीभयुक्किकुंभस्थलदलनाकुंठमाननखगर्भान् ।
विकिरन् प्रमेयमुक्ताविद्यावनकेसरी गुरुर्जयति ॥ १ ॥

नत्वाखिलोद्धारधुरंधरं परं
गदाधरं बुद्धिविशुद्धिसाधकं ।
संदेहमुत्सार्य विचार्य सादरं
मया गयाकार्यमुदीर्यते ऽधुना ॥ २ ॥

सुतादिकर्तृकं यस्यां श्राद्धं श्राद्धसमेधितं ।
पित्राद्युद्देश्यफलदं सा गया यागतोयिका ॥ ३ ॥

Colophon: इति श्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ प्रयागकरणे गयाकृत्यं ॥

For a portion of this section, see Weber, Cat. Berl., no. 1233.

For the third chapter (*Kāśī-kṛitya* or *prakaraṇa*) of Part II. (*Prayāgatrayaprakaraṇa*), see Rāj. Mitra, Notices, VII., p. 34.

[H. T. Colebrooke.]

1723.

1109. Foll. 211; size 12 in. by 5¼ in.; good Devanāgarī writing of 1788 A.D.; ten lines in a page.

Prāyaścittaviveka, a manual of rules regarding expiatory rites, forming part of a general digest of law, entitled *Smṛitiviveka,* by *Śūlapāṇi.*

It begins: नित्यश्रुत्युदितस्वधर्म ० see Aufrecht, Cat. Bodl., no. 660 (where the work is analyzed); Rāj. Mitra, Notices, I., p. 236.

It ends: इति धेनुसंकलनं समाप्तं ॥

प्रायश्चित्तविवेको ऽयं रचितः शूलपाणिना ।
यथा सतामुरःस्थाने विराजतां सुभाषितं ॥

इति हुडिसाया(?1. साहुडिया)महामहोपाध्यायश्रीशूलपाणिविरचितः प्रायश्चित्तविवेकः समाप्तः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

शाके गते दशसमुद्रहिमांशुसंख्ये
मासे त्विषे शिवमुदे शिवशर्मणा यः ।
विवेक एषो[ऽ]पि च पापकर्मिणाम्
अलेखि काशीश्वरसद्यवासिना ॥

Six leaves, appended at the end, contain a table of contents.

For the author's commentary on *Yājñavalkya's* Institutes, see above, no. 1287.

[H. T. COLEBROOKE.]

1724.

819. Foll. 104; size 15¾ in. by 5½ in.; fairly written, in the Bengalī character, at the beginning of the present century; 9, sometimes 8, lines in a page.

Tattvārthakaumudī, a commentary on the *Prāyaścittaviveka*, by *Govindānanda*, son of *Gaṇapati Bhaṭṭa*.

It begins: श्रीगोविन्दपदद्वन्द्वमिन्दिरानन्दमन्दिरं ° see Aufrecht, Cat. Bodl., no. 661.

It ends:

गणपतिभट्टतनूजो गोविन्दानन्दपण्डितः श्रीमान् ।
अतिनिर्वन्धाद्विदुषां समकृत तत्त्वार्थकौमुदीं रम्यां ॥

इति श्रीगोविन्दानन्दकविकङ्कणाचार्यकृता प्रायश्चित्तविवेकटीका तत्त्वार्थकौमुदी समाप्ता ॥

[H. T. COLEBROOKE.]

1725.

561. Foll. 118; size 12¼ in. by 4¼ in.; good, large, modern Devanāgarī writing; seven lines in a page.

Prāyaścitta-nirūpaṇa (or *prakaraṇa*), by *Bhaṭṭa Bhavadeva*, surnamed *Bālavalabhībhujaṅga*.

It begins:

अनादिभवसंभूतं पापप्रशमकारणं ।
स्मरणं वासुदेवस्य यस्य तस्मै नमो नमः ॥ १ ॥
मन्वादिस्मृतिमालोक्य सुविचिन्त्य यथाक्रमं ।
क्रियते भवदेवेन प्रायश्चित्तनिरूपणं ॥ २ ॥

प्रायश्चित्ते निरूपणीये गुरुत्वात्प्रथमं महापातकप्रायश्चित्तनिरूपणे परस्परमेवेतरप्रायश्चित्तनिरूपणे कर्तव्ये मन्वादिवचनक्रमानुरोधेन प्रथमं ब्रह्मवधप्रायश्चित्तमेव निरूप्यते ॥ °

इति ब्राह्मणस्य ब्रह्मवधप्रायश्चित्तनिरूपणं fol. 15*a*; इति क्षत्रियादिकृतब्रह्मवधप्रायश्चित्तं 19*a*; इति क्षत्रियादिवधप्रायश्चित्तं 21*b*; इति स्त्रीवधप्रायश्चित्तं 26*b*; ° गोवध° 31*b*; इति वासकाभीभुजगापरनाम्नो(!) भट्टश्रीभवदेवस्य कृतौ प्रायश्चित्तस्य प्रकरणे वधपरिच्छेदः 35*b*; इति वालवलभीभुजंगापरनाम्नो ° प्रायश्चित्तप्रकरणे ऽभक्ष्यभक्षणपरिच्छेदः 59*b*; इति वालवलभीभुजंगापरनाम्नो ° प्रायश्चित्तपरिच्छेदे स्तेयप्रकरणं 69*a*; इति ° प्रकरणे ऽगम्यागमनपरिच्छेदः (illicit sensual intercourse), 90*a*; इति ° वालवलभीभुजङ्गापरनामकभट्टश्रीभवदेवकृतौ ° संसर्गप्रायश्चित्तपरिच्छेदः (improper intercourse and taking of gifts).

It ends: इति कृच्छ्रपरिच्छेदः समाप्तः ॥ इति वालवलभीभुजंगापरनामकभट्टश्रीभवदेवकृतौ प्रायश्चित्तप्रकरणं समाप्तं ॥

कृतं श्रीभवदेवेन प्रायश्चित्तविनिर्णयं ।
लिलेख काशीवासी श्रीशिवनारायणः कविः ॥

[H. T. COLEBROOKE.]

1726.

636b. Foll. 62; size 17 in. by 5¼ in.; well written, in the Bengalī character, on European paper; eight lines in a page.

Prāyaścittasaṃgraha, a manual of rules regarding expiation, by *Nārāyaṇa Bhaṭṭa*.

It begins: अथ प्रायश्चित्तं ॥ तत्र प्रायश्चित्तलक्षणं ॥ पापक्षयमात्रकामनाजन्यकृतिविषयः पापक्षयसाधनं कर्म प्रायश्चित्तं । °

(अथ) अतिपातकानि fol. 2*b*; अथ बाल्यादिना प्रायश्चित्तभेदः 10*a*; धेनुमूल्यादिव्यवस्था 11*a*; प्रायश्चित्तपूर्वाहकृत्यं 11*b*; प्रायश्चित्तानन्तरं कार्यं 13*a*; वधस्य ज्ञानकृतादिनिरूपणं 14*a*; शूद्रस्वामिकचतुर्हायणादिगवस्य ज्ञानकृतविप्रकर्तृकसाक्षाद्वधप्रायश्चित्तं 17*b*; अज्ञानकृतगर्भिण्यादिवधे 21*b*; अत्यन्तक्लिष्टादीनां वधे 25*a*; इति बहुकर्तृकैकगववधप्रायश्चित्तं। अथैकहायनादिगववध ° 28*a*; अथ रोधादिनिमित्तकगोवध ° 30*a*; अपालनकृते गोवध ° 33*a*; अस्थिभङ्गादि ° 38*b*; गोरक्षमोक्षकरण ° 39*a*; हलशकटादिना वृषादिवाहने ° 39*b*; गोवधापवादः 40*b*; पञ्चविधवधित्वव्यवस्था 43*b*; व्रतानुक-

DR.RUPNATHJI(DR.RUPAK NATH)

स्यव्यवस्था ib.; इति गोपनप्रायश्चित्तं अथातिपातकप्रायश्चित्तं 50*b*; अथ महापातक° 52*a*; गर्भवध 53*b*; व्रात्यवधे शूद्रप्रायश्चित्तं 54*a*; सुरापान° 55*b*; गुर्वङ्गनागमन° 56*a*; अनुपातक° 56*b*; शूद्रवध° 57*a*; स्त्रीवध 57*b*; स्वभार्यायां मातृभगिन्यादिवचन° 58*a*; उपवीतच्छेदने 58*b*; जातिभंशकर° 59*a*; अपात्रीकरण° 59*a*; मलावह°, अप्रकीर्णक°, पर्वसु स्त्रीगमन°, श्राद्धदिने मैथुन° 59*b*; तैलाभ्यक्तादिमूत्रोच्चारसमुच्चारसमुत्सर्ग°, स्त्रीयोच्छिष्टभक्षणादि° 60*a*; अशौचान्नभक्षण 61*b*; अथ देवागारकृतेष्टकाकाष्ठशिलादिनाग्रहकरणप्रायश्चित्तं 62*a*.

Of comparatively modern authorities, quotations have been met with from *Bhavadevabhaṭṭa*, foll. 17*a*, 31*b*; *Mitākṣharā*; *Śūlapāṇi*, 31*b*; *Smārtabhaṭṭāchārya* [or simply *Smārta*; i.e. *Raghunandana*; e.g. *Prāyaścittatattve Smārtāḥ*, 48*a*] and *Smṛitisāgarasāra*.

[H. T. Colebrooke.]

1727.

165. Foll. 55; size 12½ in. by 4¼ in.; fairly well written, in Devanāgarī, in A.D. 1805; ten lines in a page.

Prāyaścittenduśekhara-sārasaṃgraha, an abstract of a treatise on penance, by *Nāgojībhaṭṭa*, son of *Śivabhaṭṭa* and *Satī*.

It begins: यत् यथाविध्यनुष्ठानादुपचितमेनोभनाशकमेव तत्प्रायश्चित्तम् ॥ तुल्यपुरुषादावतिव्याप्तिचारप्रत्यवेति । न तु फलान्तरजनकमित्यपीः । °

अथ सर्वप्रायश्चित्तविधिः fol. 10*b*; इति प्रकीर्णकप्रायश्चित्तानि 22*a*; - - इति व्रात्यं 26*a*; इति स्तेयं 47*a*; इति ऋणानपाकरणं 27*b*; इत्यपण्यविक्रयः 28*a*, etc.; अथोच्छिष्टभक्ष्यभक्षणे 40*b*; आशुचिद्रव्यस्पृष्टे 41*b*; - - अथ श्राद्धभोजने 44*a*; - - अथ स्वर्णस्तेये 50*b*; अथ गुरुतल्पे 51*b*, etc.

It ends: अकृतप्रायश्चित्तानां कुष्ठादीनां दाहकस्य पतितचांद्रायणम् ॥ गंगास्नानविष्णुस्मरणनक्षत्रामजपादिसर्वपापप्रायश्चित्तमिति सर्वेष्टसिद्धिः ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृतप्रायश्चित्तेंदुशेखरसारसंग्रहः ॥ विक्रमसंवत् १८६२ ॥

For a MS. of *Nāgojībhaṭṭa's Prāyaścittenduśekhara*, see Rāj. Mitra, Notices, V., p. 23.

[H. T. Colebrooke.]

1728.

352*b*. Foll. 27; size 10½ in. by 4 in.; fairly good, modern Devanāgarī writing; nine lines in a page.

Prāyaścittādhyāya, being the third chapter of the *Nibandhasarvasva*, by *Mahādeva*, son of *Mahājasahasramalla Śrīpati*.

It begins:

क्वचिद्गूढं प्रकाशं च क्वचिद्दूरिरसाकुलं ।
जगत्पुनातु गम्भीरस्रोतसामिव संततं ॥

बालस्य मृतस्य नामकरणात्पूर्वं घृताभ्यक्तस्य बहिर्ग्रामाद्भूमौ निखननमेव कार्यं °

इति आशौचप्रकरणं fol. 4*a*; आपद्धर्मप्र° 4*b*; कर्मविपाकप्र° 5*b*; ब्रह्महत्याप्रायश्चित्तप्र° 7*b*; सुरापानप्रायश्चित्तं 8*a*; सुवर्णस्तेयप्रा° 8*b*, etc.

It ends: इति प्रत्यास्नायविधिः । यदा चंद्रलोकादिप्राप्त्यर्थं कृच्छ्रादिकं करोति तदा न प्रत्यास्नायाः । न वपनं च । शूद्रस्य मंत्रादावनधिकारः ॥

इति श्रीमहाजसहस्रमल्लश्रीपतिनंदनश्रीमहादेवविरचिते निबंधसर्वस्वे प्रायश्चित्ताध्यायस्तृतीयः ॥ ° ॥ विश्वेश्वरभट्टपुस्तकं ॥

[H. T. Colebrooke.]

1729.

1516*c*. Foll. 14; size 10 in. by 4¼ in.; fairly good Devanāgarī writing, of c. 1750 A.D.; ten lines in a page.

Āhnikaprāyaścitta, a fragment of a digest of rules of expiation.

It begins: आह्निकक्रमेणाशौचादीनां प्रायश्चित्तमुच्यते । विष्णुपुराणे । नित्यानां कर्मणां विप्र यस्य हानिरहर्निशं । °

Fol. 13*a*: कमल[ाकर?]भट्टकृताह्निकप्रायश्चित्तानि ॥ (cf. *Kamalākara Bhaṭṭa's Āhnikalopaprāyaścitta*, Bikāner Cat., p. 355).

It ends as follows:

सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ।
वंशानुचरितं चैव पुराणं पंचलक्षणं ॥

खिलानि श्रीसूक्तादीनि इतिहासाः सप्तव्याधाख्यानि (?*r.* सव्याख्यानानि) महाभारतादि to which another hand has added समाप्तं ॥

DR.RUPNATHJI(DR RUPAK NATH)

The passages from *Smṛitis* and *Purāṇas* are generally quoted at second hand from *Śūlapāṇi*, *Madanaratna* and *Madanapārijāta*.

[H. T. COLEBROOKE.]

1730.

1202. Foll. 39; size 12½ in. by 4½ in.; Devanāgarī character; foll. 1–25 in a clear, uniform, modern hand; ten lines in a page; foll. 26–39, not numbered, carelessly written by different hands; twelve lines in a page.

Śrāddhakalpa (also called *Pitṛibhaktitaraṅgiṇī*), a treatise on obsequies, compiled, by *Vācaspati Miśra*, under direction of King *Rāmabhadra Deva*, of Mithilā, son(?) of *Rūpanārāyaṇa*, son of *Harinārāyaṇa*.

It begins:

प्रणम्य वासुदेवाय तन्यते स्वर्गरंगिणी ।
श्रीवाचस्पतिधीरेण पितृभक्तितरंगिणी ॥

वाराहपुराणे । ०

There is a break after leaf 25, where the new handwriting begins.

The MS. ends:

श्रुतीः स्मृतीरधैगताश्च तासां
गुरूपदेशादवधार्य सम्यक् ।
श्रीश्राद्धकल्पास्यमिमं निबंधं
वाचस्पतिर्विश्वजनीनमूचे ॥

समस्तेत्यादिमहाराजाधिराजश्रीहरिनारायणात्मजसमस्तेत्या - दिम[ह]राजाधिराजश्रीरूपनारायणपदवीसमलंकृतं(? l. त) - मिथिलामंडलाखंडलश्रीमद्रामभद्रदेवचरणादिष्टेन तत्परिषदा श्रीवाचस्पतिशर्मणा* विरचितो ऽयं श्राद्धकल्पः परिपूर्णः इति ॥

पदवाक्यमाननिपुणाः करंतलकुवलायमानविश्वदृशः ।
अवलोकयत कृतिमिमां करुणावरुणालयेन हृदयेन ॥

शास्त्रे दशस्मृतौ चिंशन्निबंधा येन यौवने ।
निर्मितास्तेन चरमे वयस्येष विनिर्ममे ॥

कृष्णपक्षदशयां – ग्रालग्रामे श्रीनन्दनेन लिखितमिदं पुस्तकमिति ॥

For the same author's(?) *Śrāddhacintāmaṇi*, see above, nos. 1401, 1402.

[H. T. COLEBROOKE.]

1731.

87. Foll. 159 (foll. 81–83 of which are wanting); size 10¾ in. by 4½ in.; clear, uniform Devanāgarī writing, of the latter part of last century; nine lines in a page.

Śrāddhakalpalatā, a digest of rules and directions regarding obsequies, compiled by *Vinayaka Paṇḍita*, usually called *Nanda Paṇḍita*, son of *Rāma Paṇḍita;* under orders of a prince *Paramānanda*, of the family of the *Sahagilas*. It begins:

समालंबे लंबोदरचरणपंकेरुहयुगं
यदालंब्य स्वैरं विजहति च विघ्नांधतमसं ।
स्मरंतः संतोषं निरुपधिपरानंदलहरी
समाक्रांतस्वांता हरिहरविरिंचिप्रभृतयः ॥ १ ॥ ०

अस्ति प्रशस्तैर्विभवैः समस्तैः
समस्तभूमंडलमंडनं यत् ।
साधारणं नाम पुरं पुरारेर्मुदे
मुरारेरपि यद्दिवो ऽपि ॥ ४ ॥

समजनि जनतायाः प्राणसाधारणे ऽस्मिन्
सहगिल इति नाम्ना को ऽपि वंशः प्रसिद्धः ।
यमधिजनिमिवैकां देवदेवो ऽपि विष्णुर्
विबुधकुलसमेतो[ऽ]द्यापि वांछत्यवासुं ॥ ५ ॥

अखंडभूमंडलमंडने ऽस्मिन्
प्रतापसंतापितसप्रसन्नैः ।
दयामयांतःकरणो बभूव
स सिंहमल्लः प्रथितः पृथिव्यां ॥ ६ ॥

प्रतापपरितापितप्रबलभूमिपालावली-
शिरोमणिमरीचिभिः प्रविलसत्पदांभोरुहः ।
समस्तसुरसुंदरी सततगीतकीर्तिस्ततो
वसावनमहीपतिः समजनि क्षमामंडले ॥ ७ ॥

---

* In a MS. of the same work described in Rāj. M.'s Notices, V., p. 90, this colophon runs as follows:

इति श्रीमहाराजाधिराजश्रीहरिनारायणात्मजश्रीरूपनारायणपदवीमलङ्कृतमिथिलामण्डलश्रीरामभद्रचरणादिष्टेन परिषदा श्रीवाचस्पतिशर्मणा ०

DR.RUPNATHJI(DR.RUPAK NATH)

यत्तेजःपुंजतप्ता दिनकररुचयः शेरते शर्वरीषु प्रायः
पाथोधिमध्ये रजनिकरकलालांछनं विधतीमाः ।
कीर्त्या यस्याभिभूतास्त्रिजगति गतया भूतलं भासयंत्यो
ऽभूत्तस्मादस्तशत्रुः सहगिलतिलको रूपचंद्रः क्षितीशः
निजकुलजननताचकोरचंद्रो [॥ ८ ॥
बुधजनकैरवहृत्प्रबोधचंद्रः ।
कविकुलकवितासुधाब्धिचंद्रो
जगति बभूव नृपस्तु भूपचंद्रः ॥ ९ ॥

जातः क्षत्रियवंशकैरवसमुद्बोधे सुधांशुस्ततो
दाने देवतरोरपि प्रतिदिनं संपादितान्यूनता ।
शौर्ये पांडवकर्णमुख्यमहसामासादिताहीनता
येनासाविह वैयधाम परमानंदो महेंद्रो क्षितौ ॥ १० ॥

लक्ष्मीयैत्करुणाकटाक्षनिवहे पाणौ सुपर्वद्रुमो
वक्त्रे शीतकरः स्मिते नवसुधा क्रोधे च हालाहलं ।
दृष्टांतः प्रथमश्च विक्रमनिधिर्गीर्भीर्यैमर्यादयोस्
तद्विद्मः करुणामयेन विहितः पूर्णो हि रत्नाकरः॥११॥

श्रीरामपंडितसुतः पंडितश्रीविनायकः ।
आदिष्टस्तेन तनुते श्राद्धकल्पलतामिमां ॥ १२ ॥

गोविंदपंडितकृतामवलंब्यातियत्नतः ।
श्राद्धकल्पलतामेतां कुर्वे तां श्राद्धदीपिकां ॥ १३ ॥

श्राद्धकल्पलता सेयं परमानंदकारिता ।
विदुषामर्धसंदेहे विदधातु च मत्क्रियां ॥ १४ ॥

नो मूलस्मृतयो न वान्यकृतयः संतन्यमाने मयः
ग्रंथे ऽस्मिन्नवधीरिताः किमपि वा वाक्यं च नाराणिकं ।
तस्मादत्र बुधा सुधांशुधवले नापाततो दूषणं
देयं बुद्धिबलाद्विचार्य सकलं तत्त्वं तरस्तुष्यतां ॥ १५ ॥

इह खलु धर्मोपैकाममोक्षाणामुपायांतरस्याध्यत्वे ऽप्यलसप्राय-कलिकलुषकलंकपंकमग्नदेहैः पुरुषैरनायासेन तेषां साधयितुमशक्यत्वादवश्यकर्तव्यश्राद्धमात्रस्यैव तत्साधनत्वेन तन्निर्णीयते ॥ तत्रादौ श्राद्धलक्षणं ॥ ०

इति० श्राद्धकल्पलतायां श्राद्धस्वरूपकर्तृकालनिरूपणस्तवकः प्रथमः fol. 23*a*; ० देशद्विजकर्तृनिरूपणस्तवको द्वितीयः fol. 34*a*; ० श्राद्धोपपदायैतिकर्तव्यतानिरूपणस्तवकस्तृतीयः(!) fol. 57*a*; [० विकृतिश्राद्धनिरूपणस्तवकश्चतुर्थः foll. 81–3 wanting; fol. 53*b* in B.] It ends:

अस्ति क्षत्रियवंशभूषणमणिर्भूमौशचूडामणिः
शत्रूणां द्युमणिः प्रतापनविधौ धर्मारणिः कर्मसु ।
कीर्तीनां सरणिर्बुधाब्जतरणिः प्रत्यर्थिपृथ्वीभृतां
संसारार्णवतारणैककरणिः संकल्पचिंतामणिः ॥ १ ॥

स जयति परमानंदः कीर्त्या यस्यामृतेन पूर्णाशाः ।
त्रिदशाः सुरारिवैरं सुधाकृतेनैव तन्वते स्वैरं ॥ २ ॥

धर्माधिकारिकुलकैरवचंद्रकांत-
श्रीरामपंडितसुतेन विनायकेन ।
आदेशतो ऽस्य विहिता सुमनोऽभिरामा
श्रीश्राद्धकल्पलतिका नितरां प्ररूढात् ॥ ३ ॥

अंकुरिता मुनिवाक्यैर्व्याख्यातृणां द्विपचिता सूक्तैः ।
पल्लविता कृतिनेयं कल्पलता वांछितं दिशातु ॥ ४ ॥

यत्किंचिद्दूषणं स्यादिह तदपि बुधैर्भूषणं संविधेयं
दोषोद्धाराय तेषामधिजगति पुनर्जन्म धात्रा कृतं यत् ।
किं वा निंद्यं न शंभोरलमहिगणाद् भस्म शूलं कपालं
धत्ते भूषार्थमन्यैस्तदपि किमु गिरा पूज्यते नश्रुतिना॥५॥

संतो ऽपि संतोषमपास्य दूरं
कृतिं महीं यदि दूषयेयुः ।
हानिस्तदा स्यात्क्रियतो ममात्र
सत्यं पुरस्तात्परिहास्यते तैः ॥ ६ ॥

परमानंददानांवुनिषेकैरनुवासरं ।
श्राद्धकल्पलता रूढा देयादर्थिकुलेप्सितं ॥ ७ ॥

इति श्रीमहाराजाधिराजमहगिलान्वयैकभूषणपरमानंदादिष्टधर्माधिकारिरामपंडितात्मजविनायकपंडितकृतायां श्राद्धकल्पलतायां नवश्राद्धनिरूपणस्तवकः पंचमः समाप्तः ॥

Besides *Smṛitikāras* and *Purāṇas*, the following works and writers have been found quoted:

Kālavidhāna, e.g. fol. 63*b*; *Kālādarśa*, 58*b*; *Candraprakāśa*, 16*b*; *Dharmapradīpa*, 22*b*, 72*a*; *Nirṇayapradīpikā*, 56*b*, 66*b*; *Purāṇasamuccaya*, 17*b*, 62*a*; *Śākaṭāyana* [शाकटायनेनोक्तं ॥

जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।
श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीमिति ॥] 67*a* (apparently from *Hemādri*, *Pariśeshakh.*, I. 215); *Śrāddhakamala*, 22*b*; *Śrāddhakalpa*, 24*a*; *Śrāddhakāśikā*, 53*a*; *Śrāddhacintāmaṇi*, 48*a*, 111*a*; *Śrāddhanirṇaya*, 11*a*; *Śrāddhapradīpa*, 11*a*; *Shaṭtriṃśanmata*, 9*b*; *Smṛiticandrikā*, 18*b* (*Candrikā*, 3*a*); *Smṛitidarpaṇa*, 62*b*; *Smṛitiratnāvali*, 58*a*; *Smṛitisaṃgraha*, 6*a*, 59*b* (*Saṃgraha*, 8*b*; *Saṃgrahakāra*, 14*b*, 15*b*); *Smṛitisāra*, 93*b*; *Smṛityarthasāra*, 65*a*, 69*a*; *Hemādri*, 9*b*, 13*a*.

For further particulars regarding tho author, see no. 1342. [H. T. Colebrooke.]

DR. RUPNATHJI (DR. RUPAK NATH JI)

1732.

95. Foll. 87; size 10 in. by 3¾ in.; legibly written, in Devanāgarī, towards the end of last century; 9–13 lines in a page.

The same work.

Between foll. 21 and 22 there is a large gap, comprising nearly the whole of the third and part of the fourth chapters.

[H. T. Colebrooke.]

1733.

1966. Foll. 18; size 7 in. by 4 in.; modern Devanāgarī writing; 9–11 lines in a page; the leaves much injured at both ends.

Śrāddhakalpanā, a manual of (partly accented) texts and formulas used at the performance of obsequies.

It begins: आचम्य पवित्रधारणं । पवित्रवंतः पुरुषा ऽचामासते पितरो ° (*Ṛks.* IX., 73, 3 accented) रभ ॥

ऊर्ध्वकेशी विरूपाक्षी मांसशोणितभोजने ।
तिष्ठा देवी शिखाबंधे चामुंडे ह्यपराजिते ॥

अपक्रामंतु भूतानि पिशाचाः सर्वतोदिशं ।
सर्वेषामविरोधेन श्राद्धकर्म समारभे ॥

प्राणायामं कृत्वा । पितृदेवताभ्यो नमः । फलप्राप्त्यर्थं पुरूरवाद्रैवसंज्ञकानां विश्वेषां देवानां विश्वेषां देवानां प्राचीनावीतिपितृपितामहप्रपितामहानां अमुकशर्मणां अमुकगोत्राणां वसुरुद्रादित्यस्वरूपाणां एतेषां श्रेयोऽर्थं मोक्षार्थं तृप्त्यर्थं प्रतिसांवत्सरिकं श्राद्धं सदैवं सपिंडं साग्नीकरणं देशकालाद्यनुसारतः पार्वणेन विधिना अन्नेन हविषा अद्यः करिष्ये ॥ इमं मे गंगे यमुने ° (X., 75, 5) ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं ॥ (*Khila* after शरासः ° (*Ṛks.* I., 191, 3) ॥ [*Ṛks.* V., 87.)

It ends: अनेन अग्नीकरणब्राह्मणभोजनपिंडदानकर्मब्रह्मात्मकेन पितृपितामहप्रपितामहस्वरूपी जनार्दनवासुदेवः प्रीयतां ॥ --- वैं देवतास्ताः सर्वा वेदुर्विदि ब्राह्मणे वसंति तस्माद्ब्राह्मण --- दिवो देवे नमस्कुर्योन्नाश्नीलं कीर्तयेदेता एव देवताः प्री--

Then, on fol. 18*a*, by a different hand, three more *ślokas:* [स्वा]गते स्वस्तिवचने गोत्राशिषः प्रदक्षिणे। °

[Dr. John Taylor.]

1734.

1611. Foll. 54; size 19½ in. by 3½ in.; folded to half the length; small, neat, modern Bengalī handwriting (from fol. 38 by a different, less regular, hand); 6 or 7 lines in a page.

Śrāddhacandrikā, a manual of rules for the performance of obsequies, by (*Śrīnātha*) *Ācāryacūḍāmaṇi* (son of *Śrīkarācārya*).

It begins:

सच्चिदानन्दवपुषमवाङ्मनसगोचरं ।
पूर्णावरग्ध(l. राद्ध)योद्धारं वन्दे तं देवकीसुतं ॥ १ ॥

संहिताः संग्रहान्सर्वान् विलोक्य श्राद्धपद्धतिः ।
आचार्यचूडामणिना सोपपत्तिर्निबध्यते ॥ २ ॥

अथ श्राद्धपूर्वदिनकृत्यं । तत्र तद्दिने वस्त्रगृहशरीरशुद्धिः कार्या । °

अथ श्राद्धभोजनक्रमः fol. 23*b*; इति श्राद्धचन्द्रिकायां पार्वणप्रयोगनिर्णयः 32*a*; अथैकोद्दिष्टनिर्णयः 33*a*; अथ सपिण्डीकरणप्रयोगः 40*b*; अथ वृद्धिश्राद्धं 46*a*.

It ends: इति वृद्धिश्राद्धं ॥ ° ॥

आचारद्वैधसंजातसंदेहतिमिरापहा ।
विबुधानन्दजननी कृतेयं श्राद्धचन्द्रिका ॥

पूर्वापरकृतत्वादि सर्वमेवाप्रयोजकं ।
सप्रमाणमुपादेयं न ग्राह्यं तद्विनाकृतं ॥

इति श्राद्धचन्द्रिका समाप्ता ॥

For the author's *Ācāracandrikā*, see no. 1648; for another *Śrāddhacandrikā*, see Rāj. M., Notices, VIII., p. 270. [H. T. Colebrooke.]

1735.

780. Foll. 95; size 9⅞ in. by 4⅛ in.; legibly written, in Devanāgarī, about 1750 A.D. (the last leaf by a different hand); ten lines in a page.

Śrāddhacintāmaṇi-Prayogapaddhati, or *Subodhinī*, a manual for the performance of obse-

DR.RUPNATHJI(DR.RUPAK NATH)

quial rites, by *Śivarāma* (*Sarveśvara*), son of *Viśrāma;* apparently intended as a summary of the *śrāddha* section of a general digest of religious duties, entitled *Kṛityacintāmaṇi*, by the same author.

It begins:

प्रणम्य तातं विश्रामं विष्णुं सर्वेश्वरं तथा ।
श्राद्धचिंतामणौ स्वीये निर्णीतानां तु कर्मणः (l. णां) ॥ १ ॥

देशाचारानुसारेण सामगानां हिताय वै ।
प्रयोगपद्धतिं सम्यक्कुर्वे नाम्ना सुबोधिनीं ॥ २ ॥

अथ प्रयोगः ॥ तत्रादावासन्नमरणेन देहशुद्ध्यर्थं प्रायश्चित्तं शक्त्यनुसारेण षडब्दं अब्दं सार्धाब्दमेकाब्दं वा कर्तव्यं । तत्र मिताक्षरामहार्णवनारायणभट्टादिसंमतः प्रायश्चित्तप्रयोगः । ०

इति विष्णुपूजा fol. 4*b*; ० वैष्णवं श्राद्धं 5*b*; इति प्रायश्चित्तप्रयोगः । ० अथोत्क्रांतिधेनुदानविधिः 8*a*, etc.; अथ अनाशनग्रहणविधिः 12*a*; अथ औताग्निदाहविधिः 15*b*; अथ दाहोत्तरं प्रथमदिनकृत्यं 21*a*, etc.; अथ षोडश श्राद्धानि 40*b*.

इति शुक्लश्रीविश्रामात्मजशिवरामविरचिते श्राद्धचिंतामणौ मरणावस्थामारभ्य सपिंडीकरणांतकृत्यप्रयोगप्रकाशः समाप्तः ॥ अथ विधानानि ॥ fol. 55*a*; इति श्राद्धचिंतामणौ जीवच्छ्राद्धप्रयोगः । 68*a*; इति शुक्ल ० श्राद्धचिंतामणौ द्वितीयप्रकाशप्रयोगः ॥ अथ आचारप्राप्तो दूर्वापूजाप्रयोगः 80*b*.

It ends: ततो ब्राह्मणान् सुमृष्टेनान्नेन यथाविभवं [ते] भोज्य स्वयमिष्टैः सह भुंजीत तद्दिने ब्रह्मचर्यादिनियमोऽभवेत् । एवं कृते सर्वज्वरादिरोगशांतिर्भवति ॥

इति श्रीमद्विद्वदग्रगण्यसर्वेश्वरविरचितं कृत्यचिंतामणिनामको ग्रंथः समाप्तः ॥

On fol. 1*a* the title कृत्यचूडामणि is given side by side with श्राद्धचिंतामणि, by different hands.

[H. T. Colebrooke.]

1736.

291. Foll. 41; size 10 in. by 5 in.; large, stiff Devanāgarī handwriting; 11–13 lines in a page.

Śrāddhapaddhati, another manual of obsequial rites, by *Kshemarāma*, son of *Kulamaṇi*, grandson of *Lokamaṇi*, and great-grandson of *Bābū Lakshmīkānta;* of Kanauj. Very incorrect.

The MS. begins:

दंतधावनतांबूलं स्निग्धस्नानप्रयोजनं ।
ऋतुकालाभिगामोऽथ ब्रह्मयान्यहीयते (!) ॥ ०

इति ० पार्वण [श्राद्धं] fol. 8*b*; इति श्राद्धपद्धत्यामन्वष्टकाश्राद्धं ॥ अथ शस्त्रहतस्य चतुर्दश्यां काम्यविकृतप्रार्वणश्राद्धं । 16*a*; इति ० विविधविकृतपार्वणानि ॥ अथ मातुरेकोद्दिष्टश्राद्धं 20*a*; इति ० काम्यविकृतपार्वणश्राद्धं ॥ अथ नित्यविकृतपार्वणानि 20*b*; इति ० मातुरेकोद्दिष्टश्राद्धं । अथ पितुरेकोद्दिष्टश्राद्धं 23*a*; अथ सहगामिन्याः द्व्याहिकश्राद्धं 26*b*; अथ द्विसप्ततिव्यवस्था । 30*a*; अथ दीपश्राद्धं 31*a*; अथ दीपोत्सवः 32*a*; इति श्राद्धषोडशी ॥ अथ सपिंडीकरणं 33*a*; अथ वृद्धिश्राद्धं 35*a*.

It ends:

मातरं श्रोपत्निनी (!) यस्य पिता श्रीभवमंडनः ।
तेन श्रीक्षेमरामेण कृतेयं श्राद्धपद्धतिः ॥

इति श्रीकन्यकुब्जदेशीयकवंशोद्भवद्विपंचाशद्भंधिसोमयाजिदीक्षितबाबूलक्ष्मीकांतस्तदात्मजश्छांदोगमुखतिलकश्रीलोकमणिस्तदात्मजः श्रीकुलमणिस्तत्पुत्रसोमयाजिक्षेमरामकृता श्राद्धपद्धतिः समाप्ता ॥ संवत् १८०५ वर्षे आषाढे मासि शुक्ले पक्षे पंचम्यां तिथौ हरिवसनगरे श्रीदीक्षितचिंजीवलिखितमिदं पुस्तकं ॥

[H. T. Colebrooke.]

1737.

617a. Foll. 71 (numbered 72, no. 35 having been omitted); size 9½ in. by 4 in.; careless Devanāgarī writing; nine lines in a page.

यच्छासनानुसारेण ब्राह्मणत्वादिदेवताः ।
देहे तिष्ठंति लोकस्य तं हरिं सर्वदाश्रये ॥

नन्विदमयुक्तं । बाधकाभावेन तेषां जातित्वोपगमात् । ०

It ends:

पुरुषोत्तमदासेन श्रीपीतांबरसूनुना ।
सुबोधिन्युक्तरीत्यैवं ब्राह्मणत्वं विचारितं ॥

XI. *Jīvavyāpakatvakhaṇḍanavāda*, begins fol. 13*a*:

आत्मा नित्यश्चित्स्वरूपो ऽणुरेवं
यो मायाक्तः स्वस्वरूपं न वेत्ति ।
तं तीर्णो स्याद्यत्प्रपत्त्यैव दैवं
तं श्रीकृष्णं भक्तियुक्तः प्रपद्ये ॥

ननु व्यर्थो ऽयमाडंबरः । आत्मनामेवाभावात् ०

It ends:

एवं सुबोधिनीरीतिमनुसृत्यात्मनामिह ।
संसारिणां व्यापकत्वं युक्तिभिः शकलीकृतं ॥

इति श्रीमद्वल्लभनंदनचरणनलिनरजोरंजितोत्तमांगश्रीपीतांबरतनुजपुरुषोत्तमकृतावतारवादावल्यामेकादशो जीवव्यापकत्वखंडनवादः संपूर्णः ॥

For a MS. of chapter i. (*Prahastavāda*, beg. अभवदतिरसालं० fol. 325) see Raj. Mitra, Notices, ix. p. 120, no. 3019; for ch. xiii. (*Śrībhāgavatasvarūpavishayakaśaṅkānirāsavāda*), Aufrecht, Cat. Bodl., no. 94. [H. T. Colebrooke.]

2498.

1459c. Foll. 11; size 8¼ in. by 4½ in.; Devanāgarī writing of 1722 A.D.; 11–16 lines in a page.

Chapter xi. of the same work.

[H. T. Colebrooke.]

2499.

1395a. Foll. 25; size 13¼ in. by 4¾ in.; 8 lines in a page; on yellow paper, written in the Bengalī character, in the 18th century.

DR.RUPNATHJI(DR.RUPAK NATH)

Tattvasaṃgraha, an exposition of the *Vedānta* theory, by *Rādhāmohana Gosvāmin Bhaṭṭācārya*, of the family of *Advaitācārya* (*Advaitānanda*), the coadjutor of *Caitanya*. Apparently only the first part of the work, without subdivisions.

For a complete copy, see Rāj. Mitra's Notices, ii. p. 104, no. 688. It begins :

श्रीमद्द्वैतवंशेन राधामोहनशर्म्मणा ।
प्रणम्य राधिकाकान्तं क्रियते तत्त्वसंग्रहः ॥

अथ तत्त्वनिर्णयः तत्परापरभेदेन द्विविधं तत्राद्यमाह द्वितीये ।
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

अन्वयं(*r.* अद्वयं) सजातीयनिष्ठभेदाप्रतियोगि । ज्ञानं स्वप्रकाशरूपं तत्त्वं परमार्थैसद्वस्तु । तज्ज्योतिषां ज्योतिस्तस्य भासा सर्व्वमिदं विभातीति श्रुतेः ०

It ends :

न त्वाधाराधेयभावनियमकं तत् केवलं जडस्य प्रकृतिवाच्यत्वे विवादः पर्य्यवसित इति द्वैतपक्ष एव समीचीनः शुद्धाद्वैतवादिमतापेक्षया* ऽस्य विलक्षणत्वं प्रागेव प्रायो दर्शितमिति संक्षेपः ॥ इति कलियुगपावनावतारश्रीमद्द्वैताचार्य्यचरणसरोजध्यायिदंश श्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचितस्तत्त्वसंग्रहः समाप्तः

[H. T. Colebrooke.]

2500.

2177C. Foll. 35; size 10¾ in. by 5 in.; indifferent Devanāgarī writing; 13–17 lines in a page.

Śrutisārasamuccaya, another exposition of the *Vedānta* doctrine, from a *Vaishṇava* point of view ; in eighteen chapters (*parikaraṇa* !) ; by *Jñānasāgara*. Rather incorrect.

It begins (somewhat corrected):

गुरुरेक(:) परं ब्रह्म सच्चिदानंदसदाशिवः† ।
परमात्मा परं धाम तस्मादहं नमाम्यहं(!) ॥ १ ॥
आत्मानात्मविरोधं तु कथमेक(!) लभते प्रभो ।
जीवेश्वरसमं तत्त्वं स एव परमं पदं ॥ २ ॥
चित्तभ्रांतिं च सो द्वंद्व(!) निश्चित्य सो(?) निरामयः ।
मुमुक्षूणामुपदेशः श्रुतेः सारं च(*r.* सारस्य) संग्रहः ॥ ३ ॥
प्रज्ञानमानंदं ब्रह्म अहं ब्रह्मास्मीत्यव्ययं ।
तत्त्वमसि नेति नेति द्योमायमात्मा (*r.* द्योमो ऽयमात्मा)
[ब्रह्मेति ॥ ४ ॥
अकर्म क्रियते कर्म अलक्ष्यमपि लक्ष्यते ।
अभक्ष्यं भक्ष्यते योगी श्रुतिशास्त्रस्य संग्रहः ॥ ५ ॥
पंचभूतादितंमात्रा(*r.* तन्मात्रं?) दशेंद्रियसमन्वितं ।
मनो बुद्धिरहंकारश्चित्तजीवादिपंचकं ॥ ६ ॥
पंचिकृतं(*r.* ०चो०) तत्त्वमेतच्छरीरं स्थूलमुच्यते ।
षड्विंशको महाविष्णुः प्रोक्तस्तत्त्वविदां तु तत् ॥ ७ ॥
प्राणादिनायवः पंच मनोबुद्धींद्रियाणि च ।
शरीरं सूक्ष्ममेतत्स्यादपंचि(*r.* ची)कृतमेव हि ॥ ८ ॥
इदंव प्रकृतिः प्रोक्ता तत्त्वविद्भिः श्रुतेर्बलिः ।
तयोरैक्यं परं ब्रह्म विश्वरूपेतिशाब्दिकं ॥ ९ ॥

1. *Tattvabodhanī*, fol. 2; 2. *ātmānātmaviveka*, fol. 2*b*; 3. *sākshātkāra viśvarūpadarśana*, fol. 3 ; 4. *brahmaiva-karmavyavahārasādhanam*, fol. 4 ; 5. *mahāvākyopadeśa*, fol. 4*b* ; 6. *prabodhavākya*, fol. 5*b*; 7. *paramārthanirṇaya* (?) ; 8. *jīvanmuktalakshaṇa*, fol. 7*b* ; 9. *nihpadvī*(?)-*aikyanirūpaṇa*, fol. 9 ; 10. *yajñāgnihotram*, fol. 10 ; 11. *prāṇahaṃsaśabda*, fol. 11; 12. *brahmasūtra*, fol. 12*b*; 13. *kaivalya*, fol. 13*b*; 14. *yogāshṭāṅgasiddhi*, fol. 15*b*; 15. *brahmavarṇaviveka*, fol. 21; 16. *āśramatrayaviveka*, fol. 25 ; 17. *āśramasaṃnyāsa*, fol. 28*b*.

It ends :

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं ॥ ४ ॥
श्रुतिशास्त्रसमुच्चयं ज्ञानसागरेण ग्रंथितं ।
संहिता परमहंसानां योगिनां मुक्तिलक्षणं ॥ ५ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यज्ञानसागरेणोक्त आत्मनिवास श्रुतिसारसमुच्चय समाप्तं ॥ संवत् १७२६ वर्षे मासमागैशिर ।

A *Śrutisārasamuccaya*, by *Pūrṇānanda*, is given in Aufrecht's Cat. Cat. [Gaikawar.]

* On *Śuddhādvaita*, see Bhandarkar, Report 1883-1884, p. 75.

† The author seems to have a certain predilection for the hypercatalectic *anushṭubh śloka*.

DR.RUPNATHJI (DR.RUPAK NATH)

2501.

820. Foll. 117; size 15¾ in. by 5 in.; fair, modern Bengalī writing, by two different hands; eight lines in a page.

Bhaktirasāmṛitasindhu, or *Bhagavadbhaktirasāmṛitasindhu*, an elaborate treatise on the nature of *Kṛishṇa-Caitanya*, and devotional belief in his all-pervading power; composed in 1541 A.D.

Having thus been composed only some fifteen years after *Caitanya's* death, it must have been the work of one of the immediate followers of the *Vaishṇava* reformer. The introductory verses seem, indeed, to ascribe its composition to *Sanātana*; though some scholars (perhaps finding an allusion to the author's name in the second introductory, and the final verses) rather make it the work of *Rūpa Gosvāmin*.*

The work consists of four sections (*vibhāga*) denominated after the four points of the compass, each section consisting again of a number of subdivisions (*laharī*). It begins:

अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामालालितो राधाप्रेयान् जिगीषति ॥ १ ॥
हृदि यस्य प्रेरणया प्रवर्त्तितो ऽहं वराकरूपो ऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥ २ ॥
विश्राममन्दिरतया तस्य सनातननतोर्मदीशस्य ।
भक्तिरसामृतसिन्धुर्भवतु सदायं प्रमोदाय ॥ ३ ॥
भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभियः ।
भक्तमकरानशीलितमुक्तिनदीकान्नमस्यामि ॥ ४ ॥
मीमांसकवडवाग्नेः कठिनामपि करडयन्नसौ जिह्वां ।
स्फुरतु सनातन सुचिरं तव भक्तिरसामृताम्भोधिः ॥ ५ ॥
भक्तिरसस्य† प्रस्तुतिरखिलजगन्मङ्गलस्य ।
अज्ञेनापि मयास्य क्रियते सुहृदां प्रमोदाय ॥ ६ ॥

एतस्य भगवद्भक्तिरसामृतपयोनिधेः ।
चत्वारः खलु वक्ष्यन्ते भागाः पूर्वादयः क्रमात् ॥ ७ ॥
तत्र पूर्वे विभागे ऽस्मिन् भक्तिभेदनिरूपके ।
अनुक्रमेण वक्तव्यं लहरीणां चतुष्टयं ॥ ८ ॥
आद्या सामान्यभक्त्याढ्या द्वितीया साधनाङ्किता ।
भावाश्रिता तृतीयात्र तुर्या प्रेमनिरूपिका ॥ ९ ॥
तत्रादौ सुष्ठु वैशिष्ट्यमस्याः कथयितुं स्फुटं ।
लक्षणं क्रियते भक्तेरुत्तमायाः सतां मतं ॥ १० ॥
अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतं ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥ ११ ॥

यथा नारदपञ्चरात्रे । ० one *śloka*; श्रीभागवतस्य तृतीये स्कन्धे च । ० three *ślokas*.

क्लेशघ्नी शुभदा मोक्षलघुताकृत्सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षिणी च सा ॥

तत्रास्याः क्लेशघ्नत्वं । क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥ अत्र पापं । अप्रारब्धं भवेत्पापं प्रारब्धं चेति तद्द्विधा ॥

I. *Rasopayogisthāyibhāvopapādano nāma pūrvavibhāgaḥ*:—1. *bhaktisāmānyalaharī*, fol. 3*a*; 2. *sādhanabhaktilaharī*, fol. 15*b*; 3. *ratibhaktilaharī*, fol. 18*a*; 4. *premabhaktilaharī*, fol. 19*a*.

II. *Bhaktirasasāmānyanirūpaṇo nāma dakshiṇo vibhāgaḥ*, begins:

प्रबलमनन्याश्रयिणा निषेवितः सहजरूपेण ।
अघमथनो मथुरायां सदा सनातनतनुर्जयति ॥

1. *vibhāvalaharī*, fol. 35*b*; 2. *anubhāvalaharī*, fol. 37*a*; 3. *sāttvikalaharī*, fol. 41*b*; 4. *vyabhicāralaharī*, fol. 55*b*; 5. *sthāyibhāvalaharī*, fol. 61*b*.

III. *Mukhyabhaktirasapañcakanirūpaṇo nāma paśchimavibhāgaḥ*, begins:

धृतमुग्धरूपभावो भागवतार्पितपृथुप्रेमा ।
स मयि सनातनमूर्त्तिस्तनोतु पुरुषोत्तमस्तुष्टिं ॥

1. *śāntabhaktirasalaharī*, fol. 64*a*; 2. *prītabhaktirasalaharī*, fol. 74*b*; 3. *preyobhaktirasalaharī*, fol. 82*a*; 4. *vatsalabhaktirasalaharī*, fol. 87*a*; 5. *madhurākhyabhaktirasalaharī*, fol. 89*a*.

* Rāj. Mitra, Notices, ii., no. 579, on the other hand, assigns the work to *Jīva Gosvāmin*.

† On the technical meaning of *bhaktirasa*, see Wilson, Select Works, i., p. 163.

DR. RUPNATHJI (DR. RUPAK NATH)

IV. *Gauṇabhaktirasādinirūpaṇo nāmottaravibhāgaḥ*, begins :

भक्तिभरेण प्रीतिं कलयन्नुररीकृतव्रजाङ्गसङ्गः ।
तनुतां सनातनात्मा भगवान्मयि सर्वदा तुष्टिं ॥

1. *hāsyabhaktirasalaharī*, fol. 90*b*; 2. *adbhutabhaktirasalaharī*, fol. 91*b*; 3. *vīrabhaktirasalaharī*, fol. 94*b*; 4. *karuṇabhaktirasalaharī*, fol. 95*b*; 5. *raudra(bhakti)rasalaharī*, fol. 97*a*; 6. *bhayānakabhaktirasalaharī*, fol. 92*a*; 7. *bībhatsabhaktirasalaharī*, fol. 98*b*; 8. *rasānām maitrīvairasthitilaharī*, fol. 103*a*; 9. *rasābhāsalaharī*, ends fol. 105*a* :

भारत्याद्याश्चतस्रस्तु रसावस्थानसूचिकाः ।
वृत्तयो नाट्यमातृत्वादुक्ता नाटकलक्षणे ॥

इति भक्तिरसामृतसिन्धावुत्तरविभागे रसाभासलहरी ॥

ग्रन्थस्य गौरवभयादस्या भक्तिरसप्रियः ।
समाहृतिः समासेन मया सेयं विनिर्मिता ॥

गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनातनो ऽस्मिन्नुत्तरभागे रसामृतासुनिधेः ॥

इति भक्तिरसामृतसिन्धौ गौणभक्तिरसादिनिरूपणं नाम चतुर्थो विभागः ॥ समाप्तो ऽयं भक्तिरसामृतसिन्धुरिति ॥

रामाङ्कशक्र१४६३गणिते शाके गोकुलमधिष्ठितेनायं ।
भक्तिरसामृतसिन्धुर्विटङ्कितः क्षुद्ररूपेण ॥

Regarding the date (? *rāmāṅgaśakra*), see *Bhandarkar*, Report 1883-4, p. 70.

Foll. 106–116 contain a copious list of contents in five parallel columns, while fol. 117*a* gives an (incomplete) list of the titles of works quoted by the author. Of the authorities actually met with in twice going over the work, the following may be mentioned (omitting a number of *Purāṇas*, etc.):

Agastyasaṃhitā, foll. 9*b*, 11*a*; *Aparādhabhañjana*, fol. 65*b* (कामादीनां कति न कतिधा पालिता दुर्निदेशा जाता तेषां न मयि करुणानत्रयानोपशान्तिः । उत्सृज्यैतानथ यदुपते सांप्रतं लब्धबुद्धिस्त्वामायातः शरणमभयं मां नियुंक्ष्वात्मदास्ये ॥ not in Hæberlin's text, and different metre); *Uddhavasandeśa*, fol. 96*a* (कृष्णं मुष्णन्न करुणबलान्नोष्टतो निष्ठुरस्त्वं मा मर्यादां यदुकुलभुवां भिन्दिरे गान्दिनेय । पश्याभ्यर्णं त्वयि रथमधिष्ठाय यात्रां विधित्सौ स्त्रीणां प्राणैरपि नियुतशो हन्त यात्रा व्यधायि ॥ *Rūpa-gosvāmin's Uddhavasandeśa*, MS. 570, v. 76, but quite different in second half); *Karṇāmṛita*, fol. 17*a* (स्नानंस्नामसितभुवोरुपचितामक्षीणपक्ष्माङ्कुरेष्वालोलामनुरागिणोर्नयनयोरार्द्रौ मृदौ जल्पिते । स्नातास्नामधरामृते मदकलामम्लानवंशीस्वनेष्वाशास्ते मम लोचनं व्रजपतेर्मूर्तिं जगन्मोहिनीं ॥), 17*b*, 34*b*, 70*a*, 71*b*; *Kātyāyanasaṃhitā*, fol. 7*b* (वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न गौरिचिन्ताविमुखजनसङ्गासवैशसं ॥); *Gītagovinda*, foll. 27*b*, 87*b*, 88*b*; *Govindavilāsa*, fol. 57*a* (चिरमुत्कण्ठितमनसो राधामुरवैरिणोः कोऽपि । निभृतनिरीक्षणजन्मा प्रत्याशावह्निर्वो जयति ॥); *Dānakelikaumudī*, fol. 55*b* (गभीरोऽप्यम्भ्रानं दुरभिगमपारो ऽपि नितरामहार्यो मर्यादां दधदपि हरेरास्पदमपि । सतां स्तोमः प्रेमण्युदयति समग्रे स्थगयितुं धिक्कारं न स्फारं जलनिधिरिवेन्दौ प्रभवति ॥), 87*b* (कुलवधूवतीनां°); *Nārada-Pañcarātra*, foll. 1*b*, 2*b*; *Pañcarātra*, foll. 3*b*, 11*b*, 18*a*; *Padyāvalī*, foll. 36*b*, 44*a*, 65*b* (ध्यानातीतं° given in *Padyāv.*, MS. 823, fol. 9*a*, as by *Yādavendrapurī*), fol. 87*b* (वामं वपुः पुलकितं° ib., fol. 18*a*), 88*b* (अकस्मादेकस्मिन्यधि° ib., fol. 16*b*, by *Kavicandra*); *Prahlādasaṃhitāyāṃ śrī-Uddhavavākyam*, fol. 88*b* (भगवानपि गोविन्दः कन्दर्पशरपीडितः । न भुङ्क्ते न स्वपिति च चिन्तयन् वो ह्यहर्निशं ॥); *Bilvamaṅgala*, fol. 35*b* (अयि पङ्कजनेत्रमौलिमाले तुलसीमञ्जरि किंचिदर्थयामि । अवबोधय पार्थसारथेस्त्वं चरणाब्जशरणाभिलाषिणं मां ॥), 44*a* (हस्तमुत्क्षिप्य यातो ऽसि बलात्कृष्ण किमद्भुतं । हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥), 46*a* (राधा पुनातु जगदच्युतदत्तचित्ता मन्यानकं निदधती दधिरिक्तपात्रे । °); *Bilvamaṅgalastava*, fol. 64*a* (अद्वैतवीथीपथिकैरुपास्याः स्वानन्दसिंहासनलब्धदीक्षाः । शठेन केनापि वयं हठेन दासीकृत्या गोपवधूविटेन ॥); *Brahmayāmala* (? reference not found); *Brahmasaṃhitāyām Ādipurusharahasya*, foll. 27*a*, 30*a* (see no. 2511); *Bhaktiviveka*, fol. 11*a* (चिन्तां कुर्यान्न रक्षायै विक्रीतस्य यथा पशोः । तथापेक्षेत हरौ देहं विरमेदस्य रक्षणात् ॥); *Bharata*, fol. 60*b* (यदुक्तं श्रीभरतेन ॥ शक्तिरस्ति विभावादेः काप्यसाधारणी कृतौ । प्रमाता तदभेदेन स्वं यया प्रतिपद्यते ॥);

DR. RUPNATHJI (DR RUPAK NATH)

Bhāvārthadīpikā, fol. 3*a* (त्वत्कथामृतपायोधौ विहरन्तो महामुदः । कुर्वन्ति कृतिनः केचित्तुर्वगं तृणोपमं ॥); *Brahmayāmala*(?); *Māghakāvya*, foll. 23*b*, 24*b*; *Mukundamālā*, fol. 57*a* (दिवि वा भुवि वा ममास्तु वासो० चरणौ ते मरणे ऽपि चिन्तयामि ॥ Hæberlin, p. 516); *Mukundāshṭaka*, fol. 33*b* (कनकनिबहशोभानिन्दिप्रीतं नितम्बे तदुपरि नवरक्तं वस्त्रमित्थं दधानः । प्रियमिव किल वर्णं रागयुक्तं प्रियायाः प्रणयतु मम नेत्राभीष्टपूर्तिं मुकुन्दः ॥); *Yāmunācāryastotra*, fol. 11*a* (वपुरादिषु यो ऽपि को ऽपि वा गुणतो ऽस्मानि यथा तथाविधः । तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥), 23*b* (रघुवर यदभूस्त्वं तादृशो वायमस्य प्रणत इति दयालुर्यच्च चैद्यस्य कृष्ण । प्रतिभवमपराद्धुर्बुध्धसायुज्यदोऽभूर्वद किमपदमागस्तस्य ते ऽस्ति क्षमायाः ॥), 27*a* (यदण्डमण्डान्तरगोचरं च०); *Rasasudhākara*, fol. 43*a* (अतिप्रयत्नेन रतान्ततान्ता कृष्णेन तान्तादवरोपिता सा । आलक्ष्य तस्यैव करं करेण ज्योत्स्ना कृता नन्दमनिन्दमाप ॥); *Lalitamādhava*, foll. 25*a* (दरोदञ्चद्गोपीस्तनपरिसरप्रेक्षणभवात् करोतु कम्पादीपञ्चलति किल गोवर्धनगिरौ । ०), 25*b*, 26*b*, 28*b*, 84*b*, 86*b*, 87*a*; *Vidagdhamādhava*, foll. 28*a* (रुन्धन्नसुभृतश्चमत्कृतिपरैः कुर्वन्मुहुस्तुमुरुं ध्यानादन्तरयन् मनन्दनमुखान् विस्तारयन् वेधसं । ०), 48*b*, 67*b*, 84*b*, 86*b*, 95*b*, 96*b*, 102*a*; *Vishṇuyāmala*(?); *Vishṇurahasya*, fol. 7*b* (आलिङ्गनं वरं मन्ये व्यालव्याघ्रजलौकसां । न सङ्गः शल्ययुक्तानां नानादेवैकसेविनां ॥), 8*b* (श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि । ते यान्ति शाश्वतं विष्णोर्लोकानन्दं परमं पदं ॥); *Vaishṇavatantra*, fol. 29*b* (अष्टादशमहादोषै रहिता भगवत्तनुः । सर्वैश्वर्यमयी सत्यविज्ञानानन्दरूपिणी ॥); *Hamsadūta*, fol. 46*b* (कदाचित्खेदाग्निं Hæberlin, p. 374, *śl.* 3), 72*a* (पुरस्तादाभीरी०। स जानुभ्यां० ib., p. 383, *śl.* 50*b*, 51*b*), 95*a* (विराजन्ते ib., *śl.* 54); *Haribhaktivilāsa*, fol. 11*b* (तवास्मीति वदन् वाचा तथैव मनसा विदन् । तत्स्थानमस्थितस्तस्था मोदते शरणागतः ॥); *Haribhaktisudhodaya*, fol. 2*b* (त्वत्साक्षात्करणाह्लादविशुद्धाभिस्थितस्य मे । सुखानि गोष्पदायन्ते ब्राह्माण्यपि जगद्गुरो ॥), 8*b* (प्रविशन्नालयं विष्णोर्दैशनार्थं सुभक्तिमान् । ०), 12*b*, 17*a*, 65*b*, 70*b*; *Harisudhodaya*, fol. 93*b* (स्थानाभिकामस्तपसि स्थितो ऽहं०।).

[H. T. Colebrooke.]

2502.

1547E. Foll. 49; size 10 in. by 4½ in.; modern Devanāgarī writing; 10 or 11 lines in a page.

A fragment of the *Bhaktirasāmṛitasindhu*, extending as far as fol. 33*b* of the preceding MS.

An additional leaf, marked भ० र० ५०, merely gives the following colophon, written in a different hand: इति श्रीचरणदासविरचितो भक्तिरसामृतसिंधुनामको ग्रंथः समाप्तः ॥ ०

[H. T. Colebrooke.]

2503.

806*b*. Foll. 110; size 15¼ in. by 5 in.; clear, modern Bengalī handwriting; eight lines in a page.

Durgamasaṃgamanī, a commentary on the *Bhaktirasāmṛitasindhu*, annotating the text and enlarging upon the doctrines propounded therein. Apparently by *Rūpa* (? or *Jīva*) *Gosvāmin*; though in the colophon ascribed to *Sanātana*.

It begins:

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभो ऽनुजः सो ऽसौ श्रीरूपो जीवसङ्गतिः (सङ्गतिः

[B, orig. A.) ॥

अथ श्रीमान् ग्रन्थकारः सकलभागवतलोकहिताभिलाषपरवशतया प्रकाशितैः स्वहृदयदिव्यकमलकोषविलासिभिः श्रीमद्भागवतरसैरेव भक्तिरसामृतसिन्धुनामानं ग्रन्थमपूर्ववचनमाचिन्वानस्तदूर्णायितव्यस्यैव च सर्वोत्तमतां निश्चिन्वानस्तद्ग्रन्थनयैव मङ्गलमासञ्जयति । एवं सर्व एव ग्रन्थो ऽयं मङ्गलरूप इति च विज्ञापयति ॥ अखिलेति ॥ विधुः श्रीकृष्णो जयति सर्वोत्कर्षेण वर्तते । ० ॥ २ ॥

अथ निजभक्तिप्रवर्तनेन कलियुगपावनावतारं विशेषतः स्वाश्रयचरणकमलं श्रीश्रीकृष्णचैतन्यदेवं भगवन्तं नमस्करोति हृदीति॥ हृद्विषयप्रेरणया प्रवर्तितो ऽस्मि न सन्दभे इति शेषः। वराकेति स्वयं दैन्येनोक्तं । सरस्वती तु तदसहमाना वरं श्रेष्ठं

DR.RUPAK NATH

आ सम्यक् कायति शब्दायते इति तमेव तं स्तावयति सत्कवितायामपि तत्प्रेरणयैवाच प्रवृत्तिः स्यात् नान्यथा इत्यपेरर्थः ॥२॥

अथ निजेष्टदेवतावतारत्वेन निजगुरुं स्तुवन् प्रार्थयते विश्राम इति ॥ भक्तिरसरूपस्यामृतस्य सिन्धुरिवेति तन्नामायं ग्रन्थः तस्य श्रीकृष्णाख्यस्य मदीशस्य सदा स्वेन रूपेण स्थितस्यैव विकाशितनानान्यरूपतनोर्या सनातननामा तनुस्तस्या विश्राममन्दिरतया तत्तुल्यतयाङ्गीकारेणेत्यर्थः । अन्यस्या अपि नारायणाख्यायाः सदा समानार्थं सनातन तत्तनोः सिन्धुर्विश्राममन्दिरं भवतीति ॥ ३ ॥ ०४ ॥

अथ निजग्रन्थस्य विरोधिकृतपराभवाभावकरीं श्रीगुरुचरणान् प्रार्थयते मीमांसकेति । ० ॥ ५ ॥

It ends: इति दुर्गमसंगमनीनाम्न्यां भक्तिरसामृतसिन्धुटीकायां उत्तरविभागे रसाभासलहरी नवमी ॥ इति दुर्गमसंगमनीनाम्न्यां भक्तिरसामृतसिन्धुटीकायां चतुर्थो विभागः समाप्तः ॥

रामाङ्केति शालिवाहनस्य संवत्सरगणनया विक्रमादित्यस्यापि ज्ञेया । अङ्कस्य वामगतिप्रसिद्धा त्रिपञ्चाधिकचतुर्दशशतीगणित इत्यर्थः ॥ विक्रमादित्यस्य त्व[ष्ट]नवत्यधिकपञ्चदशशतीगणित इति ज्ञेयं ॥ विटङ्कित उट्टङ्कितः सुष्ठुरूपेत्येव पठितव्यं । तेषां दीनम्मन्यतामयपाठे ऽपि तदसहिष्णुः सरस्वती क्षुद्रं सूक्ष्मत्वज्ञेयं रूपं स्वरूपं यस्येति गत्यन्तरास्पदं स्फोटयन्ती समाहितवती ॥

श्रीकृष्णः सर्वैपूर्णैः स चरति विपुले गोकुले व्यक्ततत्तन्
माधुर्यैश्चर्यवर्यैः स च पशुपशृतानन्तलक्ष्मीभिरिष्टः ।
श्रीराधावर्गमध्ये स च मधुरगुणश्री(म)धुराधारधारी-
त्यस्मिन् ग्रन्थे रसाब्धावभिमतमहिमा[-]रसारप्रचारः ॥

यदपि च नातिविशुद्धा तदपि च सद्भिः कृपापुरीकार्या ।
दुर्गमसंगमनीयं लोके वास्यामृताम्भोधेः ॥

इति सनातनगोस्वामिकृता दुर्गमसंगमनी भक्तिरसामृतसिन्धुटीका समाप्ता ॥

Two additional leaves contain an index of chaptors, and a list of 26 works quoted in the commentary. Of the latter may be mentioned: *Kurukshetrayātrā*, *Gopālastava*, *Dhruvacarita*, *Sāhityadarpaṇa*. [H. T. Colebrooke.]

2504.

1489b. Foll. 85 (numbered 67–151); size 15½ in. by 4½ in.; Bengalī handwriting of 1806 A.D.; seven lines in a page.

Durgamasaṃgamanī. This (rather careless) copy omits the last colophon and the last but one of tho final *ślokas* of the preceding MS.; and it also differs considerably as to the rest; viz.:

इति दुर्गम[स]ङ्गमनीनाम्न्यां हरिभक्तिरसामृतसिन्धुटीकायां चतुर्थो विभागः ॥ रामोन्दति (!) शालिवाहनसम्वत्सरगणनया विक्रमादित्यस्य सापि सा ज्ञेया। अङ्कस्य (!) वामागतिप्रसिद्धा०--दीनं सन्यतामयपाठे ऽपि क्षुद्रां सूक्ष्मं दुर्ज्ञेयं (?) रूपं स्वरूपं यस्येति सरस्वतीसंवादः ॥ यदपि च नातिविशुद्धा० वास्यामृताम्भोधेः ॥ समाप्तेयं टीका तेषामेव प्रीतये तु [भ]वतु

The MS. is preceded by six leaves, marked क्रोड (पत्र), and numbered 1–6 in the left, and 61–66 in the right margin. This passage, which apparently belongs to the present work, begins: अत्र जीवगोस्वामिमतानुसारिणः । नित्यसिद्धास्तु गोप्यः स्वकीया एव ताश्च राधादयः । ०

[H. T. Colebrooke.]

2505.

1489a. Foll. 60; size 15½ in. by 4½ in.; indifferent Bengalī handwriting, apparently by the same hand as the preceding MS.; seven lines in a page.

Krishṇabhaktirasodaya, another treatise on the same subject, apparently consisting chiefly of passages from the *Bhaktirasāmṛitasindhu*, with comments thereon; by *Rādhāmohana Śarman*. It begins:

गोपीनयनचकोरीस्वादितमुरसामृतासिताङ्गरुचिः ।
कोपी व्रजेन्द्रतनयो नीरदनीलो विधुर्जयति ॥
श्रीमद्वैतवंशोद्भूराधामोहनशर्मणा ।
क्रियते परमामोदः कृष्णभक्तिरसोदयः ॥
श्रीमद्रसामृताम्भोधिर्गोस्वामिभिरुदाहृतः ।
तस्मादुद्धृत्य यत्किंचिदन्यतश्च निवेद्यते ॥
क्षन्तव्यं मम चापल्यं तद्गर्वेरितचेतसः ।
वैष्णवैः कृष्णसंबन्धे गुणमात्रपरिग्रहैः ॥

तत्र भक्तिलक्षणं ॥

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतं ।
आनुकूल्यन कृष्णानुशीलनं भक्तिरुत्तमा ॥ (see p. 812b)

DR.RUPNATHJI (DR.RUPAK NATH)

अत्र प्रकरणात् भक्तिपदेन कृष्णभक्तिरेवोच्यते। तथा चानुकूल्येन कृष्णानुशीलनं कृष्णभक्तिरिति सामान्यतः स्वरूपलक्षणं° a lengthy discussion; ननु भक्तेः किं प्रयोजनमित्याह। क्लेशघ्नी शुभदा° p. 812*b* ॥ इति क्लेशः स मूलपापं० in the comment on this the author remarks: अत्र प्रमाणं मूलग्रन्थे (भक्तिरसामृतसिन्धौ) मत्कृतकृष्णभक्तिसुधार्णवे च विस्मृतमन्यत्र चानुसन्धेयं°

The *Durgamasaṃgamanī* is quoted at fol. 8*b*.

The work consists of ten chapters (*ullāsa*), viz.: 1. fol. 10*b*; 2. *sādhyabhaktinirūpaṇam*, fol. 15*b*; 3. *bhaktirasanirūpaṇam*, fol. 25*a*; 4. *vibhāvādinir.*, fol. 39*a*; 5. *śāntabhaktirasanir.*, fol. 44*a*; 6. *prītabhaktirasavivaraṇam*, fol. 48*b*; 7. *sakhyabhaktirasanir.*, fol. 50*b*; 8. *vatsalabhaktirasanir.*, fol. 51*a*; 9. *ujjvalabhaktirasanir.*, fol. 54*b*; 10. (*maitrīvairavivecanam*) ends fol. 60*b*: भरतमुनिनाप्युक्तं। रसाभासा अनौचित्यप्रवर्तिता इति। एवमन्यदूह्यं इति कलियुगपावनावतारः ॥ श्रीमद्वैतवंशश्रीराधामोहनगोस्वामिविरचिते कृष्णभक्तिरसोदये दशम उल्लासः। समाप्तो ऽयं ग्रन्थः ॥ Cp. Rāj. Mitra, Notices, iii., no. 1192. [H. T. Colebrooke.]

2506.

2486. Foll. 249 (five of which, 124–128, are wanting), and two *śuddhapattras* (after 62 and 82 resp.); size 11½ in. by 4½ in.; fairly written, in Devanāgarī, about 1550 A.D. (fol. 61 supplied by a later hand); 8–11 lines in a page.

Vishṇubhakticandrodaya, another work on the same subject, in sixteen chapters (*kalā*), by *Nṛisiṃhāraṇya Muni*.

It begins:

वन्दे [ऽहं] श्रीनृसिंहेशं पुण्यारण्यं गुरूत्तमं।
श्रीसाममन्त्रराजं (!) च वैष्णवान्हार्द्दि (°वाह्लाद)सिद्धये॥

आविर्बभूव लोके ऽस्मिन् सद्भक्त्याह्लाददायकः।
श्रीविष्णुभक्तिचंद्रो ऽयं विष्णुप्रेमाभिवर्धनः॥

यस्य (तस्य R. M.) श्रुतेरेककलात्मकस्य
हन्याद्य(द्वद्याद R. M.)नेकाद्यतमः प्रबंधः।
शैथिल्यमेतींद्रियवातयात्या (ज्ञान्या R. M.)
नानांतरायाध्वमतौ हतायां॥

वक्ष्ये निरंतराशेषदृज्जन्माधकारविध्वंसनं।
स्मृत्वा प्रणम्य चादौ गुरुं श्रीविष्णुभक्तिचंद्रोदयं॥

संसारानलनिर्विण्णो मनीषी स्वार्थसिद्धये।
संसारासारतां ज्ञात्वा गुरुं शरणमाव्रजेत्॥

गुरुसेवारतः शिष्यः स्निग्धः सर्वनिवेदकः।
गुरुष्वीश्वरभावश्च दंडवत्प्रणमेद्गुरुं॥

अप्रमत्तोद्यतः शश्वद्गुर्वाज्ञां शिरसा मुदा।
गृह्णन्परिचरेद्भक्त्यानवज्ञस्तोषयन्गुरुं॥

तथा चोक्तानि श्रीमद्भागवते श्रीभगवता उद्धवं प्रति शिष्यलक्षणानि।

No authorities, except *Purāṇas*, *Bhagavadgītā*, *Vishṇurahasya*, *Vaishṇavatantra* (fol. 93*b*), and such-like works have been met with.

For the contents of the work, cp. Rāj. Mitra, Notices, viii., p. 279.

The MS. is not quite complete, the 16th *kalā* beginning on fol. 146*b*; and the last leaf breaking off at ॥ अथ फाल्गुने मासि श्रीविष्णोः—

[Gaikawar.]

2507.

735. Foll. 158; size 13 in. by 4¼ in.; clear, modern Bengalī handwriting; eight lines in a page.

Vishṇubhaktidarpaṇa, or *Vishṇudarpaṇa*, another compendium of devotional worship, in fifteen chapters, by *Upendrācārya*.

I. वासुदेवादिका मूर्तीर्दधानं परमं पदं।
नारायणं शास्त्रयोनिं नमामि हरिमीश्वरं॥

गुरुं प्रणम्य श्रीविष्णुं पूजनं परमात्मनः।
अष्टाङ्गभक्तियोगाढ्यं मन्त्रैरष्टाक्षरादिकैः॥

दृष्ट्वा तत्पुराणानि मतं भागवतस्य च।
मन्त्रार्थैकघनोपेतं लिखिष्यामि यथामति॥

यमाश्च नियमाश्चैव आसनं प्राणसंयमः।
प्रत्याहारो धारणा च ध्यानं समाधिरेव च॥

अष्टावङ्गानि योगस्य भक्तैर्भक्तिविदो विदुः।
अहिंसाद्या यमाः प्रोक्ताः शौचाद्या नियमा मताः॥

DR.RUPANATHJI(DR.RUPAK NATH)

अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसंचयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयं ॥
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चणं (? मृद्° = गो-
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥ [पीमृत्तिका)।
एते यमाः सनियमा उभयोर्द्वादश स्मृताः ।
आसनं स्वस्तिकाख्यं स्याद्वीरासनमथापि वा ॥°

II. अथ दीक्षां लिखिष्यामि सर्वशक्त्यां कलावतीं ।
दीक्षां विना पशुत्वं हि विप्रस्य न निवर्तते ॥ fol. 10*b*.

III. भक्त्यंगान्यथ वक्ष्यामि भक्तानां चैव लक्षणं ।
नैष्कर्म्यं पापशुद्धिं च विष्णुभक्तेश्च नित्यतां ॥ 20*b*.

IV. अथ साधनयोगस्य माहात्म्यं लिख्यते ऽधुना ।
यथा दृष्टं पुराणेषु श्रुत्वा जननमुत्तमं ॥ 30*b*.

V. अथ प्रणम्य विश्वेशं विधानं सार्वमन्त्रिकं ।
प्रातःप्रभृति सायान्तं लिखिष्यामि यथामति ॥ 43*a*.

VI. पीठन्यासं विधायैवं तत्र विष्णुं स्मरेत्प्रभुं ।
स्वाधिष्ठानसमुद्भूतनादेन प्रणवात्मना ॥ 56*b*.

VII. अथ विज्ञानमानन्दं ब्रह्म नत्वा महेश्वरं ।
पूजायां तस्य मन्त्राणां प्रकाशाद्यथ कथ्यते ॥
एको नारायणो देवः सर्वः सर्वेश्वरो विभुः ।
भक्तानां कार्यसिद्ध्यर्थं चतुर्मूर्तिमहीयते ॥ 68*a*.

VIII. सत्यं ज्ञानमनन्तं यज्जन्माद्यस्य यतो भवेत् ।
तं विष्णुमव्ययं पूर्णं प्रणम्य जगदीश्वरं ॥
द्वादशाक्षरमन्त्रस्य वक्ष्यामि विधिमुत्तमं ।
भक्तानुग्रहणार्थाय वासुदेवेति यं विदुः ॥
वेदादिर्हृदयं तेऽन्तो भगवान्वालहंसकौ ।
नारायणविष्णुयुक्तौ सत्यतुष्टेन संयुतः(!) ॥ 78*b*.

IX. अथ प्रणम्य विश्वेशं भववन्ध्यमच्युतं ।
विधानं तस्य पूजाया यथोक्तं लिख्यते ऽधुना ॥ 89*b*.

X. अथ सच्चानन्दमयं ब्रह्म नत्वा महेश्वरं ।
लिख्यते तस्य पूजाया विधानं कलितारणं ॥ 97*a*.

XI. ङेन्तौ* च कृष्णगोविन्दौ मन्त्राद्यौ मदनादधः ।
अष्टादशाक्षरो मन्त्रो भक्तानां सुरपादपः ॥ 106*b*.

XII. अथ संक्षिप्तबुद्धीनां विधानं सार्वमन्त्रिकं ।
यथामति लिखिष्यामि मालाशुद्धिं पुरस्क्रियां ॥ 114*a*.

XIII. अथ पौराणिकैर्मन्त्रैरुपचारविधिं ब्रुवे ।
महापूजाविधानेन गृहदानविधिं तथा ॥ 123*a*.

XIV. अतः परं लिखिष्यामि शयनोत्थादिकं विधिं ।
श्रीहरेर्जागरं पुण्यं वैष्णवानि व्रतानि च ॥ 141*a*.

XV. अथ श्रीभागवतोक्तपयोव्रतपद्धतिर्लिख्यते । तत्र फाल्गु-
नामावास्यायां ब्राह्मे मुहूर्ते उत्थितः कृतमैत्रादिः श्रोतजले
स्नानसंकल्पं कृत्वा° fol. 157*a*.

It ends: ततो यजमान आचार्यादिभ्यो यथाशक्ति वित्तशाठ्यं वर्जयित्वा दक्षिणां सुवर्णं तदर्धं पादं वा दत्त्वा तानन्यानपि ब्राह्मणान् सद्गुणेन भोजनेन भोजयेत् । यथाशक्ति च चाण्डालादिभ्योऽपि भोजनं दद्यात् । ततो ऽच्छिद्रमवधार्य बन्धुभिः सह भुञ्जीत । व्रतेनानेन भगवन्तमाराध्य सकल-यज्ञव्रततपसां सिद्धिमाप्य भगवल्लोकमाप्नुयात् ॥ इति श्रीभा-गवतोक्तपयोव्रतविधिः समाप्तः ॥ इति श्रीमानुपेन्द्राचार्यविरचितं श्रीविष्णुदर्पणं समाप्तं ॥

The other colophons run: इति विष्णुभक्तिदर्पणे (प्रथमः) परिच्छेदः (corrected everywhere for original पटलः). [H. T. Colebrooke.]

2508.

823e. Foll. 38; size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; six lines in a page.

Haribhaktikalpalatikā, a treatise, by *Kṛishṇa Sarasvatī*, on the nature of '*bhakti*' and the various grades of it through which the votaries of *Kṛishṇa* have to pass before attaining perfection of faith.

It begins:

सर्वात्मानमशेषलोकपितरं सर्वेश्वरं शाश्वतं
यं नो वेत्ति जगन्निवासममृतं यन्मायया न्धं जगत् ।
यं ज्ञात्वा कृतिनो विशन्ति परमानन्दावबोधं च यं
तं भक्तप्रियबान्धवं शरणदं वन्दे मुरद्वेषिणं ॥ १ ॥

व्रजस्त्रीणां प्रेमप्रणयहृदयो वा किमथवा
कृपायुक्तो भक्तेष्वसुरनिधनश्छन्नमनिपुनः ।
अपि स्वात्मारामो य इह विजिहीर्षुर्व्रजमगात्
तमानन्दं वन्दे नवजलदजालोदरनिभं ॥ २ ॥

* The guttural nasal here may possibly be intended for the nasal sound which occurs in many of the formulas in this and several other chapters, *e.g.* ॐ प्रद्युम्नाय । ॐ अनिरुद्धाय नमः । श्रीं श्रियै नमः । ॐ सोम-मण्डलाय नमः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

असत्यमपि संसारं यद्भक्तिः सत्यतां नयेत् ।
गोपीनां सदयानन्दं तमानन्दमुपास्महे ॥ ३ ॥

पुण्याम्भोधिभवा तमोविघटिनी सत्सङ्गमूलोत्तमा
श्रद्धापल्लविनी विविक्तिकलिकाप्रेमप्रसूनोज्ज्वला ।
सान्द्रानन्दरसावहं च परमज्ञानं फलं बिभ्रती
सेयं श्रीहरिभक्तिकल्पलतिका भूयात्सतां प्रीतये ॥ ४ ॥

The work is divided into fourteen *stavakas*, viz.: I. (verses 46) on the naturo of the god; II. (vv. 78) on the kinds of worshippers; III. (vv. 17) on the nine grades of *bhakti*, to each of which is devoted one of the succeeding chapters; IV. (vv. 21) on *śravaṇa*, the recital of *Hari's* actions and sayings; V. (vv. 60) on *kīrtana*, invocation of his names and eulogizing of his qualities; VI. (vv. 34) on *smaraṇa*, or conception of *Kṛishṇa* as the aggregate of all that delights the human heart; VII. (vv. 27) on *pādasevana*, or paying tribute of admiration by meditating on his acts and offering magnificent presents; VIII. (vv. 48) on *arcana*, or worshipping him by sixteen different kinds of offerings, such as *tulasī*, etc.; IX. (vv. 12) on *vandana*, or prostration before the deity; X. (vv. 19) on *dāsya*, or complete absorption of soul and mind in the divine being; XI. (vv. 5) on *sakhya*, or love for the deity; XII. (vv. 10) on *ātmanivedana*, or annihilation of one's individuality and becoming one with *Kṛishṇa*; XIII. (vv. 13) on knowledge of the divine; XIV. (vv. 19) on the atonement for transgressions and relapses of the soul.

Occasionally explanatory remarks are inserted between the verses, in which the author speaks of himself in the third person, as to what the succeeding verses are intended to show.

It ends:

ये शृण्वन्ति पठन्ति वानिशमिदं भक्तिप्रबोधामृतं
ये वा साधु निरूपयन्ति भगवद्भक्तेषु निर्मत्सराः ।
ते निर्धूय भवान्धकारमखिलं भक्तिप्रबोधामृतं
सान्द्रानन्दमनावृतं तदमृतं विन्दन्ति विष्णोः पदं ॥ १९ ॥

इति श्रीहरिभक्तिकल्पलतिकायां चतुर्दशस्तवकः ॥ १४ ॥
श्रीकृष्णसरस्वतीविरचितो ग्रन्थः संपूर्णः ॥

[H. T. Colebrooke.]

2509.

827b. Foll. 18; size $12\frac{7}{8}$ in. by 5 in.; good, modern Bengalī handwriting; seven lines in a page.

Bhaktilaharī, apparently a work of a similar nature, by *Mayirama*. This MS. contains only the fourth chapter (*viśvasamuddeśa-taraṅga*), explaining the evolution of the universe, with the heaven of *Vishṇu* as the crowning of the edifice. It begins:

गुरुं विघ्नेश्वरं कृष्णं प्रणिपत्य प्रणीयते ।
मणिरामेण विश्वस्य समुद्देशो यथामति ॥ १ ॥
नित्यस्थलजलादीनां तेजसा पञ्चमस्य च ।
सुतानध्वनिना सार्धं ज्योतिरुत्पद्यते महत् ॥ २ ॥
उभाभ्यां जडितोभूय व्याप विष्टो दिशो दश ।
विरेजे सूक्ष्मरूपेण विराट् तेन निगद्यते ॥ ३ ॥
शब्दस्वरूपा प्रकृतिर्ज्योतीरूपस्तु पूरुषः ।
प्रकृतेः समवायाद्वै तेजसस्थोपपद्यते ॥ ४ ॥
तेजोयोगाद्विभिन्नः सन् प्राज्ञः साक्षी निरञ्जनः ।
अव्याहताज्ञप्रकृतिराद्या सृष्टिविधायिनी ॥ ५ ॥
जिह्वारमणयोगात्सा गुणाः(?r. गुणान्) सत्त्वं रजस्तमः ।
पञ्चभूतानीन्द्रियाणि संभूतान्यसृजन्मुहुः ॥ ६ ॥
गुणास्तन्मात्रसहितैः पञ्चभूतैः समन्ततः ।
इच्छाज्ञानक्रियाभिस्ते ब्रह्माणं प्रकृता अजः (!) ॥ ७ ॥

It ends:

ब्रह्मलोकश्च वैकुण्ठः शिवलोकस्ततः परः ।
शक्तिलोकस्तु गोलोको महामायाभिधः परः ॥ २३३ ॥
गुरुलोकः सप्तविधः सत्यलोकः प्रकीर्तितः ।
गोलोकाद्गुरुलोकानां पञ्चाशत्कोटियोजनं ॥ २३४ ॥
इति विश्वसमुद्देशः संक्षेपात्कथितो मया ।
विस्तरेण महास्त्रो वक्तुं नैव क्षमो भवेत् ॥ २३५ ॥

इति भक्तिलहर्यां विश्वसमुद्देशो नाम चतुर्थस्तरङ्गः ॥

[H. T. Colebrooke.]

DR.RUPNATH JI(DR.RUPAK NATH JI)

2510.

939b. Foll. 10; size 12¾ in. by 4¼ in.; fair, modern Bengalī handwriting; eight lines in a page.

Gauragaṇoddeśadīpikā, or *Gaurāṅgagaṇoddeśadīpikā*, an account of the chief disciples of *Caitanya* (*Gaura*, *Gaurāṅga*), and the reformer's own mythic succession; composed, in 1544 A.D., by *Paramānandadāsa*, usually called *Kavikarṇapūra*, son of *Śivānanda Sena*; and pupil of *Śrīnātha*.

It begins: श्रीचैतन्यचन्द्राय नमः ॥

यः श्रीवृन्दावनभुवि पुरा सच्चिदानन्दसान्द्रो
गौराङ्गीभिः सदृशरुचिभिः श्यामधामा ननर्त्त ।
तासां शश्वद् दृढतरपरीरम्भसंभेदतः किं
गौराङ्गः सन् जयति स नवद्वीपमालक्षमानः ॥ १ ॥

नमस्यामोऽस्यैव प्रियपरिजनान् वत्सलहृदः
प्रभोरद्वैतादीनपि जगदघौघक्षयकृतः ।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
स्वरूपाद्या ये ऽमी सरसमधुरास्तानपि नुमः ॥ २ ॥

गुरुं तं श्रीनाथाभिधमवनिदेवाद्वयविधुं
नुमो भूपारत्नं भुव इव विभोरस्य दयितं ।
यदा स्यादुन्मीलन्निरवकरवृन्दावनरहः
कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥ ३ ॥

पितरं श्रीशिवानन्दं सेनवंशप्रदीपकं ।
वन्देऽहं परया भक्त्या पार्षदाग्र्यं महाप्रभोः ॥ ४ ॥

ये विख्याताः परीवाराः श्रीचैतन्यमहाप्रभोः ।
नित्यानन्दाद्वैतयोश्च तेषामपि महीयसां ॥

गोपालानां च पूर्वाणि यानि नामानि कानिचित् ।
स्वस्वग्रन्थे स्वरूपाद्यैर्दर्शितान्यादिसूरिभिः ॥

विलोक्यान्यानि साधूनां मथुरौड्रनिवासिनां ।
गौडीयानामपि मुखान्निशम्य स्वमनीषया ॥

विविच्यासेडितः कैश्चित् कश्चित्तानि लिखाम्यहं ।
नाम्ना श्रीपरमानन्ददासः सेवितशासनः ॥

यद्वत्पुरा कृष्णचन्द्रः पञ्चतत्त्वात्मको ऽपि सन् ।
प्रायः प्रकटतां तद्वद्गौरः प्रकटतामियात् ॥
स्वाभिन्नेन युतं तत्त्वं पञ्चतत्त्वमिहोच्यते ।
अन्यथा तदसंबन्धात्तत्त्वं स्याच्चतुष्टयं ॥

तद्भिन्नं यत्तदेवात्र तदभिन्नं विभाव्यते (°तां Tüb.) ।
यतः स्वशक्त्येच्छयया (स्वयेच्छया शक्त्या T.) कृष्णस्तादृ-
स्वरूपचरणैरुक्तं पञ्चतत्त्वनिरूपणे । [शतां गतः ॥
उपाधिभेदात्पञ्चत्वं तत्त्वस्येह प्रदर्श्यते ॥

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकं ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकं ॥

अस्य विवृतस्तैस्तैर्यैः स संक्षिप्य विलिख्यते ।
भक्तरूपो गौरचन्द्रो यतो ऽसौ नन्दनन्दनः ॥
भक्तस्वरूपनित्यानन्दः (!) विष्णुरूपश्च मुख्यकः ।
भक्तावतार आचार्यो द्वैतो यः श्रीसदाशिवः ॥
भक्ताख्याः श्रीनिवासाद्या यतस्ते भक्तरूपिणः ।
भक्तशक्तिर्द्विजाग्र्यकः श्रीगदाधरमुख्यकः ॥
श्रीमद्विष्णुभरद्वैतनित्यानन्दावधूतकाः ।
अत्र त्रयः समुन्नेया विग्रहाः प्रभवश्च ते ॥
एको महाप्रभुर्ज्ञेयः श्रीचैतन्यो दयाम्बुधिः ।
प्रभू द्वौ श्रीयुतौ नित्यानन्दाद्वैतौ महाशयौ ॥
गोस्वामिनश्च विज्ञेयास्ते द्विजश्च गदाधरः ।
पञ्चतत्त्वात्मका एते श्रीनिवासश्च पण्डितः ॥
यदुक्तस्तत्र गोस्वामी श्रीस्वरूपपदाम्बुजैः ।
त्रयो ऽत्र विग्रहाः ज्ञेयाः प्रभवश्चात्र ते त्रयः ॥
एको महाप्रभुर्ज्ञेयो द्वौ प्रभू संमतौ सतां ।
गोस्वामिनश्च चत्वारो वाच्याः प्रथमपुत्रवत् ॥
एषां पार्षदवर्गो ये महान्तः परिकीर्तिताः ।
नित्यानन्दगणाः सर्वे गोपालाश्चोपगोपकाः ॥
एषां संबन्धसंपर्काद्गोपालसदृशाः ।
तत्र श्रीमन्नवद्वीपे विष्णुभरसमीपतः ॥
विलसन्ति स्म ते ज्ञेया वैष्णवा हि महत्तमाः ।
नीलाचले च ये ख्यातास्ते हि ज्ञेया महत्तराः ॥
दक्षिणादिदिशां याने यैर्यैः सङ्गो महाप्रभोः ।
ते ते महान्तो मन्तव्याः परे ज्ञेयाः स्वयोग्यतः ॥
अतः स्वरूपचरणैरुक्तं गौरनिरूपणे ।
पञ्चतत्त्वस्य संपर्का ये ये ख्याता महत्तमाः ।
ते ते महान्तो गोपालाः स्थानाच्छ्रेष्ठ्यादिवाचकाः ॥

रसज्ञाः श्रीवृन्दावनमिति यमाहुर्बहुविदो
यमेतं गोलोकं कतिपयजनाः प्राहुरपरे ।
श्वेतद्वीपं प्राहुः परमपि परे व्योम जगदुर्
नवद्वीपः सो ऽयं जयति परमाश्चर्यमहिमा ॥

DR.RUPNATHJI(DR.RURAK NATH)

तस्मिन्वासमुरीचकार नृहरिर्विश्वंभराख्यं दधत्
तच्चेष्टावशतः समस्तमहतां वासो ऽपि तत्राभवत् ।
तैः साकं महती हरेरनु गुणाकारापि लीलाभवत्
तत्रासोज्जगतां मनो ऽपि परमानन्दाय मन्दं यतः ॥

यः सत्ये (ऽ)सितवर्णमादधदसौ श्रीहंसनामाभवत्
त्रेतायां मखभुग्मखाख्य उचितो ऽभूद्रक्तवर्णं दधत् ।
यः श्यामो दधदासवर्णकमसुं श्यामं युगे द्वापरे
सो ऽयं गौरविधुर्विभाति कलयन्नानावतारं कलौ ॥

प्रादुर्भूताः कलियुगे चत्वारः सांप्रदायिकाः ।
श्रीमाध्वीरुद्रसनका भवाः पाद्मे यथा स्मृताः ॥
अतः कलौ भविष्यन्ति चत्वारः संप्रदायिनः ।
श्रीमाध्वीरुद्रसनका वैष्णवाः क्षितिपावनाः ॥
तत्र माध्वीसंप्रदायः प्रस्तावात्परिलिख्यते ।
परव्योमेश्वरस्याभूच्छिष्यो ब्रह्मा जगत्पतिः ॥
तस्य शिष्यो नारदो ऽभूद् व्यासस्तस्याप शिष्यतां ।
शुको व्यासस्य शिष्यत्वं प्राप्तो ज्ञानावबोधनात् ॥
तस्य शिष्याः प्रशिष्याश्च बहवो भूतले स्थिताः ।
व्यासाच्चमकृष्णदीक्षो मध्वाचार्यो महायशाः ॥
चक्रे वेदान् विभज्यासौ संहितां शतदूषणीं ।
निर्गुणाद् ब्रह्मणो यत्र सगुणस्य परिष्क्रिया ॥
तस्य शिष्यो ऽभवत् पद्मनाभाचार्यो महाशयः ।
तस्य शिष्यो नरहरिस्तच्छिष्यो माधवो द्विजः ॥
पद्मनाभस्तस्य शिष्यो ऽभूत् (!) तच्छिष्यो जयतीर्थकः ।
तस्य शिष्यो ज्ञानसिन्धुस्तस्य शिष्यो महानिधिः ॥
विद्यानिधिस्तस्य शिष्यो राजेन्द्रस्तस्य सेवकः ।
जयधर्मो मुनिस्तस्य शिष्यो ऽभूद् गणमध्यतः ॥
श्रीमद्विष्णुपुरी यस्य भक्तिरत्नावली कृतिः ।
जयधर्मस्य शिष्यो ऽभूद् ब्रह्मण्यः पुरुषोत्तमः ॥
व्यासतीर्थस्तस्य शिष्यो यश्चक्रे विष्णुसंहितां ।
श्रीमांल्लक्ष्मीपतिस्तस्य शिष्यो भक्तिरसाश्रयः ॥
तस्य शिष्यो माधवेन्द्रो यद्धर्मो ऽयं प्रवर्तितः ।
कल्पवृक्षस्यावतारो व्रजधामनि तिष्ठतः ॥
प्रीतप्रेयोवत्सलतोज्ज्वलाख्यफलधारिणः ।
तस्य शिष्यो ऽभवच्छ्रीमानीश्वराख्यपुरी यतिः ॥
कलयामास शृङ्गारं यः शृङ्गारफलात्मकः ।
अद्वैतः कलयामास दाससख्ये फले उभे ॥

श्रीमान् रङ्गपुरीति सद्वात्सल्ये यत्समाश्रितः ।
ईश्वराख्यपुरीं गौर उररीकृत्य गौरवे ॥
जगदाप्लावयामास प्राकृताप्राकृतात्मकं ।
स्वीकृत्य राधिका भावकान्ती पूर्वैसुदुष्करे ॥
अन्तर्बाह्यरसाम्भोधी श्रीनन्दनन्दनो ऽपि सन् ।
आद्यो व्यूहो ऽपि चैतन्यमविशद् यत्परे पुरा ॥
विचुक्षोभ मनस्तस्य दृष्ट्वा गन्धर्वनर्तनं ।
द्वारकास्थो ऽपि भगवानविशच्छ्रीमच्चचीसुतं (!) ॥
नानावतारः सुतरामेककालप्रभावतः ।
यथा श्यामो ऽविशत्कृष्णं भगवन्तं पुरा स्वयं ॥
योगमायाबलादेते तिष्ठन्तो ऽन्यत्र यद्यपि ।
तथापि प्राविशन् गौरे ऽचिन्यलक्षणलक्षतः ॥
यथोक्तं व्यासचरणैः प्रभासखण्डमध्यतः ।
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति ॥
रघुनाथं प्रविश्यापि यथा तिष्ठति भार्गवः ।
एवं श्रीनारदमुखास्तिष्ठन्तो ऽन्येषु धामसु ॥०

It ends :

श्रीगौराङ्गगणोद्देशदीपिका रचिता मया ।
दीप्यतां परमानन्दसंदोहभक्तवेश्मनि ॥
शाके रसारसमिते मनुनैव युक्ते
ग्रन्थो मयाविरभवत् कतमस्य वक्त्रात् ।
चैतन्यचन्द्रचरितामृतमग्नचित्तैः
शोध्यः समाकलितगौरगणाख्य एषः ॥

इति श्रीकविकर्णपूरविरचिता श्रीगौरगणोद्देशदीपिका समाप्ता॥
श्रीभैरवचन्द्रदेवशर्मणो लिखितेयं ॥

For another MS. see Roth, Tübingen MSS., p. 9. [H. T. Colebrooke.]

2511.

199. Foll. 29; size 11 in. by 5 in.; indifferent Devanāgarī writing of about 1750 A.D.; 10–14 lines in a page.

Brahmasaṃhitā (or *Bhagavatsiddhāntasaṃgraha*), *Adhyāya* V., consisting of a (*Paurāṇik*) account of the origin and divinity of *Kṛishṇa*, followed by a hymn to the same deity; with a commentary, entitled *Digdarśanī*, by *Rūpa*, younger brother of *Sanātana*, and elder brother of *Vallabha*.

DR.RUPNATHJI(DR.RUPAK NATH)

The entire work is stated to consist of a hundred *adhyāyas*.

A. The text contained in the present MS. runs as follows:

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणं ॥ १ ॥

सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसंभवं ॥ २ ॥

कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकं ।
षडङ्गं षट्पदीस्थानं प्रकृत्या पुरुषेण च ॥ ३ ॥

प्रेमानन्दमहानन्दरसेनावस्थितं हि यत् ।
ज्योतीरूपेण मनुना कामबीजेन संगतं ॥ ४ ॥

तल्किञ्जल्कं तदंशानां तत्पत्राणि स्त्रियामपि ।
चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतं ॥ ५ ॥

चतुरस्रं चतुर्भेतैश्चतुर्धाम चतुष्कृतं ।
चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतं ॥ ६ ॥

भूलैर्दशभिरानद्धमूर्ध्वाधो दिग्विदिक्ष्वपि ।
अष्टाभिर्निधिभिर्युक्तमष्टाभिः सिद्धिभिस्तथा ।
अनुरूपैश्च दशभिर्दिक्पालैः परितो वृतं ॥ ७ ॥

श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ ८ ॥

एवं ज्योतिर्मयो देवः सदानन्दपरात्परः ।
आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ ९ ॥

मायया रममाणस्य न वियोगस्तया सह ।
आत्मना रमया रेमे यत्कालं* सिसृक्षया ॥ १० ॥

नियतिः सा रमा देवी तत्प्रिया तद्वशंवदा ।
तल्लिङ्गं भगवाञ्शंभुर्ज्योतीरूपः सनातनः ॥ ११ ॥

या योनिः सा परा शक्तिः कामो बीजं महद्धरेः ।
लिङ्गयोन्यात्मिका जाता इमा माहेश्वरीप्रजाः† ॥ १२ ॥

शक्तिमान्पुरुषः सो ऽयं लिङ्गरूपी महेश्वरः ।
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १३ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः‡ ॥ १४ ॥

नारायणः स भगवानापस्तस्मात्सनातनात् § ।
आविरासन् कारणार्णोनिधिसंकर्षणात्मकः ॥ १५ ॥

योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ।
तद्रोमविलजालेषु बीजं संकर्षणस्य च ॥ १६ ॥

हैमान्यण्डानि जातानि महाभूतावृतानि तु ।
प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयं ॥ १७ ॥

सहस्रमूर्धा विश्वात्मा महाविष्णुः सनातनः ।
यामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिं ॥ १८ ॥

ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवासृजत् ॥ ।
अहंकारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ १९ ॥

अथ तैस्त्रिविधैरंशैर्लीलामुद्वहतः किल ।
योगनिद्रा भगवतस्तस्य श्रीरेव संगता ॥ २० ॥

सिसृक्षया ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनालनं ब्रह्मणो लोकमद्भुतं ॥ २१ ॥

तस्यापि पूर्वरूपाणि कारणानि परस्परं ।
समायात् प्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥ २२ ॥

इच्छया सज्जमानो ऽथ भगवानादिपूरुषः ।
योजयन्मायया देवो योगनिद्रामकल्पयत् ॥ २३ ॥

योजयित्वाथ तामेव प्रविशति स्वयं गुहां ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २४ ॥

स नित्यो नित्यसंबन्धः प्रकृतिश्च परैव सा ।
एवं सर्वात्मसंबन्धं नाभ्यां पद्मं हरेरभूत् ॥ २५ ॥

तत्र ब्रह्माभवद्भूयश्चतुर्वेदी चतुर्मुखः ।
स जातो भगवच्छक्त्या तत्कालं किल चोदितः ॥ २६ ॥

सिसृक्षायां मतिं चक्रे पूर्वं संस्कारसंस्कृतां ।
ददर्श केवलं ध्वान्तं नान्यत्किमपि सर्वतः ॥ २७ ॥

उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
कामः कृष्णाय गोविन्द ओं गोपीजन इत्यपि ॥ २८ ॥

वल्लभाय प्रिया वह्नेरयं ते दास्यति प्रियं ।
तप त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ २९ ॥

अथ तेपे स सुचिरं प्रीणन्गोविन्दमव्ययं ।
श्वेतद्वीपपतिं कृष्णं गोलोकस्थं परात्परं ॥ ३० ॥

प्रकृत्या गुणरूपिण्या रूपिण्या पर्युपासितं ।
सहस्रदलसंपन्ने कोटिकिञ्जल्कवृंहिते ॥ ३१ ॥

---

* सृष्टुमिच्छया त्यक्तः सृष्ट्यर्थं प्रहितः कालो यस्माद्रमणात् तादृशं यथा स्यात्तथा रेमे ।

† माहेश्वरी माहेश्वर्यः ।

‡ सहस्रं सूते सृजति ।

§ आपो वै नरसूनवः ।

‖ भुवोमैध्यात् ।

DR.RUPNATHJI(DR.RUPAK NATH)

भूमिश्चिन्तामणिस्तत्र कर्णिकारे महासने ।
समासीनं चिदानन्दं ज्योतीरूपं सनातनं ॥ ३२ ॥
शब्दब्रह्ममयं वेणुं वादयन्तं मुखाम्बुजे ।
विलासिनीगणवृतं स्तैः स्तैरंशैरभिष्टुतं ॥ ३३ ॥
अथ वेणुनिनादस्य त्रयी मूर्तिमयी गतिः ।
स्फुरन्ती प्रविवेशन्ती(r.°शाम्नु marg.) मुखाब्जानि* [स्वयंभुवः ॥ ३४ ॥
गायत्रीं गायतस्तस्मादधिगत्य सरोजजः ।
संस्कृतश्चादिगुरुणा द्विजतामगमन्नदा ॥ ३५ ॥
त्रय्यां प्रबुद्धो ऽथ विधिर्विज्ञाततत्त्वसागरः ।
तुष्टाव वेदसारेण स्तोत्रेणानेन केशवं† ॥ ३६ ॥

चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तं ।
लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १ ॥
वेणुक्वणन्नमरविन्ददलायताक्षं
बर्हावतंसमसिताम्बुदसुन्दराङ्गं ।
कन्दर्पकोटिकमनीयविशेषशोभं
गोविन्दमादिपुरुषं तमहं भजामि ॥ २ ॥
आलोलचन्द्रकलशब्दनमाल्यवंशी-
रत्नाङ्गदप्रणयकेलिकलाविलासं ।
श्यामं त्रिभङ्गललितं नियतप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ३ ॥
अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति ।
आनन्दचिन्मयसमुज्ज्वलविग्रहस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४ ॥
अद्वैतमच्युतमनादिमनन्तरूपम्
आद्यं पुराणपुरुषं नवयौवनं च ।
वेदेषु दुर्लभमदुर्लभमात्मभक्तौ
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५ ॥
पन्थास्तु कोटिशतवत्सरसंप्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानां ।
सो ऽप्यस्ति यत्प्रपदसीम्नि विचिन्त्य तत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६ ॥
एको ऽप्यसौ‡ रचयितुं जगदण्डकोटिं
यच्छक्तिरस्ति जगदण्डचया यदंतः§ ।
अण्डान्तरस्थं परमाणुचयान्तरस्थं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ७ ॥
यद्भावभावितधियो मनुजास्तथैव
संप्राप्य रूपमहिमासनयानभूषाः(?) ।
सूक्तैर्यमेव निगमप्रथितैः स्तुवन्ति
गोविन्दमादिपुरुषं तमहं भजामि ॥ ८ ॥
आनन्दचिन्मयरसप्रतिभाविताभिस्
ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ९ ॥
प्रेमाञ्जनच्छुरितभक्तिविलोचनेन
सन्तः सदैव हृदये ऽपि विलोकयन्ति ।
तं(r. यं) श्यामसुन्दरमचिन्त्यगुणप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १० ॥
रामादिमूर्तिषु कलानियमेन तिष्ठन्
नानावतारमकरोद्भुवनेषु किंतु ।
कृष्णः स्वयं समभवत् परमः पुमान्यो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ११ ॥
यस्य प्रभावप्रभवतो जगदण्डकोटि-
कोटिष्व(r.ष्व)शेषवसुधादिविभूतिभिन्नं ।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १२ ॥
माया हि यस्य जगदण्डशतानि सूते
त्रैगुण्यतद्विषयवेदवितायमाना ।
सत्त्वावलम्बिपरसत्त्वविशुद्धसत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १३ ॥
आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफलन् स्मरतामुपेत्य ।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १४ ॥

---

* मुखाब्जानि प्रविवेशेत्यष्टभिः कर्णैः प्रविवेशेत्यथैः ।

† The text makes this last *śloka* consist of three hemistichs, the number of the verses, 7–35, being removed back to the end of the preceding hemistich. In the commentary this is different, though there too the numbering is irregular, several *ślokas* being sometimes treated together under the same number, and the two sections being numbered consecutively.

‡ Thus comm., °प्यणौ text.

§ जगदण्डचया इति न चान्तर्न बहिर्यस्येत्यादि ।

DR.RUPNATHJI(DR.RUPAK NATH)

गोलोकनाम्नि निजधाम्नि तले च तस्य
देवीमहेशहरिधामसु तेषु तेषु ।
ते ते प्रभावनिचया विहितास्तु येन
गोविन्दमादिपुरुषं तमहं भजामि ॥ १५ ॥

सृष्टिस्थितिप्रलयसाधनशक्तिरेका
छायेव यस्य भुवनानि बिभर्ति दुर्गा ।
इच्छानुरूपमपि यस्य च चेष्टते सा
गोविन्दमादिपुरुषं तमहं भजामि ॥ १६ ॥

क्षीरं यथा दधिविकारविशेषयोगात्
संजायते न तु ततः पृथगस्ति हेतोः ।
यः संभु(र. शंभु)तामपि* तथा समुपैति कार्याद्
गोविन्दमादिपुरुषं तमहं भजामि ॥ १७ ॥

दीपार्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतुसमानधर्मा ।
यस्तादृगेव हि च विष्णुतया विभाति
गोविन्दमादिपुरुषं तमहं भजामि ॥ १८ ॥

यः कारणार्णवजले भजति स्म योग-
निद्रामनन्तजगदण्डसरोमकूपः ।
आधारशक्तिमवलम्ब्य परां स्वमूर्तिं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १९ ॥

यस्यैकनिःश्वसितकालमथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः ।
विष्णुर्महान्स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥ २० ॥

भास्वान् यथाश्मशकलेषु निजेषु तेज-
स्वीयं कियत्प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एव जगदण्डविधानकर्ता
गोविन्दमादिपुरुषं तमहं भजामि ॥ २१ ॥

यत्पादपल्लवयुगं विनिधाय कुम्भ-
द्वन्द्वे प्रणामसमये स गणाधिराजः ।
विघ्नान्निहन्तुमलमस्य जगत्त्रयस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ २२ ॥

अग्निर्महो गगनमम्बु मरुद्दिशश्च
कालस्तथात्ममनसीति जगत्त्रयाणि ।
यस्माद्भवन्ति विभयं विशन्ति यं च
गोविन्दमादिपुरुषं तमहं भजामि ॥ २३ ॥

यच्चक्षुरेष सविता(र. सविता) सकलग्रहाणां
राजा समस्तसुरमूर्तिरशेषतेजाः ।
यस्याज्ञया भ्रमति संभृतकालचक्रे
गोविन्दमादिपुरुषं तमहं भजामि ॥ २४ ॥

धर्माधिकारनिचयः श्रुतयस्तपांसि
ब्रह्मादिकीटपतगावधयश्च जीवाः ।
यद्दत्तमात्रविभवप्रकटप्रभावा
गोविन्दमादिपुरुषं तमहं भजामि ॥ २५ ॥

यस्त्विन्द्रगोपमथवेन्द्रमहो(?) स्वकर्म-
बन्धानुरूपफलभाजनमातनोति ।
कर्माणि निर्दहति किंतु च भक्तिभाजां
गोविन्दमादिपुरुषं तमहं भजामि ॥ २६ ॥

यं क्रोधकामसहजं प्रणयन्ति भीति-
वात्सल्यमोहगुरुगौरवसेव्यभावैः ।
संचिन्त्य तस्य सदृशीं तनुमापुरेते
गोविन्दमादिपुरुषं तमहं भजामि ॥ २७ ॥

श्रियः† कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतं ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दज्योतिः परमपि तदास्वाद्यमपि च ॥ २८ ॥

स यत्र क्षीराब्धौ सरति सुरभीभ्यश्च‡ सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रातिसमयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ २९ ॥

अथोवाच भगवान् भगवन्तं कमलयोनिं ॥

ब्रह्मन् महत्त्वविज्ञाने प्रजासर्गे च चेन्मतिः ।
पञ्चश्लोकीमिमां विद्यां वत्स तत्त्वं निबोध मे ॥ ३० ॥

प्रबुद्धे ज्ञानभक्तिभ्यामात्मन्यानन्दचिन्मयी ।
उदेत्यनुत्तमा भक्तिर्भगवत्प्रेमलक्षणा ॥ ३१ ॥

प्रमाणैस्तत्सदाचारैस्तदभ्यासैर्निरन्तरं ।
बोधयत्यात्मनात्मानं भक्तिमत्युत्तमां लभेत् ॥ ३२ ॥

यस्याः श्रेयस्करं नास्ति यया निवृत्तिमाप्नुयात् ।
या साधयति मामेव भक्तिं तामेव साधयेत् ॥ ३३ ॥

धर्मानन्यान्परित्यज्य मामेव भज विश्वसन् ।
यादृशी यादृशी श्रद्धा सिद्धिर्भवति तादृशी ॥ ३४ ॥

---

* शंभोरपि कायत्वं गुणसंवलनात् ।

† व्रजसुन्दरीरूपाः

‡ सुरभीभ्यः सरतीति तदीयवंशीध्वन्याद्यावेशादिति भावः ।

DR.RUPNATHJI(DR.RUPAK NATH)

अहं हि विश्वस्य चराचरस्य
बीजं प्रधानं प्रकृतिः पुमांश्च ।
मया हितं तेज इदं बिभर्षि
विधे विधेहि त्वमथो जगन्ति ॥ ३५ ॥

इति श्रीब्रह्मसंहितायां भगवत्सिद्धांतसंग्रहे मूलसूत्राख्यः पंचमो ऽध्यायः ॥

In the *Bhaktirasāmṛitasindhu* the verses ii. 12 (यस्य प्रभावतो ०) and ii. 20 (यस्यैकनिःश्वसित ०) are quoted as occurring "*Brahmasaṃhitāyāṃ Ādipurusharahasye.*"

B. *Rūpa's* commentary, which, for the most part, is illustrative rather than explanatory, begins: श्रीमते निंबार्काय भगवते नमः ॥ श्री-

कृष्णस्वरूपमहिमा मम चित्ते महीयतां ।
यस्य प्रसादाद् व्याकर्तुमिच्छामि ब्रह्मसंहितां ॥

दुर्योजनापि युक्तार्था सुविचारादृषिस्मृतिः (?सुचिरा- [दृषिणाङ्कितिः R. M.) ।
विचारे तु मयात्र स्यादृषीणां स ऋषिर्गतिः (?सदृशी [गतिः)
यद्यप्यध्यायशतयुक् संहिता सा तथाप्यसौ ।
अध्यायः सूत्ररूपत्वात्तस्याः सर्वांगतां गतः ॥

श्रीमद्भागवताद्येषु दृष्टं यन्मृष्टबुद्धिभिः ।
तदेवात्र परामृष्टं ततो हृष्टं मनो मम ॥

यद्यच्छ्रीकृष्णसंदर्भे विस्तराद्धि निरूपितं ।
अत्र तत्पुनरामृष्य (*r.* मृश्य) व्याख्यातुं स्पृश्यते मया ॥

अथ श्रीमद्भागवते यदुक्तमेते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति तदेव तावत्प्रथममाह । ईश्वर इति ०

The commentator quotes freely from the *Bhāgavatapurāṇa*, esp. the tenth book (*śrīdaśama*), with its *Ṭīkā*, and the *Bhagavadgītā*. Other authorities quoted are: *Uddhava* (या वै श्रियार्चितमित्यादि श्रीमदुद्धववाक्यात्), fol. 19*b*; *Kṛishṇasandarbha*, foll. 1*b*, 24*a*; *Gopālatāpanī*, foll. 3*b*, 8*b*; *Gosūktam* (गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदा समुन्नीताः स षडंगपदक्रमाः ॥), fol. 6*a*; *Gautamīyatantra*, foll. 2*b*, 3*a* (*Vṛihad-Gautamīya*, foll. 9*b*, 23*a*; *Gautamīyatantra-dvaya*, fol. 28*a*); *Nāmakaumudī-kāra*, fol. 3*a*; *Nāradapañcarātra*, foll. 8*b*, 17*b*; *Prabhāsha-purāṇa* (*Nāradakuśadhvajasaṃvāde*; prob. the *Prabhāsakhanda* of the *Skandapurāṇa*), fol. 2*a*; *Bhaṭṭa*, fol. 3*b*; *Mṛityuṃjayatantra*, fol. 14*a*; *Brahmastuti*, fol. 4*b*; *Bhaktisandarbha*, fol. 29*a*; *Yāmunācārya*, fol. 22*a*; *Vāsudevopanishad*, fol. 3*a*; *Śuka* (?तथासौ दर्शयामास लोकस्वमित्यादौ श्रीशुकवाक्यात्), fol. 19*b*; *Śrīdharasvāmin* (comm. on *Vishṇup.*), fol. 21*b*; *Śrutistava* (स्वकृतपुरेष्वमोघ्यवहिरन्तरसंवरणं ०। इति नृगतिं विविच्य कवयो निगमावपनं ० ॥), fol. 28*b*; (*Trailokya-*)*Sammohanatantra* (*ashṭādaśāksharaprasaṅga*), fol. 24*a*; *Sahasranāmavyākhyā*, fol. 13*b*; *Hayaśīrshapañcarātra*, foll. 8*b*, 28*a*.

It ends: इति ब्रह्मसंहितायामिति । तदुक्तं तत्रैवान्यत्र ।

ईश्वरायशतसंपन्ना भगवद्ब्रह्मसंहिता ।
कृष्णोपनिषदां सारैः संचिता ब्रह्मणोदितेति ॥

यद्यपि नाना पाठान्नाना चार्थान् स्मरंति नाना ते ।
तदपि च सत्यथ लब्ध्वा एवास्माभिस्त्वमी प्रमिताः ॥

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभो ऽनुजः सो ऽसौ श्रीरूपो जीवसन्ततिः ॥

इति ब्रह्मसंहितायां मूलसूत्राख्यस्य पंचमाध्यायस्य दिग्दर्शनी [नाम्नी suppl.] टीका समाप्ता ॥ श्रीमते निंबार्काय भगवते नमः ॥

For another MS. of both text and commentary (not metrical, as is there stated erroneously), see Rāj. Mitra, Notices, ii., p. 106.

[H. T. Colebrooke.]

2512.

2461. Foll. 203, one of which (fol. 93) is wanting; whilst 118–125 are misplaced after 193; size 11 in. by 4¾ in.; fairly written, in Devanāgarī, about the beginning of the 17th century; nine lines in a page.

Vishṇudharmamīmāṃsā, a dissertation on the worship of *Vishṇu*, by *Nṛisiṃha Bhaṭṭa*, son of *Soma Bhaṭṭa*. The MS. has suffered to some extent from damp.

DR RUPNATHJI(DR.RUPAK NATH)

It begins:

वाचामगोचरमजातिगुणक्रियाया
यं नेति नेति चकितं श्रुतयो वदंति ।
वैखानसागमपरैरधिगम्यते यस्
तस्मै नमो ऽस्तु हरये द्विषडक्षराय ॥ १ ॥

सर्वेस्वं वैष्णवानां श्रुतिनि[खि]लशिरःसागरं पंचरात्रं
यत्प्राहादौ मुरारिः स्वजनहितकरो नारदायेष्टसिद्धै ।
तद्व्याचिख्यासवस्तु प्रकटितवपुषे श्रीनृसिंहाश्रमाख्या-
विख्यातायाखिलाप्त्यै सततमिह नमस्कुर्महे ऽस्मै मधुघ्ने
वेदांताद्याविरोधेन पूर्वतंत्रानुसारतः । [॥ २ ॥
मीमांसा विष्णुधर्माणां क्रियते सोमसूनुना ॥ ३ ॥

वैष्णवकंठाभरणं कंठे धार्यं सर्वविपश्चिद्भिः ।
द्वापरपाषंडादिध्वांतात्यंतव्युदासाय ॥ ४ ॥

ईर्ष्यामत्सरपित्तदूषितधियो नैतत्कृतेः स्वादुतां
द्राक्षाक्षीरमधूपमामिह विदुः किं तावता तत्कृतिः ।
रंभाभ्यमरांगनामरसिकः क्लीवो न चेद्वीक्ष्यते
लावण्यादि किमत्र दुष्यति यतः संत्येव तद्भावुकाः ॥ ५ ॥

पंचरात्रविदो नत्वा गुरूनपि गरीयसः ।
प्रामाण्यं पंचरात्रस्य प्रथमं समुदीर्यते ॥ ६ ॥

सात्वतापरनामधेयपंचरात्रोक्तपूजास्तुतिनमस्कारादिना भगवतो नारायणं भजम[ाना]नामेव कैवल्यमभ्युदयो वा नान्येषां । श्रुति स्मृतिप्रामाण्यात् । °

There are no divisions, and a rapid perusal has only yielded quotations from *Purāṇas*, the epics, the *Nāradapañcarātra*, *Brahmayāmala* (fol. 104*b*), *Ratnasāgara* (fol. 105*a* मध्यमानामिका मध्यपर्वद्वयमिह प्रिये । मेरुं कल्पजपं कुर्यात्प्रदक्षिणमनुक्रमात् ॥ अनामा मूलपर्वादि कनिष्ठादिक्रमेण तु । तर्जन्यग्रादितो देवि मध्यामूलावभासकं ॥ °); *Parāśara*, *Śaṅkarācārya*.

It ends:

श्रीविष्णुधर्ममीमांसापदार्थानां तु संग्रहः ।
सुखावबोधनार्थं तु जिज्ञासूनामयं कृतः ॥
मीमांसिता विष्णुधर्माः श्रीगुरूणामनुग्रहात् ।
यदत्र सुष्ठु तज्ञेयं यदसुष्ठु ममैव तत् ॥ ° ॥

सन्न्यायवेदतदनुस्मृतिवारिजानां
सोमात्मजेन धिषणागुणकूपमाला ।
न्यस्ता हरेश्चरणयोरनया नृसिंहः
प्रीणातु मे स भगवान्द्विषडक्षरात्मा ॥

इति श्रीपदवाक्यप्रमाणज्ञसोमभट्टतनूजश्रीनृसिंहभट्टविरचिता विष्णुधर्ममीमांसा समाप्ता ॥ [GAIKAWAR.]

2513.

2635b. Foll. 20 (the first five of which are wanting); size 10½ in. by 4 in.; legibly written in Devanāgarī; 14 or 15 lines in a page.

Śivādvaitaprakāśikā, a treatise, in three chapters (*ullāsa*), on the unity of the deity as represented by *Śiva*, and on the practices of devotion due to that deity, by *Kāśīnātha Bhaṭṭa*, son of *Jayarāma Bhaṭṭa* and *Vārāṇasī*.

The treatise is composed in *ślokas* (chiefly compiled from *Purāṇas*) interspersed with explanatory remarks.

Ch. II. beg. (fol. 8*a*):

अथोत्पत्तिं प्रवक्ष्यामि शैवशास्त्रानुसारतः ।
निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ॥
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ।
सच्चिदानंदविभवात्सकलात्परमेश्वरात् ॥
पंच भूतानि तन्मात्रपंचकं च तथा पुनः ।
ज्ञानेंद्रियाणि पंचैव पंचकर्मेंद्रियाण्यपि ॥
मनोमयाः शुद्धविद्या महेश्वरः सदाशिव इति ।

अस्यार्थः ॥ सनातनो नित्यः शिवो निर्गुणः सगुणश्च ज्ञेयः । निर्गुणस्वरूपमाह ।

तच्छक्तिभूतः सर्वेशो भिन्नो . . . . . ।
नित्यः सर्वगतः सूक्ष्मः सदानंदो निरामयः ।
विकाररहितः साक्षाच्छिवो ज्ञेयः सनातन इति ॥

प्रकृतेरन्यः । केवलो निर्गुणः । °

Ch. III. beg. (fol. 15*a*): शैवपुराणे ।

शृणु धर्मं प्रवक्ष्यामि भक्तानां लक्षणं मम ।
भस्मोद्धूलितसर्वांगास्त्रिपुंड्राँकितमस्तकाः ॥ °

It ends (from the *citrakhaṇḍa*):

प्रदोषपूजनं शंभोः सर्वपापभयापहं ।
सर्वाभीष्टप्रदं तस्मात्सादरं तत्समाचरेत् ॥
सोमवारत्रयोदश्यां नक्तभुक् शंकरप्रियः ।
रुद्राध्यायजपी चेत्स्यात् सुकृतं को ऽस्य वर्णयेदिति ॥

DR.RUPANATHJI(DR.RUPAK NATH)

इति श्रीमद्वडोपनामक(thus in all three colophons) जयरामभट्टसुत- वाराणसीगर्भसंभव- दक्षिणामूर्तिशिवाराधक-काशीनाथविरचितायां शिवाद्वैतप्रकाशिकायां तृतीयोल्लासः ॥ संवत् १८५८ शके १७२३ दुर्मतिनामसंवत्सरे वैशाखकृष्ण अमायां(!) भौमे भरणीनक्षत्रे मेषस्थिते चंद्रे वृषस्थिते रवौ कर्कस्थिते देवगुरौ काश्यां दशाश्वमेधस्थितनगरकराख्यप्रसिद्धः वडव्योपनामकेन आकुलनेरवृत्तीश्वरेण पुत्तदेवप्रपौत्रेण(?) नीलकंठपौत्रेण विठ्ठलात्मजेन वत्सगोत्रोत्पन्नेन पंचप्रवरान्वितेन पुण्यग्रामे ० इदं पुस्तकं जयरामशर्मणा स्वहस्तेन लिखितं । तस्येदं दक्षिणामूर्ति-विश्वेश्वरः प्रसन्नो ऽस्तु ॥

Of non-*purāṇic* authorities may be mentioned: *Purushārthaprabodha*, foll. 12*b*, 16*a*,*b*; *Paippalādopanishad*, fol. 12*b*; *Vidyeśvarasaṃhitā* (?of some *purāṇa*), fol. 17*a*; *Śāradā*, fol. 15*a*. [Mack. Coll.]

2514.

1547c. Foll. 20; size 10 in. by 4½ in.; clear, modern Devanāgarī writing; five lines in a page.

Catushṭayasampradāyikā-paddhati(?) and *Sītārāmapaddhati*, two short manuals of prayers, with directions for their use (?by *Rāmānuja* or one of his followers). Partly in *bhāshā*.

I. (in four sections) begins: श्रीमते रामानुजाय नमः ॥ ओं

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं चाशनं(*r.* चासनं)कुरु ॥

इति आसनमंत्रः ॥

समुद्रमेखले देवि पर्वतस्तनमंडले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति पादपूरमंत्रः ॥

ओं तस्य तस्य देवानां भूतप्रेतपिशाचिका ।
मलमूत्रमनुष्याणां मम दोषो न दीयते ॥

इति मलमंत्रः ॥

Follow *pātraśuddhimantra, mṛittikāmantra, dantadhāvanamantra, śikhābandhanamantra, śikhāmuktimantra, ācamanamantra, snānamantra, aghamarshaṇa, karanyāsa, hṛidayāyanyāsa, aṅganyāsa, hṛidayanyāsa, dhyānam, shaḍaksharamantra.*

It ends:

विलासाचार्यके अगस्त्याचार्य ॥ ४ ॥ इति चतुष्टसंप्रदाकी-पद्धत(!) संपूर्णम् ॥

II. beg. (fol. 9*a*): अगस्त्य उवाच ॥ ओं प्रातरुत्थाय शौचस्नानं कृत्वा मलमंत्रं त्रिवारं पठित्वा ।

पृष्ठे तु पद्मनाभं च त्रिके दामोदरं न्यसेत् ।
ओंकारमध्ये स गुरुं श्रीरामचंद्रं ध्यात्वा सो ऽहं हृदयं वायु-बीजं षोडशवारं जपेत् ॥ पापपुरुषं विशेषयेत् ॥ ०

Follow *tilakamantra, prāṇapratishṭhā, devanyāsa, shaḍaṅganyāsa, siṃhāsanamantra, āsanamantra, pādyamantra, snānamantra, ācamanamantra* (different from above), *candanamantra, vastramantra, pushpamantra, dhūpamantra, dīpamantra, naivedyamantra, tāmbūlamantra, nīrājanamantra, pradakshiṇāmantra, aparāddhakshamāmantra, namaskāramantra, dhyānamantra, caraṇasevanamantra, jalagāyatrī, karanyāsa, prayogasaṃkalpa.*

It ends: अमुकवर्षे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे योगकरणलग्नमुहूर्ते । अमुकतीर्थे ॥ श्रीसीतारामपद्धति ॥ पटलं संपूर्णम् ॥

The leaves are marked पटल or लट.

For a *Śrīrāmapaddhati*, by *Rāmānuja*, see Aufrecht, Cat. Bodl., no. 733; for a *Rāmapaṭala* by the same Author, Burnell, Tanjore MSS., p. 202*b*. [H. T. Colebrooke.]

2515.

1068. Foll. 149; size, oblong, 6¼ in. by 5 in.; large, clear Devanāgarī writing of about 1750 A.D.; 10 or 11 lines in a page.

A collection of hymns, and theological or devotional tracts, by *Vallabhācārya* (A), his son *Viṭṭhaleśvara* (B) and others; with extracts from *Purāṇas*, etc.

DR.RUPAK NATH

1. *Vallabhāshṭaka* (B), व्रजराजविराजितघोषपरे ° ending with oight stanzas, श्रीमद्वृंदावनेंदुप्रकटितरसिका ° ends fol. 36; 2. *Siddhāntarahasya* (A), 9 *vv.*, श्रावणस्यामले पक्षे एकादश्यां महानिशि। ° fol. 4*b*; 3. *Saptaślokī* (B), स्फुरत्कृष्णप्रेमामृतरसभरेण ° fol. 5*b*; 4. *Siddhāntamuktāvalī* (A), 21 *vv.*, नत्वा हरिं प्रवक्ष्यामि स्वसिद्धांतविनिश्चयं। कृष्णसेवा सदा कार्या मानसी सा परा मता॥ fol. 7*b*; 8. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अंतःकरण मद्वाक्यं ° fol. 8*b*; 9. *Sevāphalam* (A), 8 *vv.*, यादृशी सेवना प्रोक्ता ° fol. 9*a*; 10. *Vivekadhairyāśraya* (A), 17 *vv.*, विवेकधैर्ये सततं रक्षणीये तथाश्रयः। ° fol. 10*b*; 11. *Nirodhalakshaṇam* (A), 20 *vv.*, यच्च दुःखं यशो दाया ° fol. 12*b*; 12. Extracts from the tenth book of the *Bhāgavata* (and from the *Brahmāṇḍa*) *Purāṇa*, fol. 33*a*; 13. *Sevānantaram prārthanā* (B), 12 *vv.*, नमो भक्तिसारसास्वाददात्रे ° fol. 33*a*; 14. *Madhurāshṭakam* (A), 8 *vv.*, अधरं मधुरं वदनं मधुरं नयनं ° fol. 34*a*; 15. *Maṅgalastotram* (A), 3 *vv.*, मंगलं मंगलं ° fol. 34*b*; 16. *Prātaḥstavaḥ* (A), 10 *vv.*, तत्कुंजरं ° fol. 35*b*; 17. *Kṛishṇastavarāja* (by?), 8 *vv.*, अनंतकंदर्प ° fol. 36*b*; 18. *Shoḍaśastotram* (by?), प्रणौमि दकुमारो ° fol. 37*b*; 19. *Vṛindāshṭakam* (A), कालिंदीद्भुतायाः ° fol. 39*a*; 20. *Gopījanavallabhacaraṇaikatānam* (B), रहस्यं श्रीराधेत्यखिलनिगम ° fol. 40*a*; 21. *Svāminyāḥ stotram* (B), 12 *vv.*, उदेव श्रीराधे रहसि मिलति त्वां ° fol. 42*a*; 22. *Yamunāshṭakam* (B), नमामि यमुनामहं ° fol. 43*b*; 23. *Yamunāshṭapadī* (B), *rāmakalīrāgeṇa gīyate*, नमो देवि यमुने ° fol. 44*b*; 24. *Gaṅgāshṭakam* (by *Vālmīki*), मातः शैलसुता ° fol. 46*a*; 25. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अन्तःकरण मद्वाक्यं सावधानतया शृणु। fol. 47*a* (=8); 26. *Siddhāntarahasyam* (A), 9 *vv.*, श्रावणस्यामले ° fol. 47*b*; 27. *Navaratnam* (A), 9 *vv.*, चिंता कापि न कार्या ° fol. 48*b*; 28. *Bhaktivardhinī* (A), 11 *vv.*, यथा भक्तिः प्रवृद्धा स्यात् तथोपायो निरूप्यते। ° fol. 49*b*; 29. *Vallabhāshṭakam* (B), 8 *vv.*, श्रीमद्वृंदावनेंदु ° (=1); 30. *Agnikumāraproktam Sarvottamastotram*, fol. 53*b*; 31. *Kṛishṇapremāmṛitam* (B), 8 *vv.*, स्फुरत्कृष्णप्रेमा (partly=3); 32. *Haridāsoditaṃ Śrīvallabhaśaraṇāshtakam*, 9 *vv.*, निःसाधनजनोद्धारकरणप्रकटीकृतः। ° fol. 55*b*; 33. *Harirāyajī's Navanītapriyāshtakam*, अलकावृतसदलके ° fol. 56*a*; 34. *Raghunāthajī's Nāmaratnākhyastotram*, 32 *vv.*, यन्नामाकोंदया ° fol. 58*b*; 35. *Raghunātha's Stavanam*, 10 *vv.*, यः कृष्णसेवार्थमगाधबोधं जगाद ° fol. 59*b*; 36. *Mahādevakṛitaṃ Śrī-Viṭṭhaleśvarasyāshṭottaraśatanāmastotram*, fol. 62*a*; 37. *Catuḥślokī* (A), सर्वदा सर्वभावेन ° fol. 62*b*; 38. *Premāmṛitam* (by?), 35 *vv.*, पयोदध्यामीक्षानवघृत ° fol. 67*b*; 39. *Bhujaṅgaprayātāshṭakam* (B), मुखधामनैन्यधरा ° fol. 68*b*; 40. *Pañcapadī* (A), श्रीकृष्णरस ° fol. 69*a*; 41. Extracts (*Rigv.*, *Purāṇas*), fol. 118; 42. *Āryādvaye* (B), शरणागतभीतिवृत्तिपरं ° fol. 120*a*; 43. *Ācāryajīkṛita-śikshā*, चिन्तासंतानहंतारो ° fol. 120*b*; 44. *Gadādharajīkṛita Vijñaptiḥ*, अपराधघनोन्मुक्तचित्ता ° (twice), foll. 121*b*, 125*a*; 45. *Nandakumārāshṭakam* (A), सुन्दरगोपाल ° (twice), foll. 124*a*, 142*b*; 46. *Snānavidhi* and *Yajurvedoktatrikālasandhyopāsanavidhi*, fol. 136*b*; 47. Extracts from *Bhāg. P.*; 48. *Haridāsoktaṃ Śrī-Vallabhapañcākṣharastotram*, 8 *vv.*, श्रीवल्लभोवल्लभस्य वियोगो ° fol. 143*a*; 49. Extracts from *Purāṇas*. [H. T. COLEBROOKE.]

2516.

2611a. Foll. 45 (foll. 15–19 of which are wanting); size 9½ in. by 4¼ in.; legibly written in Devanāgarī, about 1750 A.D.; eleven lines in a page.

Sarvottamastotra-vivṛiti, a commentary on the *Sarvottamastotra*, in praise of *Kṛishṇa*, by *Vallabhācārya*.

It begins:

नत्वा पितृपदांभोजमैहिकामुष्मिकार्थदं।
तत्प्रोक्ताचार्यनामानि विवरिष्ये यथामति॥ १॥

यद्यप्ययोग्य एवाहं तन्नामविवृतौ स्वतः।
स्वीयत्वेनैव कृपया योग्यतां मयि दास्यति॥ २॥

DR. RUPNATHJI (DR. RUPAK NATH)

इति विश्वासतो नूनं प्रवृत्तोऽहं न चान्यथा ।
अतस्त एव शरणं मम सर्वार्थसिद्धये ॥ ३ ॥

श्रीमत्पितृचरणः श्रीमदाचार्याणामलौकिकनामानि प्रकटयितुमाचार्याणां स्वरूपं तत्प्राकट्यहेतुं च वक्तुमाचार्यैकप्रकटितभक्तिमार्गप्रतिपाद्यं सर्वश्रुतिश्रीभागवतगीताद्यनेकालौकिकप्रमाणसिद्धं पूर्वोक्तप्रमेयमूलभूतं साक्षात्पुरुषोत्तमरूपं सर्वमूलत्वेन मंगलार्थं स्तुवंति । प्राकृतधर्मानाश्रयमिति ।

The *stotra* here consists of 36 stanzas (whilst Hall, Index, p. 151, makes it 25).

The commentary ends:

एवमाचार्यनामानि विवृतानि यथामति ।
पितृपादाब्जकृपया नान्यसाधनतो मया ॥ १ ॥
यद्यत्र बुद्धिदोषेण विवृतावन्यथा कृतं ।
क्षमंत्वाचार्यचरणा मद्भृत्यो ऽयमिति स्वतः ॥ २ ॥
आचार्यनामनि शताष्टकमौक्तिकानि
श्रीविट्ठलोक्तिरससागरनिर्गतानि ।
श्रीवल्लभोक्तिविवृतेर्गुणगुंफितानि
निकुर्वंतु(!) कंठभुवि भक्तजना जपार्थं ॥

इति श्रीमत्प्रभुचरणैकतानश्रीवल्लभविरचिता सर्वोत्तमस्तोत्रविवृतिः ॥ [GAIKAWAR.]

2517.

2611b. Foll. 22; size $10\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

Tracts connected with the sects of *Vallabhācārya* and *Rāmānuja*.

I. *Vivekadhairyāśrayanirūpaṇa*, by *Vallabhācārya*; 17 *ślokas*, beg.:

विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।
विवेकस्तु हरिसर्वनिजेच्छातः करिष्यति ॥

This is followed by a commentary (*ṭīkā*) thereon, beg.:

स्वगोकुलपरित्राणसंभ्रमेणोद्धृताचलं ।
क्रीडन्नोपाङ्गनापाङ्गसङ्गिगोपालमाश्रये ॥ १ ॥

II. [*Ananya-*]*Bhaktiviveka* (?by *Lakṣmaṇācārya*). It begins, fol. 4*a*:

रामानुजश्रीशपदावलंबी रामानुजश्रीशमतानुसारात् ।
श्रुत्यादिसंवादयुतं प्रवक्तुमनन्यभक्तेस्तु विवेकमीहे ॥ १ ॥
तत्रास्तु मे मूढतमस्य गूढः
श्रीवैष्णवाचार्यकृपासहायः(:) ।
चक्षुष्मदालंबनतो हि यायाद्
अंधो जनो दुर्गममार्गपारं ॥ २ ॥

इह खलु देहात्मभ्रमेण बंभ्रम्यमाणेन पार्थेन शिष्यस्नेहं साधिमां त्वां प्रपन्नमिति प्रार्थितपार्थसारथिः ०

It ends:

श्रीरामानुजकारुण्याद्दयानां मुदावहः ।
विवेको ऽनन्यभक्तेस्तु व्यक्तमुक्तो मयाधुना ॥

श्रीरामानुजारत(?नत)श्रीलक्ष्मणाचार्यभक्तिविवेकः समाप्तः ॥

III. *Siddhāntavivṛiti*, or rather a gloss thereon; by *Vallabha*. It begins, fol. 7*b*:

यद्वांछयैव मोक्षाद्या(:) पुमर्थाः अचरीकृताः ।
स्व[illegible]पि पितृपादाब्जे(*r.* रे)णुर्मह्यं प्रसीदतु ॥
अथ वक्ष्यमाणैरिति । ०

It ends:

इति श्रीपितृपादाब्जपरागारक्तचेतसा ।
श्रीवल्लभेन सिद्धांतविवृतेर्विवृतिः कृता ॥

IV. *Yamunāshṭapadīvivaraṇa*, by *Raghunātha* (?pupil, or son, of *Viṭṭhala*). It begins, fol. 10*a*:

यो गिरींद्रमवष्टभ्य स्थितो भक्तिरिरक्षया ।
सप्ताहमवमत्येंद्रं तं वंदे वल्लभात्मजं ॥ १ ॥
या कलिंदाचले चारु पतंती संगता भुवि ।
स्वभर्तृभक्तमोदाय कालिंदीं प्रणमामि तां ॥ २ ॥

अष्टपदीगीतेन यमुनां प्रार्थयितुं स्तोतुं वादौ नमस्यंति । नमो देवि यमुन इति ० ॥

Colophon: इति श्रीमद्वल्लभनंदनचरणैकशरणरघुनाथकृतौ यमुनाष्टपदीविवरणं संपूर्णं ॥

V. A commentary on the *Siddhāntamuktāvalī* (see p. 827*a*, no. 4). It begins, fol. 14*a*:

प्रणम्य पितृपादाब्जपरागमनुरागतः ।
कृपया विशदीकुर्मस्तद्वाङ्मुक्ताफलावलीं ॥ १ ॥

स्वसिद्धांतेति अग्रे वक्ष्यमाणैर्बहुभिर्मिथो विरुद्धैः ०

VI. *Yamunāshṭakavivṛiti*, by *Viṭṭhala*. It begins, fol. 19*a*:

विश्वोद्धाराधिमेवाविर्भूतवृंदावनप्रियाः(:) ।
कृपयंतु सदा तातचरणा मयि विट्ठले ॥ ० ॥

नमामीति ० ।

DR.RUPNATHJI(DR.RUPAK NATH)

Colophon : इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलविरचिता यमुनाष्टकविवृतिस्संपूर्णा ॥

[Gaikawar.]

2518.

2611c. Foll. 20 (and a *śuddhapattra* to 10); size 8¼ in. by 3¾ in.; indifferent, modern Devanāgarī writing; eight lines in a page.

Vallabhāshṭakavivṛitiprakāśa, a gloss on a commentary on *Viṭṭhaleśvara's Vallabhāshṭaka*, by *Purushottama*, son of *Pītāmbara*.

It begins :

नत्वा श्रीवल्लभाचार्यचरणाब्जरजांस्यहं ।
तदष्टकीयविवृतेर्भावं वच्मि कृपाबलात् ॥ १ ॥

तत्र पूर्वमुपोद्घातनयेदमुच्यते। सर्वश्रुतिशिरस्सु परब्रह्मण एव परमत्वं सच्चिदानंदरूपेण वैयासदर्शने सिद्धे । °

It ends :

इति श्रीवल्लभाचार्यदासेन कृपया मया ।
तद्दर्शितेन मार्गेण विवृतिः संप्रकाशिता ॥

इति श्रीवल्लभाचार्यदासानुदासेन पीतांबरतनुजपुरुषोत्तमेन विरचितो ऽयं श्रीवल्लभाष्टकविवृतिप्रकाशः ॥

[Gaikawar.]

2519.

2611d. Foll. 5; size 8½ in. by 4 in.; fairly written, in Devanāgarī, about 1700 A.D.; 10 or 11 lines in a page.

Bhaktivardhinīvivaraṇa, a versified exposition of *Vallabhācārya's Bhaktivardhinī*; by *Haridāsa*.

It begins :

श्रीवल्लभाचार्यपदानुकंपावलेन किंचित्परिचिंत्य चित्ते ।
निरूप्यते भक्तिविवृद्धुपायनिरूपणग्रंथनिरूपितो ऽर्थः॥१॥

प्रकृतिप्रत्ययार्थाभ्यां भक्तिसप्रेमसेवनं ।
चेतस्तत्प्रवणं तच्च ननु चित्रप्रसाधितं ॥ २ ॥

तच्च मूलं हरेरंगीकारो ऽप शरणागतिः ।
ततः समर्पणाज्जीवदेहसंबंधिन्युद्धता (?) ॥ ३ ॥

It ends :

इति श्रीवल्लभाचार्यकरुणालभ्यशक्तितः ।
स्वसंतोषाय भावस्य घोषयति प्रयत्नतः ॥ ६६ ॥

श्लोकरूपेण सर्वापि विवृता भक्तिवर्धिनी ।
यथामति निजाचार्यचरणाश्रयणादपि ॥ ६७ ॥

एतेनास्मत्कुलपतिः प्रभुः श्रीविट्ठलेश्वरः ।
प्रसीदतु सदा दासे हरिदासे स्ववंशगे ॥ ६८ ॥

टीका भक्तिवर्द्धिनी(!) श्रीहरिराएजीकृतच्छे ॥

[Gaikawar.]

2520.

2663b. Foll. 3; size 9 in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

A fragment, consisting of thirteen verses in praise of *Vishṇu*. Rather incorrect.

It begins (somewhat corrected) :

यया जीयते सत्सभापंडिताभा
यया पूज्यते राजभिर्मंडनापि(?) ।
पणे प्राप्यते ब्रह्मलोको दुरापः
करोत्वेव सा गीः सहायं द्रुतं मे ॥ १ ॥

स्मरंते पठंते हरे त्वां मनुष्या
लभंते पदं ते विभो शांतियुक्तं ।
अतो ऽहं भजे सच्चिदानंदरूपं
यशोदाकिशोरं हरिं रुक्मणेशं (*r.* रुक्मिणीशं) ॥ २ ॥

भवाशीविषाद्भीतमानंदरूप
सदा रक्ष विश्वेश गोपीप्रिय त्वं ।
त्वदन्यः स्मृतः किं विभो त्राति मां
यथा वारिदान्नैव बीजांकुरं हि ॥ ३ ॥

The first leaf is marked शंकरो° in one margin, and रामः in the other. [Gaikawar.]

2521.

1635e. Foll. 10; size 8¾ in. by 4 in.; legibly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

Bhaktiśata, consisting of 101 verses in praise of *Kṛishṇa*, by *Anantadeva*.

It begins :

भगवद्भजनारंभे संभावय मतिं मम ।
अपाराचारसंसारनिस्तारायं तदेव नः ॥ १ ॥

DR.RUPAKNATHJI(DR.RUPAK NATH)

It ends:

वनिता सुलता सुयोजिता
कुपतौ स्वल्पतरौ च तास्यति ।
अथ कल्पतरौ हरौ स्थिता
कविताकल्पलते विभासि भूरि ॥ १०१ ॥

[H. T. COLEBROOKE.]

2522.

823b. Foll. 24; size 12¾ in. by 4½ in.; good, modern Bengalī handwriting; eight lines in a page.

Susiddhāntapushpāvalī, a eulogium of *bhakti* as the highest form of *Vishṇu* worship, by *Bhāgavatānanda Gosvāmin*.

It begins:

यानन्दैकस्वरूपा हरिमुवशकरी सिद्धचूडामणिर्यो
सा कृष्णप्रेमभक्तिः प्रभवति पतितानां च येषां प्रसादात् ।
येषां पादाब्जरेणुः शिरसि विनिहिता याति चिन्तामणित्वं
नत्वा भक्तानतस्तान्हरिचरणवरा(न्) कोऽपि वक्ष्यीशकीर्तिं
ईशकीर्तिकथनप्रयोजनमाह । [॥ १ ॥

संसारदुःखजलधिं तरणिस्तितीर्षोः
संकीर्तनं भवतो गुणकर्मनाम्नां ।
श्रुत्वेत्यमच्युतकृपालवमाकलय्य
नीचो ऽपि वच्मि चरितं मधुसूदनस्य ॥ २ ॥

ननु ब्रह्मादिदुःसाध्ये कथं नीचस्य वृत्तिरित्याह । ०

It ends:

सुसिद्धान्तपुष्पावलीयं मुदे स्तु
पदाब्जार्चने सज्जनप्रीतये ऽस्तु ।
मयोपाहृता सात्वतोद्यानतो या
विना वैष्णवानां प्रसादान्न लभ्या ॥

इति भागवतानन्दगोस्वामिविरचिता सुसिद्धान्तपुष्पावली समाप्ता ॥

[H. T. COLEBROOKE.]

2523.

2599. Foll. 11; size 12 in. by 5 in.; clear, modern Devanāgarī writing; nine lines in a page.

Kāśīmṛitimokshavinirṇaya, or *Kāśīmokshanirṇaya*, a treatise on the efficacy of dying at Kāśī as insuring final emancipation to a devout Hindu; by *Sureśvarācārya*.

It begins: श्रीविश्वनाथाय नमः (see Aufr., Cat. Cat., काशीमोक्षनिर्णयः) ॥

नमस्कृत्य जगन्नाथं मायया चंद्रशेखरं ।
गंगाधरं गरच्छायानीलकंठमुपास्महे ॥ १ ॥

वाराणसीं पुरीं पुण्यां ये ऽधितिष्ठंति जंतवः ।
व्याचष्टे तारकं ब्रह्म रुद्रस्तेषां दयानिधिः ॥ २ ॥

प्राणप्रयाणसमये प्राप्य ज्ञानं महेश्वरात् ।
मुच्यंते जंतवः सर्वे बद्धाश्चानाद्यविद्यया ॥ ३ ॥

मोक्षस्य तेषां तादात्म्यं घटे तरखयोरिव(?) ।
पुनर्देहांतरारंभे कारणं नास्ति किंचन ॥ ४ ॥

सालोक्यादेर्न विद्वद्भिः साक्षान्मोक्षत्वमिष्यते ।
उपास्तेः पर(फल marg.)रूपत्वात्तारतम्यपदस्थितेः ॥५॥

ज्ञानाग्निना विनष्टत्वाद्विश्लिष्टा पूर्वकर्मणां ।
उत्तरेषां न विश्लेषो भवेन्मुक्तस्य जीवतः ॥ ६ ॥

प्रारब्धं कर्मभोगेन क्षीयते ज्ञानकारणं ।
ततो विदेहकैवल्यं भवतीति सुनिश्चितं ॥ ७ ॥

काश्यां विदेहकैवल्यप्राप्तेरुत्तरकर्मणां ।
असंभवान्न विश्लेषो वेदितव्यो विचक्षणैः ॥ ८ ॥

किमत्र प्रमाणं । श्रूयते हि । तद्यथा ईषिकातूलमग्नौ प्रोतं प्रदूयते एवमिहास्य सर्वे पाप्मानः प्रदूयंत इति । ० तर्हि पापकर्मणामेव विलयः श्रूयते न पुण्यकर्मणामिति चेन्नेत्याह । ब्रह्मादीनां शरीराणि क्षुत्करशरीरवत् । यतो जिहासितव्यानि तस्माद्धर्मे ऽपि पाप्मगोरिति वचनात् । पुण्यकर्मारब्धानां ब्रह्मेंद्रादिशरीराणां पापकर्मारब्धक्षुत्करादिशरीरवज्जिहासितव्याविशेषात्पुण्यस्यापि कर्मणः पाप्मत्वेन कीर्तनं युक्तं ॥ तथा च भगवद्गीतासु श्रूयते । ० further on the opening paragraphs of the *Jābālopanishad* are cited.

It ends: किं बहूक्तेन ॥

येन केनापि यः कश्चिन्निमित्तेन परित्यजेत् ।
काश्यां प्राणान्सर्वजंतुर्मुक्त इत्यवगम्यतां ॥

मोक्षस्य निर्णयः काश्यामित्यमेकेन जन्मना ।
सर्वेषामेव जंतूनां प्रमाणैः प्रतिपादितः ॥

DR.RUPANATHJI(DR.RUPAKUMATH)

विश्वेश्वरो जयति विश्वविमुक्तिहेतोः
काशीनिवासरसिकः करुणासमुद्रः ।
यत्पादपद्मयुगसौरभवासितस्य
जंतोर्भवत्यकृतके शिवसागरस्य ॥

इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिपुराणवाक्यनिर्धारितः काशीमृतिमोक्षविनिर्णयः समाप्तः ॥

On fol. 1*a* the treatise is called *Kāśīmuktiprakāśikā*, cf. Wilson, Mack. Coll. (second ed.), p. 125.

This work, as well as the succeeding one, should perhaps rather have been given under Sacred Law than under *Bhakti*.

[Mack. Coll.]

2524.

1991. Foll. 55; size 8½ in. by 4 in.; clear, correct, modern Devanāgarī writing (European paper); nine lines in a page.

Prapañcasāraviveka, or *Bhavasāraviveka*, a course of moral and religious instruction for pious *Vaishṇavas*, in eight chapters; by *Gaṅgādhara*, son of *Sadāśiva-sūri Mahāḍakara*, and pupil of *Advaitānanda*.

It begins:

नमस्कृत्य शिवानाथं लक्ष्मीकांतं जगद्गुरुं ।
भवानीं ढुंढिराजं च दंडपाणिं च भैरवं ॥ १ ॥

गंगां सरस्वतीं रामं वायुपुत्रं जितेंद्रियं ।
देवदैत्यगुरू सूर्यं वाल्मीकिं व्यासनारदौ ॥ २ ॥

अद्वैतानंदपादाब्जं पितरं मातरं गुरुं ।
देवानृषीन् पितॄन् धर्मं काशीं च हृदि भक्तितः ॥ ३ ॥

सदाशिवतनूजन्मा वत्सर्षिकुलसंभवः ।
गंगाधरो जगतिख्यातो भगवद्भक्तिकिंकरः ॥ ४ ॥

नानाशास्त्राणि चालोक्य बालानां हितकाम्यया ।
भवसारविवेकं च कुर्वे मोहविनाशकं ॥ ५ ॥

यस्य प्रज्ञानमात्रेण मातेव हितकारिणी ।
बुद्धिर्विवर्धते पुंसां तस्मादार्द्रियतां बुधैः ॥ ६ ॥

सुभाषितं विचित्रं च यो नो जानाति मानवः ।
बलीवर्दसमो लोके शोभते शृंगवर्जितः ॥ ७ ॥

रूपयौवनसंपन्ना विशालकुलसूनवः ।
विद्याहीना न शोभंते निर्गंधाः किंशुका इव ॥ ८ ॥

विद्यां प्राप्य प्रयत्नेन धर्ममोक्षं न विंदति ।
अर्थकामपरो नित्यं स वै मूढ इति श्रुतः ॥ ९ ॥

यस्य विद्याप्रवर्गाय परोपकृतिजोर्वितं ।
स साधुर्वीरि इत्याहुः पंडितः कवयो महान्(!) ॥ १० ॥

शीलविद्याविहीनेन किं कुलेन च देहिना ।
अकुलीनो ऽपि विद्वान्सः पूज्यते दैवतैः सह ॥ ११ ॥

विद्या यशस्करी पुंसां श्रेयःसंतोषदायिनी ।
सम्यगाराधिता विद्या मोक्षदा इति मे मतिः ॥ १२ ॥

शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं ।
रूपयौवनसंपन्नो यो नारी धनिकः कविः ॥ १३ ॥

दाता दोग्धी सुधेनुश्च मंजुभाषी जितेंद्रियः ।
एते यत्र च तिष्ठंति तत्र लोकाः कृतादराः ॥ १४ ॥

किं तपः किं सुखं दानं को धर्मः कस्य संपदः ।
कः शूरः कश्च विद्वांश्च को लाभः संसृतौ महान् ॥ १५ ॥

को देवः कश्च पूज्यश्च धीरः को बंधुरेव च ।
शत्रुः कः किं च मित्रं च किं फलं जीवितस्य तु ॥ १६ ॥

भूषणं किं पवित्रं च ग्राह्यं किं त्याज्यमेव च ।
तीर्थं किं कश्च मुक्तश्च मूर्खः को ब्रूत तत्त्वतः ॥ १७ ॥

I. (*śl.* 17) *upodghāta*; II. (*śl.* 60) *gūḍhārthapraśnottaranirūpaṇa*; III. (*śl.* 146) *nītimārganirūpaṇa*; IV. (*śl.* 55) *karmavipākanirūpaṇa*, on sins and punishments; V. (*śl.* 73) *devasvarūpanirūpaṇa*, on God (*Vishṇu*); VI. (*śl.* 115) *vāsudevapūjānirūpaṇa*, on the modes of worshipping *Vishṇu*; VII. (*śl.* 105) *bhāgavatadharmanirūpaṇa*, on the duties of a *Vaishṇava*, and the reward accruing therefrom; VIII. (*śl.* 267) *ahorātrakṛityanirūpaṇa*, on religious rites generally.

The verses seem to be partly the author's own, and partly culled from various sources.

The *bhakti*-element, though not too obtrusive, is by no means absent. While a devout adherent of *Vishṇu*, the author is not bigoted, and allows to *Śiva* a certain share

DR.RUPNATHJI(DR.RUPAK NATH)

of religious sentiment. We extract a few passages :

एको देवो ऽद्वयः कृष्णो वासुदेवो निरंजनः ।
सर्वाधारः सर्वसाक्षी वेत्ता सर्वावभासकः ॥

सर्वव्यापी नियंता च भूतानां सर्वदेहिनां ।
मायावी निर्गुणः शुद्धः कर्ता पातांतको गुरुः ॥

यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं ।
सर्वज्ञो ऽनंतशक्तिश्च विश्वरूपी सुखात्मकः ॥

सत्यो भूतहितो ऽनंतो देवदेवो महेश्वरः ।
भोक्ता च यज्ञतपसां पवित्रो मंगलं परं ॥

क्रूराणां पापिनां शास्ता भक्तानामभयंकरः ।
यस्याधीनाश्च देवाश्च गंधर्वाः पितरो नराः ॥ fol. 20*b*.

दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता ।
मनुष्याद्ब्राह्मणत्वं च दुर्लभं सुतरां मतं ॥

लब्ध्वा भक्तिं न कुर्वंति वासुदेवे महात्मनि ।
जीवन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचन ॥

तच्चित्तस्तद्व्रतः प्राणः प्रेमभावेन तत्परः ।
भक्त इत्युच्यते सद्भिर्भीष्मप्रह्लादनारदैः ॥

अद्य श्वो वा मरिष्यंति गमिष्यंति यमालयं ।
हरिं यदि स्मरिष्यंति तरिष्यंति भवार्णवं ॥

अनित्यमसुखं लोकं जन्ममृत्युजराकुलं ।
मत्वा तु सततं धीरो नारायणपरो भवेत् ॥

विविक्तदेश आसीनो विरागो विजितेंद्रियः ।
प्रसन्नचित्तः सततं ध्यायेद्यदि हरिं परं ॥ ० fol. 22*b*.

शालग्रामशिलाबिंबं कोटिहत्याविनाशनं ।
संस्मृतं पूजितं ध्यातं कीर्तितं च नमस्कृतं ॥

शालग्रामशिलारूपी यत्र तिष्ठति शंकरः ।
तत्र देवासुरयक्षभुवनानि चतुर्दश ॥

यवमात्रं तु गर्तः स्याद्यवार्धं लिंगमुच्यते ।
शिवनाभ इति प्रोक्तस्त्रिषु लोकेषु दुर्लभः ॥

वासुदेवमयं क्षेत्रं लिंगं शिवमयं स्मृतं ।
तस्माद्धरिहरक्षेत्रे पूजयेच्छंकराच्युतौ ॥ ०

शालग्रामशिला रम्या द्वारकाचक्रसंयुता ।
तुलसीशंखघंटाद्यैः पूजिता मुक्तिदायिनी ॥

तस्मात्तु ब्राह्मणो नित्यं त्रिकाले भक्तितः शुचिः ।
शालग्रामशिलायां हि पूजयेद्धरिमव्ययं ॥ fol. 26*b*.

शालग्रामशिलायाश्च गंगाया गुणवर्णने ।
तुलस्याश्च विशेषेण न समर्थः प्रजापतिः ॥

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थं विचिन्वामि(?न्नामि) वरदा शोभने भव ॥

एवं संप्रार्थ्य तुलसीं गृह्णीयाद्धरिप्रियां ।
पूजयित्वा रमाकांतं कृतकृत्यो भवेन्नरः ॥ fol. 29*b*.

ध्यानं परं कृतयुगे त्रेतायां यजनं तथा ।
द्वापरे विष्णुपूजा च कलौ केशवकीर्तनं ॥

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरे ऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं ॥ fol. 34*a*.

It ends :

य इदं स्मृतिसारार्थं महर्षीणां च संमतं ।
भक्त्या पठेत्पाठयेद्वा स विद्वान्मुक्तिमाप्नुयात् ॥ २३५ ॥

शास्त्राब्धिमथनाज्जातो ग्रंथो ऽयं पारिजातकः ।
सुधानां कामदो भूयान्मूढानां भजतामपि ॥ २६६ ॥

बहवो यद्यपि ग्रंथाः पादपाः संति भूतले ।
तथाप्ययं विजयते हरिनामफलैः शुभैः ॥ २६७ ॥

इति श्रीमन्महाडकरोपनामकसदाशिवसूरिसूनुभगवद्भक्तकिंकरगंगाधरविरचिते प्रपंचसारविवेके अहोरात्रकृत्यनिरूपणं नाम अष्टमोल्लासः समाप्तः ॥

For another MS. of this work, see Rāj. Mitra, Notices of Sanskrit MSS., x., p. 162.

[Dr. John Taylor.]

G. Kaśmīr Śaivism.

(*Spanda and Pratyabhijñā.*)

2525.

66a. Foll. 48; size 11 in. by 6 in.; good, thick (*Kaśmīr*) Devanāgarī writing of about 1750 A.D.; thirteen lines in a page.

Spandavivṛiti (or *Spandakārikāvivaraṇa*), a commentary, by *Rājānaka Rāma*, on *Bhaṭṭa Kallaṭa's Spandakārikā* (or *Spandārthasūtrāvalī*), or metrical paraphrase of *Vasugupta's Spandasūtra* (or *Śivasūtra*).

DR.RUPA NATHJI(DR.RUPAK NATH)

The commentary also includes the text of the *kārikās* as well as that of *Kallaṭa's* own brief explanation (*vṛitti*) of his verses, and is thus an exposition of the whole of the *Spanda-sarvasva*, as *Kallaṭa's Kārikās* and *Vṛitti* are also called.

It begins:

दशादिक्कालाद्यैरकलितचिदालोकवपुषः
सदा तादृक्स्वात्मानुभवितृतया विस्फुरति यः ।
निजो धर्मः शंभोरनुपमचमत्कारसरसः
परं शाक्तं तत्त्वं जयति जगति स्पंद इति तत् ॥

तज्ज्ञैरदर्शितदिशः स्वयमाविशंतः
केचिन्निसर्गगहनं विषमं भ्रमंतु ।
तेनैव यत्पुनरमी हतवर्त्मनान्या
नाकार्यते गमनाय महान्भ्रमो ऽयम् ॥

नानावादानिलौघाननवसरकृतान्योन्यसंघट्टघोरो-
द्घातानापातयद्भिः श्रवणविदलनोद्दामशब्दप्रबंधान् ।
शास्त्राब्धिः क्षोभिते यैर्विवरणरभसादुद्यदावर्तभीम-
भ्रांतिभृष्टागमार्थैस्तरविधुरमतिस्तारितोर्वी जनस्तैः ॥

कश्चिद्विन्नरुचिर्विदन्नपि परं तत्त्वं विपर्येस्यति
द्वेषध्वांतविरुद्धबुद्धिरितरो जात्यैव चान्यो जडः ।
इत्थं दुर्लभ एव सर्वहृदयग्राही गिरां संग्रहः
किं त्वेते ऽद्य विवेकिनः कतिपये संत्वत्र पात्रं सताम्॥

केनापि ग्रथितां प्रसारणधिया कश्चिद्धि सूत्रं कृताम्
एकीकृत्य यथागमं विरचितां स्पंदार्थसंभावलीम् ।
ईशानुग्रहशक्तिवज्रशिखया विद्वेष्यविद्वन्मनो-
माणिक्येषु निवेशयाम्यहमिमां कंठे कृतार्घां (*r.* र्घीं)
[द्वयीम् ॥

ओं नमः शिवाय सशिवाय ॥ ओं

[*Kārikā*] यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शंकरं स्तुमः ॥ १ ॥

[*Vṛitti*] अनेन स्वस्वभावस्यैव शिवात्मकस्य संकल्पमात्रेण जगदुत्पत्तिसंहारयोः कारणत्वं विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्योत्पत्तिहेतुत्वं नमस्कारद्वारेण प्रतिपाद्यते ॥

[*Vivṛiti*] तं शंकरं श्रेयसः कर्तारं स्तुमः प्रशंसामः । तं कं । यस्योन्मेषनिमेषाभ्यां शक्तिप्रसरप्रलयाभ्यां जगतो विश्वस्य प्रलयोदयौ विनाशप्रादुर्भावौ । अत्र यथासंख्यं न विवक्षितमिति वक्ष्यामः । तं कीदृशं । शक्तिचक्रविभवप्रभवं । शक्तीनां वक्ष्यमाणस्वरूपाणां चक्रं समूहः । स एव विभव ऐश्वर्यं तस्य प्रभवः ।[1] (fol. 4*b*) अभिधानमस्य शास्त्रस्य स्पन्द इति यतः स्पंदतत्त्वविवित्रय इत्यादाविहैव व्यवहारः । स्पंदशब्दश्चायं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य तावन्मात्रसंरंभात्मनः शक्त्यपरपर्यायस्य परमेश्वरस्य धर्मस्य किंचिच्चलनात्स्पंद इत्यर्थानुगमाद्वाचकत्वेन व्यपदिष्टः । तत्प्रतिपादनहेतुत्वाच्छास्त्रमपीदं स्पंदशब्देनाभिधीयते । विषयश्चास्य विशुद्धश्रद्धाभक्तिप्रकर्षैरिशुनित(!)परमेश्वरपरशक्तिपातप्रोन्मील्यमानस्वभावालोकतिरस्कृतसकलसंदेहांधकारत्वात्प्रबुद्धः सम्यगुपनतदीक्षादिसंस्कारो गुरुवचनचोदनामात्रावशेषस्वात्मैश्वर्योपलब्धिस्तादृशस्यैवेहोपदेशत्वेन पुरस्तात्परिगृहीतत्वादित्यभिधानविषयावप्यवगंतव्यौ ॥ व्याख्यातश्चायमादिश्लोकः । समस्तकरणार्थोपक्षेपगर्भः ॥ १ ॥

We subjoin the text of the remaining *kārikās*, slightly emended with the help of the commentaries and a careful collation kindly supplied by Professor Bhandarkar (B):

अत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।
तस्यानावृतरूपत्वान्न निरोधो ऽस्ति कुत्रचित् ॥ २ ॥ 5*a*.

जाग्रदादिविभेदे ऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वभावाद्दुपलभ्यतः ॥ ३ ॥ fol. 6*a*.

अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः ।
सुखाद्यवस्थानुस्यूते वर्तन्ते ऽन्यत्र ताः स्फुटम् ॥ ४ ॥ 8*a*.

न दुःखं न सुखं यत्र न ग्राह्यं ग्राहको न च ।
न चास्ति मूढभावो ऽपि तदस्ति परमार्थतः ॥ ५ ॥ 8*b*.

यतः करणवर्गो ऽयं विमूढो ऽमूढवत्स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतौ ॥ ६ ॥ 9*a*.

लभते तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वज्ञेयमकृत्रिमा ॥ ७ ॥ fol. 9*b*.

न हीच्छा नोदनस्यायं प्रेरकत्वेन वर्तते ।
अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत् ॥ ८ ॥ fol. 10*b*.

निजाणुद्यासमर्थस्य कर्तव्येष्वभिलाषिणः ।
यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम् ॥ ९ ॥ 11*b*.

तदा स्यात्कृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षणः ।
यतस्तदोप्सितं सर्वं जानाति च करोति च ॥ १० ॥ 12*a*.

तमधिष्ठातृभावेन स्वभावमवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुमृतिः कुतः ॥ ११ ॥ 12*b*.

DR. RUPNATHJI DR.RUPAKNATH JI

नाभावो भावि(r.भाव्य)तामेति न च तत्रास्त्यमूढता ।
यतो ऽभियोगसंस्पर्शात्तदासीदिति निश्चयः॥ १२॥ 13a.

अतस्तत्कृत्रिमं ज्ञेयं सौषुप्नपदवत्सदा ।
न त्वेवं स्मर्यमाणत्वं तत्रस्थं प्रतिपद्यते॥ १३॥ fol. 13b.

अवस्थायुगलं चात्र कार्यैकर्तृत्वशब्दितम् ।
कार्यता ह्यधिणी तत्र कर्तृत्वं पुनरध्वयम् ॥ १४ ॥ 14b.

कार्योन्मुखः प्रयत्नो यः केवलं सो ऽत्र लुप्यते ।
तस्मिंलुप्ते विलुप्तो ऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥ 15a.

न तु यो ऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदं ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात् ॥१६॥ 15b.

इति० व्यतिरेकोपपत्तिनिर्देशः प्रथमो निष्पन्दः॥ fol. 16a.

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्ते परस्य तु ॥ १७ ॥ 16a.

ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।
पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः॥ १८॥ fol. 17b.

गुणादिस्पन्दनिष्पन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥

अतः सततमुद्युक्तः स्पन्दतत्त्वविधिक्रये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति॥ २१॥ fol. 18b.

अतिक्रुद्धः प्रहृष्टो वाक्यं(r. वा किं) करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः॥ २२॥ 20b.

यामवस्थां समालम्ब्य यदयं मन्य वक्ष्यति ।
तदवश्यं करिष्ये ऽहमिति सङ्कल्प्य तिष्ठति ॥ २३ ॥

तमाश्रित्योर्ध्वमार्गेण सोमसूर्याबुभावपि ।
सौषुम्णेऽध्वन्यस्तमितौ हित्वा ब्रह्माण्डगोचरम्॥२४॥ 22a.

तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्नपदवन्मूढः प्रबुद्धः स्यादनावृतः॥ २५॥ fol. 23a.

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्ते ऽधिकाराय करणानीव देहिनाम् ॥ २६ ॥

तत्रैव संप्रलीयन्ते शान्तरूपा निरञ्जनाः ।
सहाराधकचित्तेन तेन ते शिवधर्मिणः॥ २७॥ fol. 23b.

इति० व्यतिरिक्तस्वभावोपलब्धिर्द्वितीयो निष्पन्दः॥ fol. 25a.

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात् ।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः॥ २८॥ fol. 25b.

तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः ।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः॥ २९॥

इति वा यस्य संपत्तिः(r.संवित्तिः) क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं मुक्तो जीवन्मुक्तो न संशयः*॥३०॥ 25b.

इति० विश्वस्य स्वस्वभावशक्तिमात्रत्वोपपत्तिः तृतीयो निष्पन्दः॥ fol. 27b.

अयमेवोदयस्तस्य ध्ये [यस्य ध्यायिचेतसि B.] ।
तदात्मतासमापत्तिरिच्छतः साधकस्य या ॥ ३१ ॥ 27b.

इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥ ३२ ॥ 28a.

यथेच्छाभ्यर्थितो धाता जाग्रतो ऽर्थान्हृदि स्थितान् ।
सोममूर्त्यैव कृत्वा संपादयति देहिनः॥ ३३ ॥

तथा स्वप्ने ऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितोऽवश्यं प्रकल्पयेत्॥३४॥ 29a.

अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्भर्मैकत्वतः ।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये॥ ३५॥ fol. 30b.

यथा ह्यर्थो ऽस्फुटो दृष्टः सावधाने ऽपि चेतसि ।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः॥ ३६॥

एवं(v.l. तथा B.) यत्परमार्थेन यत्र(r. येन) यत्र यथा [स्थितम् ।
तत्तथा बलमाक्रम्य नचिरात्संप्रवर्तते॥ ३७॥ fol. 31a.

दुर्बलो ऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा यो ऽतिबुभुक्षितः॥३८॥ 32a.

अनेनाधिष्ठिते देहे यथा सर्वज्ञतोदयः ।
तथा स्वात्मन्यधिष्ठानात्सर्वज्ञैवं भविष्यति ॥ ३९ ॥ 33a.

ग्लानिर्विलुंठिता(r.°का†) देहे तस्याश्चाज्ञानतः सृतिः ।
तदुन्मेषविलुप्तं चेत्कुतः सम्पाद(r.सा स्याद)हेतुका॥ ४०॥ [fol. 33b.

एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः ।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥ 34a.

---

* Here, as in other instances where several *ślokas* are taken together for comment, the *vṛitti* for the whole is given after the *kārikās*, but at the end of the commentary the commentator remarks that the *vṛittikṛit* has taken them separately, as in the case of these three verses: व्याख्यातमेतद्वृत्तौ पृथक् सर्वात्मक एवायमात्मेत्यादिना तेन तथाविधेनेत्यादिना एवं स्वभावस्येत्यादिना ग्रंथेन ॥

† शरीर विलुंठिका धातुवर्णौजःशक्त्यादीनां हठेन हर्त्री ।

DR.RUPANATHJI(DR.RUPAK NATH)

अतो विन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तन्ते ऽचिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥ 34*b*.

दिदृक्षयेव सर्वार्थान्यदा व्याप्यावतिष्ठते ।
तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते (० गम्यते *v.l.* B.)
[॥ ४३ ॥ fol. 35*b*.

प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोच्य गोचरम् ।
एकत्रारोपयेत्सर्वं ततो ऽन्येन न पीड्यते ॥ ४४ ॥ 36*a*.

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यतां ।
कलाविलुप्तविभवो गतः सन्स पशुः स्मृतः (*r.* स्थितः) ॥
[४५ ॥ fol. 36*b*.

[परामृतरसापायस्तस्य यः प्रत्ययोद्भवः ।
तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः ॥ ४६ ॥ B.*]

स्वरूपावरणे चास्य शक्तयः सततोत्थिताः ।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥ 40*a*.

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्धुपपादिका ॥ ४८ ॥ 41*a*.

तन्मात्रोदयरूपेण मनो ऽहंबुद्धिवृत्तिना (*r.* वर्तिना) ।
पुर्यष्टकेन संरुद्धस्तदुक्तं प्रत्ययोद्भवम् ॥ ४९ ॥

भुङ्क्ते परवशो भोगं तद्भावात्संस्मरेद्यथा (*r.* ० दतः) ।
संसृतिप्रलयस्यास्य कारणं संप्रचक्षते ॥ ५० ॥ fol. 44*a*.

यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ (० दयौ *v.l.* B.) ।
नियच्छन्भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥ ५१ ॥ 45*b*.

इति ० शक्त्यात्मकविश्वाव्यतिरेकोपलब्धिः पञ्चदशी चतुर्थो निष्पन्दः ॥ fol. 47*a*.

अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।
वन्दे विचित्राधिषणां चित्रां तां गुरुभारतीम् ॥ ५२ ॥

[*Vṛitti :*] अगाधो ह्यप्रतिष्ठो ऽनंतः ॥

समाप्तं स्पंदसर्वस्वं प्रवृत्तं भट्टकल्लटात् ।
स्वप्रकाशैकचित्तत्वपरिरंभरसोत्सुकात् ॥

[*Vivṛiti :*]

दृब्धं महादेवगिरौ महेश-स्वप्नोपदिष्टाच्छिवसूत्रसिंधोः ।
स्पंदामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकार ॥

तामशक्यस्वरूपप्रतिपादनां हृदि स्फुरंतीं गुरुभारतीं वंदे । गुरोर्वसुगुप्ताभिधानस्य साक्षात्सिद्धमुखसंक्रांतसमस्तरहस्योपनिषद्भूतस्पंदतत्त्वामृतनिष्यंदस्य भारतीं वाचं स्तौमि ॥ कीदृशीं । अगाधेत्याद्यर्धेन विशेषणम् । ० ending with four benedictory stanzas, the last of which runs thus:

शशिज्योतिर्दीपप्रभृतिभिरशक्यं शमयितुं
यदासीन्निष्यंदीकृतसकललोकं किल तमः ।
गते तत्रेदानीं क्षयममलसूर्यागमहते
कृतार्थाः संकोचं विजहतु विनिद्रा जनदृशः ॥

संपूर्णेयं वृत्त्यनुसारिणी स्पंदविवृतिः ॥ कृतिस्तत्रभवतो महामाहेश्वराचार्यशिरोमणिराजानकश्रीमदुत्पलदेवानुजीविनो राजानकश्रीरामस्येति शिवम् । ०

Quotations are met with in the commentary from *Jñānagarbhastotra*, fol. 41*b*; *Tattvagarbha(stotra)*, fol. 37*a*, 38*a* (यदा त्वेवंविधादत्र निजा भोगज्ञता पशोः । तदा माया स्वरूपेति ज्ञायसे वैभवाश्रयः ॥); the *Pārameśvara*, fol. 3*b* (शक्तिश्च शक्तिमांश्चैव पदार्थेऽयमुच्यते । शक्तयो ऽस्य जगत्कृत्स्नं शक्तिमांश्च महेश्वर इति ।); *Pratyabhijñā*, fol. 38*a*, 40*b* (*an. ślokas*); *Bharṭṭihari*, fol. 30*b* (प्रविभज्यात्मनात्मानं मृष्टा भावान्यथाविधान् । सर्वेश्वरः सर्वशक्तिः स्वप्ने भोक्ता प्रपद्यते ॥); *Mālinīvijaya*, fol. 42*b* (तथा च श्रीमालिनीविजये ॥ या सा शक्तिर्जगद्धातुः कथिता समवायिनी । इच्छा त्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥); whilst other schools of Yoga philosophy are referred to at fol. 13*a*: यथान्यैर्योगिभिरुपदिश्यते ।

On the tencts and principal works of the *Kaśmīr Śaivas*, see esp. Hall, Index, pp. 196 seq.; Bühler, Detailed Report, pp. 77 seq.; Bhandarkar, Report 1883-4, pp. 76 seq.

Bhaṭṭa Kallaṭa, the disciple of *Vasugupta*, lived under king *Avantivarman*, who reigned about 854 A.D.; whilst *Rājānaka Rāma* calls himself a dependent (or pupil) of *Rājānaka Utpaladeva*, who, if identical with the author of the *Pratyabhijñā*, is assigned by Prof. Bühler to the first half of the tenth century. At the end of his commentary on the *Bhagavadgītā*, *Rājānaka Rāma* (also called *Rāmakaṇṭha*)

* Prof. Bhandarkar's MS. of the *Vivaraṇa* likewise omits the text of this verse, supplied by him from a copy of the *Spandakārikā* in the Śāradā character (Rep. of 1875-76, no. 508).

DR.RUPNATHJI(DR.RUPAK NATH)

speaks of himself as a younger brother of *Muktākaṇa* (? the same as the poet of that name in the time of *Avantivarman*), and a descendant of *Nārāyaṇa* of Kānyakubja*; whilst in the colophon of a MS. of his *Nareśvaraparīkshāprakāśa* (Rāj. Mitra, Notices, iii., no. 1140) the author is called *Nārayaṇakaṇṭha-sūnu-Rāmakaṇṭha*.

Rāmakaṇṭha is referred to in the *Sarvadarśanasaṃgraha* (Cowell and Gough, transl., p. 125) in the chapter on the *Śaivadarśana*, in connection with the interpretation of the term *puryashṭaka* in the 49th *kārikā* (or rather the corresponding *spandasūtra*), where the present commentary gives the following interpretation (fol. 44*b*): पुर्यां सूक्ष्मशरीरे तन्मात्रपंचकं गुणत्रयमिति स्थूलशरीरकारणभूतमष्टकं यत्सन्निविष्टं तन्मुख्यं पुर्यष्टकं तत्कार्यत्वात्स्थूलमपि शरीरं तच्छब्देन पुर्यष्टकमित्युच्यते ॥ *Nārāyaṇakaṇṭha* is likewise referred to in the same work (ib. p. 129), apparently as the author of the *Mṛigendravṛitti*.

Fol. 1*a* contains the following note, in Colebrooke's hand, '*Syanda*: a demonstration of the Identity of *Śiva* and his active power or *Śakti*.' [H. T. Colebrooke.]

2526.

1573a. Foll. 78; size 10 in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

Triṃśikātattvavivaraṇa (or *Parātriṃśikātattvavivaraṇa*), an exposition, by *Rājānaka Abhinavagupta* (son of *Cukhala*, and disciple of *Utpala*), of the *Triṃśikā* (or *Parātriṃśikā*), a versified treatise of *Kaśmīr Śaiva* philosophy. Very correct.

* यो नारायण इत्यभूच्छुतनिधिः श्रीकन्यकुब्जे द्विजस्
तद्वंशे स्वगुणप्रकर्षखचिते मुक्ताकणाख्यो ऽभवत् ।
तस्यैषा सदृशानुजेन रचिता रामेण विद्वज्जन-
श्राव्यत्वात्सफलश्रमेण भगवन्नीतापदार्थप्रथा ॥

It begins:

विमलकलाश्रयाभिनवसृष्टिमहाजननी
भरिततनुश्च पंचमुखगुप्तरुचिर्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम [सं]स्फुरतात् ॥ १ ॥

यस्यामंतर्विश्वमेतत् स्फुरत्यां
बाह्याभासंभासमानं विसष्टौ ।
क्षोभे क्षीणे ऽनुत्तरायां स्थितौ
तां वंदे देवीं स्वात्मसंवित्तिमेकां ॥ २ ॥

नरशक्तिशिवात्मकं त्रिकं हृदये या विनिधाय भासयेत् ।
प्रणमामि परामनुत्तरां निजभासां प्रतिभाचमत्कृतिं ॥ ३ ॥

जयत्यनर्गलमहिमा विपाशितपशुव्रजः ।
श्रीमच्छ्रीगुरुः शंभुः श्रीकंठः परमेश्वरः ॥ ४ ॥

निजाशेषविबोधाय प्रबुद्धस्मरणाय च ।
यथाभिनवगुप्तेन श्रमो ऽयं क्रियते मनाक् ॥ ५ ॥

श्री[दे]च्यु[वा]च ॥

अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदं ।
येन विज्ञातमात्रेण खेचरी समतां व्रजेत् ॥

परमेश्वरः पंचविधकृत्यमयः सततमनुग्रहमय्या पररूपया शक्त्या आक्रांतो वस्तुतो ऽनुग्रहात्मैव । न हि शक्तिः शिवाद्वैतं मर्शयेत् । सा च शक्तिर्लौकानुग्रहविमर्शमयी प्रथमतः परामर्शमयपश्यंत्या सृजयिष्यमाणानंतशक्तिशताविभिन्ना प्रथमतरं परमहामंत्रमय्यामदेशकालकलितायां संविदि विरूढौ तावत्पश्यंत्युद्भविष्यदुक्तिप्रत्युक्तिविभागेनैव वर्तते सैव च सकलप्रमातृसंविदद्वयमयी सततमेव वर्तमानरूपा ततस्तु पश्यंती यद्यदीप्सितं तत्तदेव समुचितकारणनियमप्रबोधितं बोधसूत्रणमात्रेण विमृशति ॥ °

The succeeding verses are as follows:

एतद्गुह्यं महागुह्यं कथयस्व मम प्रभो† ॥ fol. 14*a*.

हृदयस्या तु या शक्तिः कौलिकी कुलनायिका ।
तां मे कथय देवेश येन तृप्तिं लभाम्यहं ॥ fol. 16*a*.

Comm.: °तन्मे कथयेत्यपि पठंति । श्रीसोमानंदपादा व्याचक्षते च तत्तस्मादिति यद्वा तत्कथय येन तृप्तिं परमानंदमयीं लभे परमाद्वयनिर्वृतिस्वातंत्र्यरसा भवामीति समन्वयः ॥ व्रजामीत्यपि पाठः ॥ °

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरं ।

† At fol. 25*b* this half-*śloka* and the first *śloka* are referred to as अनुत्तरमित्यादिसार्धश्लोकयुगलं.

DR RUPNATHJI(DR.RUPAK NATH J)

कौलिको ऽयं विधिर्देवि मम हृद्योऽभ्यवस्थितः ।
कथयामि सुरेशानि सद्यः कौलिकसिद्धिदं ॥ fol. 17*a*.

Comm. fol. 23*b*: तदाहुर्निजवृत्तौ श्रीसोमानंदपादाः। कथयामीत्युच्चारयाम्युत्कलिकात इति । ०

अथाद्यास्त्रिषयः सर्वे स्वरा विंदुवसानगाः ।
तदंतःकालयोगेन सोममूर्यौ प्रकीर्तितौ ॥

पृथिव्यादीनि तत्त्वानि पुरुषांतानि पंचसु ।
क्रमात्कादिषु वर्गेषु मकारांतेषु सुव्रते ॥

वाय्वग्निसलिलेंद्राणां धारणानां चतुष्टयं ।
तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपंचकं ॥

अमूला तत्क्षमा ज्ञेया क्षांतिः सृष्टिरुदाहृता ।
सर्वेषामेव मंत्राणां विद्यानां च यशस्विनि ॥

इयं योनिः समाख्याता सर्वतंत्रेषु सर्वदा ॥ fol. 26*a*.

After a general discussion, the explanation of these 4½ *ślokas* begins fol. 44*b*:

सर्वत्र स्वस्वभावात्मकप्रभावप्रख्याप्रसरानिरोधो यस्या इत्यामंत्रणे यस्येति शोभने व्रतेन तदयमत्र संक्षेपार्थः ॥ स्वातंत्र्यैकरसावेशचमत्कारैकलक्षणा । परा भगवती नित्यं भासते भैरवी स्वयं॥ तस्याः स्वभासा योगो यः सो निरुद्धः सदोदितः । सदाशिवधरा तिर्यङ्नीलपीतसुखादिभिः ॥ भासमानैः स्वस्वभावैः स्वयं प्रथनशालिभिः । प्रथते संविदाकारः स्वसंवेदनसारकः ॥ स्वस्वसंवेदनं नाम प्रमाणमिति वर्ण्यते । बालतिर्यक्स्त्रीविदां यत्साम्येनैव भासते॥ इंद्रियाणि त्रिरूपं च लिंगं प्रत्यक्षःक्रमः । सारूप्यमन्यथा योगः प्रतीत्यनुदयो यमः ॥ इत्यादिको यस्य सर्वं द्वारमात्रे निरूप्यते । तत्स्वसंवेदनं प्रोक्तमविच्छेदप्रथामयं ॥ येषां नाक्षत्रिरूपादिनाममात्रे ऽप्यभिज्ञता । तेषामपि तिरश्चां हि सा सा संवित्प्रकाशते ॥ एवंभासा स्वभावेन स्वरूपामर्शनात्मिका । स्वरूपामर्शनं यच्च तदेव परवाग्वपुः ॥ तद्विचित्रस्वभावत्वाद्विचित्रप्रथनामयं । प्रथने पारतंत्र्यं हि न जातु भजते क्वचित् ॥ अपारतंत्र्यात्संकेतप्रत्यूहादेः कथं स्थितिः । अतः संकेतरहितं स्वस्वरूपविमर्शनं ॥ देशकालकलामायास्थानघातक्रियोज्झितं । परिपूर्णं स्वतः सर्वं सर्वाकारविलक्षणं ॥ स्वाभाविकमहासंवित्सत्संस्कारैकलक्षणं । शुद्धविद्यात्मकं रूपमहमित्युभयात्मकं ॥ तदेव मातृकारूपं धरादीनां निजं वपुः । तत्पारमार्थिकाकारं द्रुत्याश्यानस्वरूपतः॥ बीजयोन्यात्मकं प्रोक्तं शिवशक्तिस्वरूपकं । शिवशक्त्योस्तु संघट्टादन्योन्योच्छलितत्वतः ॥ परस्परसमापत्तिर्जेगदानंददायिनी । अंतःस्थविश्वपार्थंतपारमार्थिकसद्वपुः॥ यद्वोर्ये-मिति निर्णीतं तद्विश्लेषणयोजना । विसर्ग इति यन्नोक्तं भुमधाम(?) तदुच्यते॥ अनुत्तरपदावाप्तौ स एष सुघटो विधिः। अस्मादेव त्वमायोयाद्वर्णपुंजाद्विरूपिता ॥ मायामालंब्य भिन्नैव श्रीपूर्वे सृष्टिराद्यसौ । पंचाशद्भेदसंभिन्नप्रत्ययप्रसवात्मिका ॥ वंधरूपा स्वभावेन स्वरूपा वरणात्मिका । अत्रैवांतर्गतास्तास्ताः खेचर्यो विषयात्मिकाः॥ तन्वते संसृतिं चित्रां कर्ममायागुणात्मयीं। अस्यां साम्यं स्वभावेन शुद्धभैरवतामयं ॥ प्रोक्तं प्रागेव जीवत्वं मुक्तत्वं पारमार्थिकं । भिन्नाया वर्णसृष्टेश्च तदभिन्नं वपुः परं ॥ वोर्यमित्युक्तमत्रैव यदुष्मा मंत्रगुप्तता । तदेतदहमित्येव विसर्गानुत्तरात्मकं ॥ स्वं स्वभावं परं जानन्नीवन्मुक्तः सकृद्बुधः। सिद्धादिप्रेप्सवस्तेन क्रमसंकोचमूचितं ॥ नाभिकुंडलहृद्व्योम्नोर्योगिनोहमुपासते(?)। तदेतत्किल निर्णीतं यथागुर्वागमं मनाक् ॥ एतां संविदमालंब्य यत्साक्षान्मुक्ष्यतो ऽचित् । नैतावतैव तुलितं मार्गीशस्तु प्रदर्शितः ॥ इयतीति व्यवच्छिद्याद्वैरवीं संविदं हि कः । एतावाञ्शक्तिपातो ऽयमस्मासु प्रविजृंभितः ॥ येनाधिकारितैरेतदस्माभिः प्रकटीकृतं । अस्माकमन्यमातॄणामद्य कालांतरे ऽपि वा ॥ भवेत्प्रभूत्वाभविता तत्कः सूक्ष्मतमो ऽप्यतः । यः सर्वयोगावयवप्रकाशेषु गभस्तिमान् ॥ श्रीपूर्वशास्त्रे निर्णीतो येन मुक्तश्च भैरवकः । एतत्तु सर्वथा ग्राह्यं विमृश्यं च परेप्सुभिः ॥ क्षणं मर्त्यत्वमुलभां हित्वामूर्यां विचक्षणैः। आलोचलक्षणादूर्ध्वं नवेदात्मनि स्थितिः ॥ चिदेकाधिलवास्तेन संज्ञाम्यंते स्वतो रसात् ॥ Then follows a *prākṛit* passage: परसंवेअण भाससऊइण थिर अरसुहसो आइसऊइणसइ भासइस ० fol. 56*b*.

ततश्च विस्तरतो ऽनुत्तरस्वरूपनिरूपणाय ग्रंथावतारस्तन्निरूपयति ॥ चतुर्दशयुतं भद्रे तिथीशांतसमन्वितं । तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः॥ एतन्नायोगिनीजातो नारूढो लभते स्फुटं । हृदयं देवदेवस्य सद्यो योगविमोक्षदं ॥ अस्योच्चारे कृते सम्यङ्मंत्रमुद्रागणो महान् । सद्यस्तन्मुखतामेति स्वं देहावेशलक्षणं॥ मुहूर्तं स्मरते यस्तु वक्त्रेनाभिमुद्रितः। स बभ्राति तदा सर्वं मंत्रमुद्रागणं नरः ॥ अतीतानागतानथौन्मृष्टो ऽसौ कथयत्यपि। प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन्॥ साक्षात्पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः। प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन्॥ त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः। वीरा वीरेश्वराः सिद्धा बलवाञ्शाकिनीगणः॥ आगत्य समयं दृष्ट्वा भैरवेण प्रचोदिताः। यच्छंति परमां सिद्धिं फलं यद्वा समीहितं॥ अनेन सिद्धाः सेत्स्यंति साधयंति च मंत्रिणः। यत्किंचिद्भैरवे तंत्रे सर्वमस्मात्प्रसिध्यति ॥ अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः। प्रसिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥ fol. 59*a*.

० यदुक्तं कुलार्णवतंत्रे त्रिकमिति सर्वोत्तरमनुत्तरत्वं तन्निरूपयति ।

DR. RUPNATH JI (DR. RUPAK NATH)

अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग् भवेन्नित्यं स योगी स च दीक्षितः ॥
[fol. 68*b*.

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः । fol. 69*a*.

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ।
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ॥
कालाग्निमादितः कृत्वा मायांतं ब्रह्मदेहगं ।
शिवो विष्वाद्यनंतश्च परशक्तित्रयं मतं ॥ fol. 69*b*.

तदंतर्वर्ति यल्किंचिच्छुद्धमार्गे व्यवस्थितं ।
अणुविशुद्धमचिरादेश्वरं ज्ञानमश्नुते ॥
तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ।
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ॥
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरं ॥
एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता ॥ fol. 70*a*.

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ।
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमंत्रितां ॥
एकैकं तु दिशां बंधं दशानामपि योजयेत् ।
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशांतये ॥
शिखासंख्याभिजप्तेन तोयो नाभ्युक्षयेत्ततः ।
पुष्पादिकं क्रमात्सर्वं लिंगे वा स्थंडिले च वा ॥
चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ।
ततः मूर्तिं यजेद्वीरः पुनरेवासनं नवैः ॥
मूर्तिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ।
सर्वतत्त्वमुसंपूर्णां सर्वाभरणभूषितां ॥
यजेद्देवीं महेशानीं सप्तविंशतिमंत्रितां ।
ततः सुगंधिपुष्पैस्तु यथाशक्त्या समर्चयेत् ॥
पूजयेत्परया शक्त्या आत्मानं च विवेदयेत् ।
एवं यजनमाख्यातमग्निकार्ये ऽप्ययं विधिः ॥ fol. 71*b*.

कृतपूजाविधिः सम्यक् स्मरन्बीजं प्रसिध्यति ॥ 73*b*.

आद्यंतरहितं बीजं विकसन्निधिमध्यगं ।
हृत्पद्मांतर्गतं ध्यायेत्सोमांशं नित्यमभ्यसेत् ॥ fol. 75*a*.

यान्यान्कामयते कामांस्तांस्तान्शीघ्रमवाप्नुयात् ।
तस्मात्प्रत्यक्षतामेति सर्वज्ञत्वं न संशयः ॥
एवं मंत्रफलप्राप्तिरित्येतद्रुद्रयामलं ।
एतदभ्यासतः सिद्धिः सर्वज्ञत्वमवाप्यते ॥

Whether any other verses occurring in the MS. belong to the original treatise, it is difficult to make out.

Abhinavagupta's exposition concludes with the following genealogical account:

इत्थं प्रपन्नजननोद्धरणप्रवृत्त-
श्रीमन्महेश्वरपदांबुजचंचरीकः ।
वृत्तिं व्यधात् त्रिकरहस्यविमर्शगर्भां
काश्मीरकाद्भुखलकादधिगम्य* जन्म ॥ १ ॥

एतावदेतदिति कस्तुलयेत्प्रसह्य
श्रीशांभवं मतमनर्गलितांश्च वाचः ।
एतत्तु तत्त्वदखिलात्मनि भाति यस्मे
भाति ततो ऽत्र सुधियो न पराङ्मुखाः स्युः ॥ २ ॥

अस्य संशयविपर्ययभागिनो वा
ज्ञानं प्रकंपरहितं प्रकरोति सम्यक् ।
रूढस्य निश्चयवतो हृदयप्रतिष्ठां
संवादिनीं प्रकुरुते कृतिरीदृशीयं ॥ ३ ॥

एतावदर्थरससंकलनाधिरूढ-
धारानिरूढहृदयो विमृशेदतो ऽपि ।
यद्युत्तरं तदपि नैव सहेत नेदं
सोपानमेतदमलं पदमारुरुक्षोः ॥ ४ ॥

काश्मीरेषु यशस्करस्य नृपतेरासीदमात्याग्रणीः
श्रीमान्वल्लभ इत्युदाहृततनुः प्राग्यज्मा द्विजः ।
तस्य स्वांगभवः प्रसिद्धपदवीपात्रं समग्रैर्गुणैः
श्रीशौरिः शिशुचंद्रचूडचरणध्यानैकरत्नाकरः ॥ ५ ॥

शीलस्यायतनं परस्य यशसो जृंभास्पदं नर्मभूर्
वात्सल्यस्य समग्रलोककरुणाधर्मस्य जन्मस्थितिः ।
श्रीमद्वत्सलिकाभिधा च सहजा (सहचरी B.) तस्यैव
[भक्त्युल्लसत्
प्रोद्रिक्तांतरवृत्तिशंकरनुतौ यस्या मनो जृंभते ॥ ६ ॥

तस्यैवात्मभवो विभावितजगत्सर्गस्थितिः शंकर-
ध्यानाचीपरिचिंतनैकरसिकः कर्णाभिधानो द्विजः ।
यो बाल्ये ऽप्यथ यौवने ऽपि विषयासक्तिं विहाय
[स्थिराम्
एनामाश्रयते विमर्शपदवीं संसारनिर्मूलिनीं ॥ ७ ॥

---

* Prof. Bühler's Report has काश्मीरिकाद्विचुलकाद्-धिगम्य.

DR.RUPNATHJI(DR.RUPAK NATH)

भ्राता ममैव शिवशासनरूढचेताः
प्रेप्सुः परात्मनि मनोरथगुप्तनामा ।
यः शास्त्रतंत्रमखिलं प्रविवेक्तुकामः
प्राप्तुं परं शिवपदं भवभेदनाय ॥ ८ ॥

शिवशास्त्रैकरसिकः पदवाक्यप्रमाणवित् ।
रामदेवाभिधानश्च भूपितोत्तमजन्मकः ॥ ९ ॥

एतत्प्रियहितकरणप्ररूढहृदयेन यन्मया रचितं ।
धर्मजिज्ञासया वाक्यमिदं प्रोचुस्तपोधनाः ।

ऋषय ऊचुः ।

विभांडकसुत स्वामिन्सर्वज्ञ तपसां निधे ॥ ९ ॥
अस्माभिर्यत्तपस्तप्तं सर्वमफलमद्य मे ।
ब्रह्मलोकं गता अद्य पितरो नः पितामहाः ॥ १० ॥
अद्यास्माभिर्महद्भाग्यं लब्धं त्वत्पाददर्शनात् ।
अद्य धन्याः कृतार्थाः स्म(?स्मो) व्रतानि सफलानि नः ॥ ११ ॥
त्वत्पादांभोरुहद्वंद्वदर्शनं पुण्यराशिभिः ।
बहुजन्मार्जितैर्लभ्यं नान्यथा तपसां निधे ॥ १२ ॥
इत्युक्ता मुनयस्तूष्णीमासीनाः संशितव्रताः ।
तानाह भगवान्योगी विभांडकसुतो मुनिः ॥ १३ ॥

ऋष्यशृंग उवाच ॥

कच्चिद्वः सफला वेदाः कच्चिद्वः सफलं धनं ।
कच्चिद्वः सफला नार्यः कच्चिद्वः सफलं श्रुतं ॥ १४ ॥
अग्निहोत्रफला वेदा दत्तभुक्तफलं धनं ।
रतिपुत्रफला नारी शीलवृत्तफलं श्रुतं ॥ १५ ॥
कच्चिद्वो गुरुशुश्रूषा सफला मुनिपुंगवाः ।
कच्चिद्वः सफलं तप्तं तपश्चांद्रायणादिकं ॥ १६ ॥
भवद्भिरपि सर्वज्ञैः किं प्रष्टव्यो ऽस्म्यहं द्विजाः ।
यथामति प्रवक्ष्यामि वदंतु मुनिपुंगवाः ॥ १७ ॥
शतानंदादयो विप्रा इत्युक्तास्तपोधनाः ।
कृतांजलिपुटा ऊचुर्नत्वा साष्टांगमादरात् ॥ १८ ॥

ऋषय ऊचुः ॥

भगवन्योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
कथं ब्रह्म विजिज्ञास्यं कीदृशैर्नियतव्रतैः ॥ १९ ॥
कथं स्याद् ब्रह्मतादात्म्यं कालमृत्योश्च वंचनं ।
कथं कालस्वरूपं स्यान्नरेण ज्ञातमप्यथ ॥ २० ॥
संसारतारणोपायः कथमेकेन जन्मना ।
ऋष्यशृंग महाभाग सत्यमेतद्वदस्व नः ॥ २१ ॥ °

In the second chapter the following occurs :

ओंकारवाच्यं विश्वस्य कारणं परमेश्वरं ।
तस्मान्नादात्मकः साक्षादकारात्मा सनातनः ॥ १० ॥
अभूद्यं वासुदेवाख्यमाहुर्ब्रह्मर्षयो ऽमलाः ।
विंदुः समभवत्तस्माज्जीवात्मान्तः सनातनः ॥ ११ ॥
स ईश्वर इति प्रोक्तः शुद्धज्ञानमयः पुमान् ।
तयोर्मध्ये समुद्भूता कला चिद्रूपिणी परा ॥ १२ ॥
यामाहुर्भगवत्प्रकृतिं त्रयीरूपां सनातनीं ।
तत आविरभूत्साक्षात्पंचाशद्वर्णमातृका ॥ १३ ॥
सैव श्रीः परमा शक्तिश्चिल्लता परमेश्वरी ।
सा योन्नारायणमयी ब्रह्माभिन्ना चिदात्मका ॥ १४ ॥
[(the letters) ° १८ ॥
लक्ष्मीनारायणी साक्षान्मातृका समुदीरिता ।
मातृका परमा शक्तिरभिन्ना ब्रह्मणो द्विजाः ॥ १९ ॥
नारायणाज्ञया विश्वं सृजत्यवति हंति च ।
अनयैव समुद्भूता वेदाः सांगाः सनातनाः ॥ २० ॥
धर्मशास्त्रपुराणानि सर्वोपनिषदो ऽपि च ।
चतुःषष्टिकला विद्या विद्या अष्टादशापि च ॥ २१ ॥
सर्वं मातृकयोत्पन्नं जगदेतच्चराचरं ।
यदा सिसृक्षा भगवद्ब्रह्मणः परमात्मनः ॥ २२ ॥
तदा विराजं पुरुषं विश्वकारणविग्रहं ।
असृजन्नद्भुतरूपी पुरुषः स महान् द्विजाः ॥ २३ ॥
द्विधा कृत्वात्मनो देहमर्धेन पुरुषो ऽभवत् ।
अर्धेन नारी तस्यां तु विराजमसृजद्विभुः ॥ २४ ॥
यो महापुरुषः प्रोक्तः परब्रह्मात्मको मया ।
श्रीमदष्टाक्षरात्मासावेक एव परो ऽच्युतः ॥ २५ ॥
नारायण इति ख्यातः सर्वलोकैककारणं ।
स एवाद्यः पुमान्नित्यः परमात्मा सनातनः ॥ २६ ॥ °

Rāma is not introduced till the latter part of the third chapter :

त्रेतायुगे दशरथात्कौशल्यागर्भसंभवः ।
श्रीराम इति लोके ऽस्मिन् ख्यातो दाशरथिर्विभुः ॥ ६३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

हत्वा दुष्टं दुराधर्षं रावणं रजनीचरं ।
गुप्तं राक्षसकोटीभिर्भिन्नांजनचयोपमं ॥ ८४ ॥
राज्याभिषिक्तः सहितो भ्रातृभिर्लक्ष्मणादिभिः ।
वसिष्ठादिमहर्षीणां संनिधावपि वाक्पतेः ॥ ८५ ॥
वेदार्थसंग्रहं नाम्ना तंत्रं सकलकामदं ।
समस्तविद्यारत्नानां रहस्यप्रतिपादकं ॥ ८६ ॥
अनुत्तरब्रह्मतत्त्वरहस्यं श्रुतिसंमितं ।
कथयामास रुद्राय पृच्छते मुनिपुंगवः ॥ ८७ ॥
हिताय सर्वलोकानां धर्मसंस्थापनाय च ।
सारभूतमिदं वेदवेदांतार्थरहस्यकं ॥ ८८ ॥
मुक्तिरत्नं महच्छास्त्रमुक्त्वाज्ञातकौपतिः ।
यत्रैव ब्रह्मणस्तत्त्वरहस्यं श्रुतिसंग्रहं ॥ ८९ ॥
ब्रह्मविद्याष्टवर्णादिविधानं सांगमुत्तमं ।
रहस्यमपि यत्रोक्तं भोगस्वर्गापवर्गदं ॥ ९० ॥
तंत्रं दाशरथीयाख्यमिदं तस्माद् द्विजोत्तमाः ।
भगवद्वदनांभोजादाविर्भूतमिदं शुभं ॥ ९१ ॥
शास्त्रं सकलवेदानां सारभूतार्थसंग्रहं ।
आचार्यवदनांभोजाद्विज्ञेयं नान्यथा द्विजाः ॥ ९२ ॥ ०

In the fourth chapter the gods, *Lokapālas* and *Ṛishis*, repair to Ayodhyā, to render homage to *Rāma*:

विधिरुद्रादयो देवा आसीना आसनेषु ते ।
इदमूचुर्वचो ऽत्यंतं रामं राजीवलोचनं ॥ २२ ॥
अहो भाग्यमहो भाग्यमद्यास्माकं जगत्पते ।
यत्त्वदक्षयमव्यक्तं पश्यामस्त्वां जगन्मयं ॥ २३ ॥
तपः फलितमस्माकं बहुजन्मार्जितं विभो ।
अद्य नः सफला यज्ञा बहुशो दक्षिणान्विताः ॥ २४ ॥
देवं नारायणं साक्षात्पश्यामस्त्वां नराकृतिं ।
वेदा अपि च वेदांतास्त्वामेव ब्रह्मरूपिणं ॥ २५ ॥
संस्तुवंति यथा नित्यं वंदिनः परमेश्वरं ।
यतो वाचो निवर्तंते ऽप्यप्राप्यमनसा सह ॥ २६ ॥ ०

Solicited by *Śiva*, he then instructs them in the *brahmavidyā*:

गौरीपते प्रवक्ष्यामि तत्त्वं भगवतो मम ।
रहस्यमपि वेदांतसारभूतार्थसंग्रहं ॥ ४४ ॥
सत्यं विज्ञानमानंदं रूपमक्षरमच्युतं ।
गुहायां निहितं ज्योतिरचलं शाश्वतं ध्रुवं ।
तदेव मे परं ब्रह्म रूपं नारायणाभिधं ॥ ४५ ॥
वेद(*r.* वेदांत)वेद्यो ऽस्मि तथैव वेदैः
स्तुतो ऽस्मि नित्यं परिपूर्णकामः ।
ध्येयो ऽस्मि योगीश्वरसिद्धसंघैः
पूज्यो ऽस्मि नित्यं भुवनेषु सर्वैः ॥ ४६ ॥ ० ५३ ॥
मम शक्तिरभिन्नेयं जानकी श्रीश्चिदात्मिका ।
भिन्ने भासति लोके ऽस्मिन्मम माया दुरत्यया ॥ ५४ ॥
अस्या एवांश(?स्य)संभूता यया विश्वं विमोहितं ।
श्रुतिमंडदनादाविर्भूता सांगा सनातनी ॥ ५५ ॥
अयं मे दक्षिणो बाहुः सृष्टिकर्ता पितामहः ।
वामबाहुमदीयस्त्वं विष्णुर्हृदयमेव मे ॥ ५६ ॥ ०

In chapter 5, king *Janaka* is introduced as a pious reverer of his *ācārya Gautama*, special reverence being shown by him to the holy man's shoes (*pādukā*). The king's piety eventually gains for him the *pratyakshadarśanam* of *Nārāyaṇa*, who then divulges to him the mystic science as now proclaimed by *Rāma*; viz.: ch. 6–8. *śrautācāra*; 9. *dattātreya-māhātmyam*; 10, 11. *brahmavidyāmāhātmyam*. In this way the exposition of the *Tantric* science is assigned partly to *Rāma* and partly to *Nārāyaṇa*.

The first part ends:

अनुत्तरब्रह्मतत्त्वरहस्ये श्रुतिसंग्रहे ।
तंत्रे दाशरथीयाख्ये पूर्वार्धः समुदीरितः ॥ १९३ ॥
अत्राचार्यमुखांभोजा[च्छ्रो]क्रमेकं पठन्नपि ।
मृत्वाप्यपि विमुक्तो ऽसौ महापातकराशिभिः ।
प्राप्नोति परमं धाम दुर्लभं दैवतैरपि ॥ १९४ ॥

This volume is dated Saṃvat 1857.

II. The *uttarārdha* (also called *Saubhāgyavidyodaya*), consisting of 45 *adhyāyas*, begins:

ऋषय ऊचुः ।
ऋष्यशृंग महाभाग सर्वज्ञानवतां वर ।
श्रीमदष्टाक्षरीमाहात्म्यं श्रुतं सांगरहस्यकं ॥ १ ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्त्रिशक्तिका ।
साम्राज्यलक्ष्मीः पंचेति साम्राज्यश्रिय ईरिताः ॥ २ ॥
तत्राद्या साम्राज्यलक्ष्मीः श्रीविद्या कथिता त्वया ।
तस्या माहात्म्यमखिलं वद नः करुणानिधे ॥ ३ ॥

DR.RUPAK NATH)

ऋष्यशृंग उवाच ।

इत्युक्त्वंतं नृपतिं रामं त्रिजगतीपतिं ।
प्राह सीतापतिं रुद्रो गौर्या सह जगत्पतिः ॥ ४ ॥

श्रीरुद्र उवाच ।

ब्रह्मतादात्म्यसंसिद्धिहेतुभूतं सनातनं ।
ब्रह्मापरोक्षविज्ञानं रहस्यं भुक्तिमुक्तिदं ॥ ५ ॥

श्रुतं तव मुखांभोजात्सद्यःपातकभंजनं ।
श्रीमदष्टाक्षरीमात्रमाहात्म्यमखिलं श्रुतं ॥ ६ ॥

श्रीविद्या जगतां धात्री सूचिता न प्रकाशिता ।
माहात्म्यमखिलं तस्या वद मह्यं जगत्पते ॥ ७ ॥

श्रीभगवानुवाच ।

यन्नारायणेनोक्तं जनकाय महात्मने ।
माहात्म्यमखिलं शंभो श्रीविद्याया वदाम्यहं ॥ ८ ॥

श्रीनारायण उवाच ।

शृणु राजन्महीपाल सौभाग्योदयनामकं ।
तंत्रे नारायणीये ऽस्मिन्माहात्म्यं सर्वसिद्धिदं ॥ ९ ॥

अहं दाशरथिर्भूत्वा पृष्टो रुद्राय धीमते ।
पुनर्दाशरथीयाख्यं तंत्रं वक्ष्यामि सादरं ॥ १० ॥ ०

This chapter subsequently treats of the three kinds of initiation (*pāśupatī*, *vaishṇavī* and *traipurī dikshā*). Ch. 2–27 deal with the arcana of the science, as revealed by *Dakshiṇā-mūrti* to his consort *Devī*. At the beginning of ch. 2 the usual 64 *Tantras* are enumerated by *Devī*, though not in as correct a form as one might wish.

The section from ch. 28 to the end is also called *Rājarāja*(or *Rājarājeśvarī*)*-vidyāmāhātmya*, consisting first (ch. 28–33) of conversations between *Sumati Jaḍa* and his father, on *Vaishṇava* and *Tantric* rites, and subsequently of a further course of instruction on the part of *Nārāyaṇa*.

It ends :

तंत्रं दाशरथीयाख्यं वेदसारार्थसंग्रहं ।
अत्रैकमपि वाध्यायमर्थज्ञानपुरःसरं ॥ ३७ ॥

पठेद्यः शृणुयाद्वापि विमुक्तः पापराशिभिः ।
प्रयाति परमं धाम सनातनमनुत्तमं ॥ ३८ ॥

ऋष्यशृंगमुखांभोजाच्छ्रुत्वैतत्परमर्षयः ।
मत्वात्मानं परं ब्रह्म रामं नारायणं विभुं ॥ ३९ ॥

ऋष्यशृंगं सनाभाष्य ज्ञात्वा धर्मरहस्यकं ।
कृतकृत्यास्ततो जग्मुः स्वाश्रमान्मुदिताननाः ॥ ४० ॥

इदं तंत्रं महद्गुह्यं तारकं ब्रह्मरूपिणा ।
जानकीपतिना प्रोक्तं जगदानंदहेतुकं ॥ ४१ ॥

इति श्रीमदनुत्तरब्रह्मतत्त्वरहस्ये दाशरथीये तंत्रे वेदसारार्थसंग्रहे उत्तरभागे सौभाग्यविद्योदये राजराजविद्यामाहात्म्ये शास्त्ररहस्यकथनं नाम पंचचत्वारिंशो ऽध्यायः ॥

The copyist has added (? from the original MS.) five partly corrupt *ślokas*, the first and last of which run thus :

श्रीविद्वद्वरमंडलीमुकुटरीराजत्पदांभोरुहो(?)
यस्यासीद्विबुधः पिताऽह(रि)निधिः श्रीरत्नसुंदर्यपि ।
माता कूर्मगिरिश्च जन्मधरणी नामापि वंशीधरो
भारद्वाजकुलोद्भवं(? *r.* कुले) सदारयुपतिः श्रीसुंदरी-
[वल्लभः ॥ १ ॥

शकेंगाग्न्यभूपोन्मिते(1676 = A.D. 1754) श्रावणे मासि कृष्णे च पक्षे तिथौ षष्टिकायां
गुरौ वेदसारं . . . . . तंत्रं
लिलेखेह वंशीधरः श्रीशतुष्ट्यै ॥ ५ ॥
[H. T. Colebrooke.]

DR.RUPNATHJI(DR.RUPAK NATH)

2559, 2560.

1204, 1004. Foll. 271 and 174; size 12½ in. by 4¼ in.; fairly written in Devanāgarī, by two different hands (one of which wrote vol. i., foll. 1–154); 8–10 lines in a page; modern.

Dāśarathīya-tantra, complete; each volume containing one part. [H. T. Colebrooke.]

2561.

1442a. Foll. 134 (numbered 133; no. 108 being double); size 12¼ in. by 4¼ in.; indifferent, careless, modern writing; ten lines in a page.

Prapañcasāra, a work on the arcana of *Tantric* science and worship, in 36 *paṭalas*; by a writer who signs himself *Ācārya*.

Rather incorrect.

It begins (somewhat corrected):

अकवरजयपाद्यैः स[ा]मभिवैर्णवगैर्
विरचितमुखवाहा पादमध्याख्यहृल्का(?)।
सकलजगदधीशा शास्त्रज्ञा विश्वयोनिर्
वितरतु परिपुष्टिं चेतसः शारदा वः ॥ १ ॥

अथाभवन्ब्रह्महरीश्वराख्याः
पुरा प्रधानात्प्रलयावसाने।
गुणप्रभिन्ना जगतो ऽस्य सृष्टि-
स्थितिक्षयस्यर्थनिविष्टचेष्टाः ॥ २ ॥

स्वनिष्पत्तिं च कृत्यं च ते विचिंत्य यमाविदन्।
वक्त्रारमजमव्यक्तरूपं मायिनं विभुं ॥ ३ ॥

मूर्त्या भासेन दुग्धाब्धौ शुभ्रशंखसमाकुले।
मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥ ४ ॥

उद्यदादित्यकिरणप्रशांतशिशिरोदये।
पूर्णचंद्रकरामर्शप्रतिबुध्यजनाशये ॥ ५ ॥° ७ ॥

नीलोत्पलदलप्रख्यां नीलकुंचितमूर्धजां।
अष्टमीचंद्रविंबाभललाटाभायतभ्रुवं ॥ ६ ॥

रक्तारविंदनयनामुन्नसामरुणाधरां।
मंदस्मिताधरमुखीं लसन्मकरकुंडलां ॥ ९ ॥

It ends:

प्रतिमंत्र्य च तां वहतो गुलिकाम्
अमरैरपि दर्शनमस्य भवत्।
इह सिद्धिरधास्य भवत्यखिला
वडवामुखपुष्करपानमुखा ॥ ७० ॥

इति सिद्धमुनींद्रयक्षविद्या-
धरगंधर्वासुराप्सरोभिः।
प्रतिभाषितमुन्नमं विधानं
गदितं पुरुषोन्नमस्य विष्णोः ॥ ७१ ॥

इति जपहुतपूजाध्यानकैः श्रीधरं यो
भजति स तु समग्रां संपदैश्वर्यलक्ष्मीं।
अधरकृतविपक्षीं प्राप्य लोकैकवंद्यो
व्रजति पदमनंतं लोकवंद्यस्य विष्णोः ॥ ७२ ॥

इत्याचार्यविरचिते प्रपंचसारे पुरुषोन्नममंत्रकथनं नाम षट्त्रिंशः पटलः ॥

Only in a few colophons the contents of the respective chapters are indicated.

[H. T. Colebrooke.]

2562.

2783a. Foll. 77; size 11 in. by 4½ in.; fairly good Devanāgarī writing; twelve lines in a page.

Prapañcasāravivaraṇa, a commentary on the foregoing work, by *Jñānasvarūpa*.

Paṭalas 1–16.

The first leaf, written in a different hand, contains a page (not the first) of a commentary on some other work.

Fol. 2 commences in the comment on *śloka* 8: नीलपद्मदलतुल्यां। नीला वक्रा केशा यस्यास्तां। अर्धचंद्रतुल्यमालां। दीर्घभ्रुवं ॥ ६ ॥

Colophon: इति ज्ञानस्वरूपविरचिते प्रपंचसारविवरणे षोडशः पटलः ॥ संवत् १७८५ आश्विनमासे शुक्लपक्षे चतुर्थीबुधवासरे लो° काश्यां मध्ये ॥

[Coll. of Fort William.]

2563.

1442c. Foll. 11; size 12¼ in. by 4 in.; careless, modern Devanāgarī writing; eleven lines in a page.

Mahācīnakramācāra, or *Cīnācārasāratantra*—also called *Ācārasāratantra*, or simply *Ācāratantra*—a treatise, in 7 *paṭalas*, on a form of (*kaula*) *Śakti* worship, represented as being derived from *Vishṇu-Buddha*, and from China; the illusion of the Chinese origin being kept up by the worshipper being invested during his devotions with twigs of the *mahācīnadruma*.

Rather incorrect.

It begins (somewhat corrected): देव्युवाच।

महाचीनक्रमाचारः सूचितो न प्रकाशितः।
इदानीं कथयेशान यदि स्नेहो ऽस्ति मां प्रति ॥ १ ॥

इति पृष्टः पुरा देव्या कैलासशिखरे हरः।
चिंतयामास मनसा किंचिदाकुलितेक्षणः ॥ २ ॥

इयमस्कं(?कुं)ठिता भूयो यन्मां प्रेरयति प्रिया।
चीनाचारक्रमं वक्तुं तत्प्रकाश्यं कथं मया ॥ ३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

इति गुप्ततरः सो ऽयमाचारः सिद्धिदायकः ।
स्त्रीणां चंचलया बुद्ध्या कथं गोप्तुं हि शक्यते ॥ ४ ॥

इति संचिंत्य मनसा पुनराह महेश्वरी ।
महाचीनक्रमाचारं ब्रूहि मे परमेश्वर ॥ ५ ॥

शिव उवाच ।
अलं यत्नैरलं पत्नैरलै(!) म[हे]श्वरि ।
चीनाचारक्रमं श्रोतुं विरक्ता भव पार्वति ॥ ६ ॥

स एव पर[मा]चारो न प्रकाश्यः कदाचन ।
गुह्याद्गुह्यतरः साक्षात्तत्त्वज्ञानमयः शिवे ॥ ७ ॥

स्त्रीस्वभावेन भवति शश्वन्मां परिपृच्छसि ।
लक्ष्यवारं रिचासि(!) तथापि श्रोतु[मि]च्छसि ॥ ८ ॥

श्रीपार्वत्युवाच ।
यदि चीनक्रमाचारं न मे कथयसि प्रभो ।
प्राणत्यागं करिष्यामि पुरतस्ते न संशयः ॥ ९ ॥

इत्युक्तः स तदा योऽसौ रुद्रः कारुणिको महान् ।
महाचीनक्रमाचारं गदितुं संप्रचक्रमे ॥ १० ॥

सर्वदा गोप्य एवायमाचारः सिद्धिदायकः ।
तवानुरोधादेवाहं कथयामि समासतः ॥ ११ ॥

ब्रह्मणो मानसः पुत्रो वशिष्ठो ऽतीव संयमी ।
तारामाराधयामास पुरा नीलाचले मुनिः ॥ १२ ॥

जपन्स तारिणीं विद्यां कामाख्यायोनिमंडले ।
रानयामास वर्षाणामयुतं ध्यानतत्परः ॥ १३ ॥

वर्षे ध्यानेन तत्रैव चिरमाराधये(?०न्) इति ।
नानुग्रहं चकारासौ तारा संसारतारिणी ॥ १४ ॥

अथासौ पितरं गत्वा ब्रह्माणं परमेष्ठिनं । ०

Brahman then eulogizes the power of *Tārā* which alone enabled him and his divine co-adjutors to create, rule and destroy the world. *Vasishṭha* subsequently tries to conciliate her, and not being successful, he becomes enraged :

चचाल वसुधा सर्वा सशैलवनकानना ।
हाहाकारो महानासीद् देवदेवेषु सर्वतः ॥ ३९ ॥

ततो बभूव पुरतस्तारा संसारतारिणी ।
वशिष्ठस्तां समालोक्य शशापातीव दारुणः ॥ ४० ॥

तदा देवी वशिष्ठेन शप्ता न फलदा क्वचित् ।
चीनाचारं विना नैव प्रसीदति कदाचन ॥ ४१ ॥

मदीयाराधनाचारं बौद्धरूपो जनार्दनः ।
एक एकं विजानाति नान्यः कश्चन तत्त्ववित् ॥ ४२ ॥

उवाच साधकं श्रेष्ठं वशिष्ठं मुनिनायशा(? कं or यिका) ।
रोषेण दारुणमनाः कथं मामशपद्भवान् ॥ ४३ ॥ ० ४४ ॥

तद्बुद्धरूपिणो विष्णोः सन्निधिं याहि संप्रति ।
तेनोपदिष्टाचारेण समाराधय सुव्रत ॥ ४५ ॥

तदैव सुप्रसन्ना स्यां त्वयि वत्स न संशयः ॥

इत्याचारतंत्रे (thus also in *pat.* 4.) प्रथमपटलः ॥

Paṭala II.

ततः प्रणम्य तां देवीं वशिष्ठो ऽसौ महामुनिः ।
जगामाचारविज्ञानेच्छया बुद्धरूपिणं ॥ १ ॥

ततो गत्वा महादेशे चीने स मुनिपुंगवः ।
ददर्श दिव्यवत्यार्श्वे साधकेश्वरसेवितं ॥ २ ॥

सलक्षस्तनभारेण रूपयौवनशालिना ।
मदिरामत्तनेत्रेण विलासोल्लासितेन च ॥ ३ ॥

शृंगाररसवेषेण जनमोहनकारिणा ।
मायालज्जाविहीनेन देवीध्यानपरेण च ॥ ४ ॥

कामिनीनां सहस्रेण परिवारितमीश्वरि ।
मदिरापानसंजातरक्तमंथरलोचनं ॥ ५ ॥

दूरादेव विलोक्यैनं वशिष्ठो बुद्धरूपिणं ।
विस्मयेन समाविष्टः स्मरन्संसारतारिणीं ॥ ६ ॥

किमिदं क्रियते कर्म विष्णुना बुद्धरूपिणा ।
वेदवादविरुद्धो ऽयमाचारः संमतो मया ॥ ७ ॥

इति चिंतयतस्तस्य वशिष्ठस्य महात्मनः ।
आकाशवा[णी] प्राहाशु मैवं चिंतय सुव्रत ॥ ८ ॥

आचारपरमो योऽयं तारिणीसाधने मुने ।
एतद्बिरुद्धाचारस्य मतेनासौ प्रसीद[ति] ॥ ९ ॥

यदि तस्याः प्रसादं त्वमचिरेणाभिवांछसि ।
एतेन चीनाचारेण तदा मां भज सुव्रत ॥ १० ॥

आकाशवाणीमाकर्ण्य रोमांचितकलेवरः ।
वशिष्ठो दंडवद्भूमौ पपातातीव हर्षितः ॥ ११ ॥

अथोत्थाय[ा]चिरेणासौ कृतांजलिपुटो मुनिः ।
जगाम विष्णोः सन्निधिं बुद्धरूपस्य पार्वति ॥ १२ ॥

अथासौ तं समालोक्य मदिरामदविह्वलः ।
प्राह बुद्धः प्रसन्नात्मा किमर्थं त्वमिहागतः ॥ १३ ॥

अथ बुद्धं प्रणम्याह भक्तिनम्रो मुनीश्वरः ।
जगुः स(?) तारिणीदेव्या निजाराधनहेतवे ॥ १४ ॥

DR.RUPANATHJI(DR.RUPAK NATH)

तच्छ्रुत्वा भगवान्बुद्धस्तत्त्वज्ञानमयो हरिः ।
वशिष्ठं प्राह तज्ज्ञाने चीनाचाराधिकारवान् ॥ १५ ॥

अप्रकाश्यो हिमाचारस्तारिण्याः(!) सर्वदा भवेत् ।
तव भक्तिवशादस्मिन्न(!) प्रकाश्य[ः] कदाचन ॥ १६ ॥

अथाचारविधिं वक्ष्ये देव्याः सर्वसमृद्धिदं ।
यस्यानुष्ठानमात्रेण भवाब्धौ न निमज्जसि ॥ १७ ॥ ० १८ ॥

स्नानादि मानसं शौचं मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं चार्पणादिकं ॥ १९ ॥

सर्व एव शुभः कालो नाशुभो विद्यते क्वचित् ।
न विशेषो दिवा रात्रौ न संध्यायां दिवा निशि ॥ २० ॥

वस्त्रासनस्थानगेहे देहस्पर्शादिवारिणः ।
शुद्धिं न चाचरेदत्र निर्विकल्पं मनश्चरेत् ॥ २१ ॥

नात्र शुद्ध्याद्यपेक्षास्ति नापि मित्रादिदूषणं ।
सर्वदा पूजयेद्देवीमस्नातशवभोजनः ॥ २२ ॥

महानिशि शुचौ देशे बलिं मंत्रेण दापयेत् ।
स्त्रीद्वेषो नैव कर्तव्यो विशेषात्पूजयेत्स्त्रियः ॥ २३ ॥

तासां प्रहारो निंदा च कौटिल्यमप्रियं तथा ।
सर्वदा नैव कर्तव्यमन्यथा सिद्धिरोधकृत् ॥ २४ ॥

स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं ।
स्त्रीकुलेषु सदा भाव्यं मनसा स्वस्त्रियामपि ॥ २५ ॥

तद्वस्त्राद्रृचितं पुष्पं तद्वस्त्राद्रृचितं जलं ।
तद्वस्त्राद्रृचितं द्रव्यं महादेव्यै निवेदयेत् ॥ २६ ॥

महाचीनद्रुमलतावेष्टितः साधकोत्तमः ।
रात्रौ यदि जपेन्मंत्रं दुर्लभं तस्य किं भवेत् ॥ ॥ २७ ॥

महाचीनद्रुमलतावेष्टनेन च यत्फलं ।
तस्यापि षोडशांशस्य कलां नार्हंति [ते] शवाः ॥ २८ ॥

शवाशनादिकफलं लतागेहप्रवेशनं ।
श्मशानालयमागत्य मुक्तकेशो दिगंबरः ॥ २९ ॥ ० ३० ॥

स तीर्थसेवी पीठेषु स निवासी च सर्वदा ।
व्रती स सोमपायी स सयज्ञः सर्वमन्युषु ॥ ३१ ॥

स वैष्णवः स शैवश्च स सौरः स च गाय[न]ः ।
महाचीनक्रमाचारे तारिणीं यः सदा भवेत् (*r.* भजेत्) ॥ ३२ ॥

इत्याचारसारतंत्रे द्वितीयः पटलः ॥

P. III. शिव उवाच ।

इति तस्य वचः श्रुत्वा हरेर्बुद्धस्वरूपिणः ।
वशिष्ठस्तं पुनः प्राह कृतांजलिपुटो मुनिः ॥ १ ॥

वशिष्ठ उवाच ।

भगवन्देव देवेश तत्त्वज्ञानमय प्रभो ।
महाचीनक्रमाचारः सूचितो भवता मम ॥ २ ॥

प्रधानद्वयमेवास्मिन् मदिरा यो[पि]देव च ।
अनयोः किं प्रधानं तद्ब्रूहि मे परमेश्वर ॥ ३ ॥

बुद्ध उवाच ।

एतस्मिन्परमाचारे तुल्यमेव द्वयं मुने ।
प्रधानं योषितः किंतु देवानां च न संशयः ॥ ४ ॥

यतो हि योषितां देहे सदैवाधिष्ठिता शिवा ।
तस्मात्तं(०त्तु) विधिवत्पूज्या(०जा) तासां प्राधान्य[म्] [उच्यते ॥ ५ ॥

वशिष्ठ उवाच ।

ब्रूहि देव विधानं च सर्वदेवमयप्रभो ।
यथा योषित्सु तत्पूजा कृता साधकसत्तमैः ॥ ६ ॥

सर्वेष्वेव पीठानां प्रधानं योनिपीठकं ।
तत्र संपूज्यतां देवी कथिते(?०नी) च प्रसीदति ॥ ७ ॥ ०९ ॥

नटिका पालिनी वेश्या रजकी नापितांगना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥ १० ॥

मालाकारस्य कन्या च नव कन्याः प्रकीर्तिताः ।
अथवा सर्वजातीनां विदग्धां लक्षणांवितां ॥ ११ ॥

आनीयचतमां (?० यान्यतमां) बुध्यामेतासामेव नायिकां ।
सुंदरीं यौवनोन्मत्तां निर्लज्जां चारुहासिनीं ॥ १२ ॥

कृत्वा दिगंबरीं तां च गंधकुंकुमचंदनैः ।
अनुलिप्तां मुक्तकेशीं ततस्तद्योनिमंडले ॥ १३ ॥

गुरुशक्तिं समारभ्य पूजयित्वा षडंगकं ।
पीठपूजां विधायाथ तन्मध्ये पूजयेच्छिवां ॥ १४ ॥

तत्र चावाहनं नैव जीवन्यासो न वा मुने ।
उपचारैः पूजयित्वा अर्घ्यं दत्त्वा ततः पुनः ॥ १५ ॥

जललिंगे भैरवं च पूजयित्वा महेश्वरं ।
गंधासवाक्षतैः पुष्पैः होमं कुर्यात्ततः परं ॥ १६ ॥ ० १९ ॥

पूजाकालं विना नैव सुरा पेया च साधकैः ।
आयुष्याद्धीयते दृष्ट्वा पीत्वा च पशुतां व्रजेत् ॥ २० ॥

सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत्सुरां ।
अन्यत्र कामतः पीत्वा प्रायश्चित्ती भवेन्नरः ॥ २१ ॥

Then a story is told of *Śukra Bhārgava* having once uttered a curse against *Devī Vāruṇī*, the removal of which could only be effected by the *Sautrāmaṇī* and the *kulācāra*.

DR.RUPNATHJI(DR.RUPAK NATH)

मौक्तामण्यां कुलाचारे सुरां पीत्वा स्खलेन्मुहुः ॥ ३२ ॥
पतितस्य तु तस्याङ्गे लगंति यदि रेणवः ।
तावत्या रेणुसंख्यया देवीलोके महीयते ॥ ३३ ॥
पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्मो(!) न विद्यते ॥ ३४ ॥
पीत्वालिंग्य कुलाचारे प्रनष्टां यौवनोन्मतां(?०दां) ।
कोटिजन्माजितं पापं तत्क्षणादेव नाशयेत् ॥ ३५ ॥
पीत्वा पीत्वा जपित्वा च मुक्तः कोटिकुलैः सह ।
ब्रह्मलोके वसेद् देवि सत्यं सत्यं न संशयः ॥ ३६ ॥
तत्रैव व्याप्तमाप्नोति न पुनर्जायते भुवि ।
पीत्वा च पूजयित्वेशोमोशत्वं लभते ध्रुवं ॥ ३७ ॥ ० ३८ ॥
जायते साधकः श्रेष्ठो महाभोगी महासुखी ।
पीत्वा भोगान्भोजयित्वा सोऽहंहंसस्ततः परं ॥ ३९ ॥
स एव जायते वीरो जीवन्मुक्तो जगत्त्रये ।
चिरंजीवो जरामुक्तो विमुक्तः सर्वपातकैः ॥ ४० ॥ ० ४१ ॥
इति ते कथितं दिव्यं शुक्रशापविमोचनं ।
इति ते कथितं दिव्यं यथा पूज्या दिगंबरा ॥ ४२ ॥
पूजयित्वा महादेवि मुच्यते सर्वपातकैः ।
एवं देवीमर्चयित्वा किमसाध्यं जगत्त्रये ॥ ४३ ॥ ० ४५ ॥
आरभ्य शुक्लप्रतिपद्यावत्पंचदशी भवेत् ।
प्रत्यहं पूजयेद्यस्तु तिथिसंख्या दिगंबरीः ॥ ४६ ॥
मंत्रसिद्धिर्भवेत्तस्य सत्यं सत्यं न संशयः ।
वीरसाधनकर्माणि दुःखसाध्यानि केवलं ॥ ४७ ॥
सत्तमं साधनं श्वेतत्तव स्नेहात्प्रकाशितं ।
गोपनीयं प्रयत्नेन पुत्रेभ्यो ऽपि न दर्शयेत् ॥ ४८ ॥
इत्येवं कथितस्तुभ्यं पूजाविधिरनुत्तमः ।
साधनं सर्वथा चैव गोपयेन्मातृजारवत् ॥ ४९ ॥
इत्याचारसारतंत्रे तृतीयः पटलः ॥

P. IV. *Buddha*, having given directions to *Vasishṭha* regarding vessels and appliances required for worship, eulogizes the occult science, *e.g.*

सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परं ।
वैष्णवात्परमं शैवं शैवाद्दक्षिणमुत्तमं ॥ ३२ ॥
दक्षिणात्परमं वामं वामात्सिद्धांतमुत्तमं ।
सिद्धांतात्परमं कौलं कौलात्परतरं न हि ॥ ३३ ॥

P. V. sets forth the eightfold rule of conduct (*samayāshṭaka*); and relates how *Brahman*, being puzzled at seeing the *Munis*, in the *Dāruvana*, practising the enormities of the *kulācāra*, betakes himself to *Vaikuṇṭha* to consult *Vishṇu*, who then commends the sages' doings as conducive to eternal bliss.

P. VI. teaches the *rahasyam*, consisting in the *pañcatattva*, viz.: मद्यं मांस्यं तथा मत्स्यं मुद्रा मैथुनमेव च; the last of which is then further enlarged upon.

P. VII. The *Asura Vala* defeats the gods, and the *Munis* with *Indra* appeal for help to *Vishṇu*, who refers them to *Śiva*. The latter then teaches *Śakra* how to prepare the *Trailokyajayā*, the elixir of victory. He first enumerates its 21 names, or rather descriptive epithets such as *siddhimūlikā*, *jñānasamvid*, *yogadā*, *yogamārgapradarśinī*, *brahmasambhūtā*, *vijayapradā*. Then the recipe:

श्वेतरक्तपीतकृष्णपुष्पभेदाश्चतुर्विधाः ।
श्वेतपुष्पा ब्राह्मणी च क्षत्रिया रक्तपुष्पिका ॥ ३४ ॥
पीतपुष्पा तु वैश्या स्याच्छूद्रा तु कृष्णपुष्पिका ।
आहृत्य पत्राण्येतासां विजानीयात्प्रयत्नतः ॥ ३५ ॥
मार्जितानि घृतैरेव चूर्णितानि शिलातले ।
त्रिकटु त्रिफला शृंगी कुष्ठा धान्याकसंभवा ॥ ३६ ॥
शटी तालीसपत्रं च षट्फलं नागकेसरं ।
यवानीद्वयमेपीरकद्वयमेव च(!) ॥ ३७ ॥
एतानि समभागानि पुष्करीद्राणि(!) चूर्णयेत् ।
गृहीत्वा चूर्णमेतत्तु संचिचूर्णं तु तत्समं ॥ ३८ ॥
उभयोस्तु समं दत्त्वा सिता(?) तन्मिश्रयेद्दृढं ।
निश्रयित्वा चतुर्थांशसमं मधु घृतं तथा ॥ ३९ ॥
पुनः शिलातले पिष्ट्वा त्रिसगंधौ(!) प्रवर्तयेत् ।
रूर्णपात्रे [तु] पुरतः स्थापयित्वा ततः क्रमात् ॥ ४० ॥
चतुर्भिर्नेनुभिस्तस्याः शोधनं समुपाचरेत् ।
निवेद्य तत्र पाण्यग्रं यथामंत्रं विशोधयेत् ॥ ४१ ॥
संविद्दे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ।
भैरवाणां च दत्त्वा त्वं पवित्रा भव सर्वदा ॥ ४२ ॥

DR.RUPNATHJI (DR.RUPAK NATH)

It ends:

एतत्ते कथितं सर्वं विजयाकल्पमुत्तमं ।
प्रसादादचिरादन्यं(!) वांछितं ते भविष्यति ॥ ७७ ॥
इत्यूक्तः स मया शक्रो निभवानंदमादेवैः(?विं०or निर्भरा०)।
भक्त्या परमया युक्तस्तत्कर्तुमुपचक्रमे ॥ ७८ ॥
संवत्सरं प्रतिदिनं प्रयतस्त्रिकालं
शक्रो निषेव्य समया विधिना वशिष्ठं ।
जित्वा वलासुरमभू[द्] दशदेवराजः
संप्राप्य विश्वशमनस्य सलभ्यकामः(!) ॥ ७९ ॥
एतद्रहस्यगदितं परमं निगूढं
कुत्रापि नैव कथनीयमिदं कदाचित् ।
उत्कंठया तव मया ननु पूर्ववृत्तं
देवे(!) त्वयापि विधिना प्रविधीयतां तत् ॥ ८० ॥

इति चीनाचारसारतंत्रे ह[र]गौरीसंविदासंमतिनाम सप्तमः पटलः पूर्णमस्तु ॥

See Rāj. Mitra, Notices, i., p. 268, where an *Ācārasāratantra* in 7 *paṭalas* is described, the MS. being, however, defective at the beginning, and concluding with a *mandākrāntā* verse (वामे वामा रमणकुशला दक्षिणे चारुपात्रं ०) not contained in the present MS.

[H. T. Colebrooke.]

2564.

323. Foll. 79; size 12 in. by 4 in.; modern Bengalī writing, by three different hands; seven lines in a page.

Durgābhaktitaraṅgiṇī, or *Durgotsavapaddhati*, a manual of the worship of *Durgā*, composed, by *Vidyāpati*, under the auspices of *Bhairavasiṃha*, brother(?) of *Vīrasiṃha*, king of Mithilā.

It begins (with the numbers supplied):

अभिवाञ्छितसिद्धयै वन्दितो यः सुरैरपि ।
सर्वविघ्नभिदे तस्मै गणाधिपतये नमः ॥ १ ॥

भक्त्या नम्रसुरेन्द्रमौलिमुकुटप्राग्भारतारस्फुरन्-
माणिक्यद्युतिपुञ्जरञ्जितपदद्वन्द्वारविन्दश्रियः ।
देव्यास्तत्क्षणदैत्यदर्पदलना सम्वित्(?सच्चित्-)प्रकृष्टामर-
स्वाराज्यप्रतिभूतधिष्णुकरणा(?r. विष्णुकरुणा)गम्भी-
[रदृक् पातु नः ॥ २ ॥

स्वस्ति श्रीनरसिंहदेवमिथिलाभूमण्डलाखण्डलो
भूभृन्मौलिकिरीटरत्ननिकरप्रत्यर्पितांघ्रिद्वयः
आपूर्वापरदक्षिणोत्तरगिरिप्राग्प्रार्थिवाभ्यधिक-
स्वर्णश्रोणिमणिप्रदानविजितश्रीकर्णकल्पद्रुमः ॥ ३ ॥

विश्वख्यातनयस्तदीयतनयः प्रौढप्रतापोदयः
संग्रामाङ्गनलब्ध[वैरि]विजयः कीर्त्याप्तलोकत्रयः ।
मर्यादानिलयः [प्र]कामविनयः प्रज्ञा[प्र]कर्षाश्रयः
श्रीमद्भूपतिधीरसिंहविजयी राजत्यमोघक्रियः ॥ ४ ॥

शौर्यावर्जितपञ्चगौडधरणीनाथोपनम्रीकृता-
[ऽने]कोद्दुङ्गतरङ्गसङ्गभ(?त)सितच्छत्राभिरामोदयः ।
श्रीमद्वैरवसिंहदेवनृपतिर्यस्यात्म(?r. नु)जन्मा जय-
त्याचन्द्रार्कमखण्डकीर्तिसहितः श्रीरूपनारायणः ॥ ५ ॥

[देवीभक्तिपरायणः श्रुतिमुखप्रारब्धपारायणः
संग्रामे रिपुराजकंसदलनप्रत्यक्षनारायणः* ।]
विघ्नेषां हितकाम्यया नृपवरो ऽनुज्ञाप्य विद्यापतिं
श्रीदुर्गोत्सवपद्धतिं स तनुते दृष्ट्वा निबन्धस्थितिं ॥ ६ ॥

तत्रादौ देवीगृहनिर्माणं । रत्नाकरादिनिबन्धेषु देवीपुराणे ।०

The work consists of two chapters (*taraṅga*), the first of which (ending fol. 32*a*) treats of the worship of the goddess generally, and the rites prescribed on different days, whilst the second treats of the *Durgotsava*.

It is largely compiled from *Purāṇas* (esp. the *Devī*, *Kālikā* and *Bhavishya*). Of other authorities may be mentioned: *Gauḍanibandha* (ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणं । सप्तम्यां मूलपूजायां पत्रिकायां प्रवेशनं ॥ ०), foll. 12*a*, 16*b*; *Durgotsavādhikāre Bhojarājaḥ* (उमाया नवमी प्रोक्ता हरिस्यतिथिर्मम्मेष्टमीद्वयोरैक्ये(!) महापुण्या उमा माहेश्वरी तिथिः ॥) fol. 13*a*; *Laghuvyāsa* (वेदाभ्यासादवाप्नोति पुरुषार्थचतुष्टयं । ०), fol. 14*b*; *Śāradātilaka*, fol. 36*a*; *Śilpaśāstra* (नवपञ्चात्मके स्थाने पूज्या दुर्गा सुमूर्तितः । ०) fol. 18*b*; *Śivarahasya*, fol. 38*a*, *b*, etc.

---

* This hemistich, omitted by the MS., is supplied from the text given by Mr. G. A. Grierson, Ind. Ant. xiv., p. 192; and from Rāj. Mitra, Notices, v., p. 192, where, however, our *ślokas* 4 and 5 are omitted.

DR.RUPNATHJI(DR.RUPAK NATH)

It ends:

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

इति श्रीदुर्गाभक्तितरङ्गिण्यां द्वितीयप्रयोगतरङ्गः ॥

कारुण्यैकवशंवदा प्रणमतो बाला निरुध्यते
भीतिभ्यो घनपङ्कलिप्तवपुषः प्रक्षालयत्यम्बिका
संसारे स्खलतः समुद्धरति या मोहान्धकारश्रेत(?°रात्र
[तान्)
साध्याद्वः शरणागतार्थिशमनी देवी जगत्पाविनी ॥

भूपश्रीभवसिंहवंश[?तिलकः] श्रीदर्पनारायण[:]
स्नात्वा(?) नन्द[न]नन्दनक्षितिपतिश्रीवीर(r. धीर)-
[सिंहः कृती ।
शक्रश्री(:)सहभूरुपेन्द्रमहिमश्रीभैरवक्ष्माभुजो
दुर्गाभक्तितरङ्गिणी कृतिरियं तस्यास्तु सत्प्रीतये ॥

मर्यादासुनिधिः ∪ – ∪∪∪ – प्रौढप्रतापावधिः
सद्यः सङ्गरसङ्गरङ्गविजयश्रीलब्धदोःसन्निधिः ।
यस्य धीरमुदुमुद्रयशसो रामस्य सौमित्रिवत्
धौरणीमण्डलमण्डनो विजयते श्रीचन्द्रसिंहो ऽनुजः ॥°

According to the genealogical indications given by the author himself, in several of his works, as well as to the records of the *Maithila* genealogists — cf. J. Beames, Ind. Ant., iv., p. 299 seq.; G. A. Grierson, Maithilī Chrestomathy (extra number to Journ. As. Soc. Beng. 1882); and in Ind. Ant., xiv., p. 182 seq.— *Vidyāpati*, the popular poet of Mithilā or Northern Behar, flourished in the 15th century. The whole line of Mithilā kings and queens (during the reigns of several of whom the poet composed his works), is given by the native records as follows:

[I. *Rājā Paṇḍita Kāmeśvara Ṭhākur*,–his son

II. *Bhogeśvara Ṭhākur*,–his brother]

III. *Bhava Siṃha* (*Bhaveśvara*) succeeded in 1348 A.D.;–his son

IV. *Deva Siṃha*, succ. 1385;–his son

V. *Śiva Siṃha* (*Rūpa Nārāyaṇa*), succ. 1446;–his queen

VI. *Lakhimā Devī*, succ. 1449;–

VII. *Viśvāsa Devī*, succ. 1458;–

VIII. *Nara Siṃha* (*Darpa Nārāyaṇa*), succ. 1470;–his son

IX. *Dhīra Siṃha* (*Hṛidaya Nārāyaṇa*), succ. 1471;–his brother(?)

X. *Bhairava Siṃha* (*Hari Nārāyaṇa*), succ. 1506;–his son

XI. *Rāma Bhadra* (*Rūpa Nārāyaṇa*), succ. 1520;–his son

XII. *Kaṃsa Nārāyaṇa* (*Lakshmīnātha*), succ. 1532.

Under *Śiva Siṃha* (v.) the author wrote his *Purushaparīkshā*, in the final verses of which (Raj. Mitra, v., p. 245) he states that the king's father, *Deva Siṃha*, had a lake made at *Saṅkurī*, and that his grandfather, *Bhava Siṃha*, was burnt on the *Vāgvatī* along with two wives. Under *Viśvāsa Devī* the author composed his *Gaṅgāvākyāvalī* (Oxf., no. 708; R. M., iii., p. 235), and his *Śaivasarvasvasāra* (R. M., vi., p. 2). From the introduction to the latter work it clearly appears that *Viśvāsa Devī* was the wife of *Padma Siṃha*, younger brother of *Śiva Siṃha*, whilst the Maithila records (if rightly read) would seem to make her the first of the six wives of *Śiva Siṃha*. We may then assume that *Śiva Siṃha*, having died without issue, was succeeded by his queen *Lakhimā Devī*, and the latter by *Viśvāsa Devī*, the wife of the king's (deceased) brother. This branch of the line having become extinct with *Śiva Siṃha* (and *Padma Siṃha*), the throne now fell to their cousin (VIII.) *Nara Siṃha* (*Darpa Nārāyaṇa*), eldest son of *Hari Siṃha* (or *Hara Siṃha*), younger brother of (IV.) *Deva Siṃha*. Under *Nara Siṃha* (or *Darpa Nārāyaṇa*, as he is only called in the introductory verses), *Vidyāpati* wrote his *Vibhāgasāra* (R. M., vi.,

DR RUPNATHJI(DR.RUPAK NATH)

p. 67), whilst for his queen, *Dhīramati* (also called *Dhīrā* or *Hīrā*, Oxf. Cat., no. 718), he composed the *Dānavākyāvalī* (R. M., v., p. 137; Bhandarkar, Rep., p. 352). This king was succeeded by his eldest son (IX.) *Dhīra Siṃha* (*Hṛidaya Nārāyaṇa*), and he by his brother (X.) *Bhairava Siṃha* (*Hari Nārāyaṇa*), for whom (possibly still in the reign of the elder brother) *Vidyāpati* composed the work now under notice. In the last of the final verses the author also mentions a younger brother of the two kings, called *Candra Siṃha*, whom, together with a fourth brother, the genealogical chart published by Mr. Grierson (Ind. Ant., xiv., p. 196) makes the son of *Nara Siṃha* by a second wife. This *Candra Siṃha* would seem to be the Maithila prince under the auspices of whose wife, *Lakhimā Devī*, *Miśarūmiśra's Vivādacandra* (Oxf. Cat., no. 718) was composed. This king's grandfather *Harasiṃha*, accordingly was entirely different from the *Harasiṃha* (or *Hari Siṃha*) *Deva* who, residing at Simrāon (Samaragrāma), was conquered, in 1322, by *Tughlak Shāh*, and, in 1324, founded a new dynasty in Nepal (S. Cat., no. 1390).

The jurist *Vācaspatimiśra* wrote his *Cintāmaṇi* under the patronage of *Harinārāyaṇa* of Mithilā, and his *Dvaitanirṇaya* under the auspices of *Jayā*,* queen of *Bhairava* (cp. Prof. Jolly, Zeitsch. d. D. M. G., xlvi., p. 274), and his *Śrāddhakalpa* (Cat. no. 1700) under *Rāmabhadra Rūpanārāyaṇa*. As *Bhairavasiṃha Harinārāyaṇa* did not come to the throne till 1506 A.D., *Vācaspatimiśra's* date has to be put more than a hundred years later than has hitherto been assumed.

Whether the author of the present work and those mentioned above is really identical with the popular poet *Vidyāpati* (or *Bidyāpati*) seems to me far from certain. Mr. Grierson (I. A., xiv., p. 190) has published the text and translation of a copper-plate grant, dated Saṃv. 1455, Śaka 1321, Lakshm.-Saṃv. 283 (A.D. 1399), said to be in the possession of the poet's descendants, by which "the great *Paṇḍit Śrī-Vidyāpati Ṭhakkura*, glorious as a new *Jayadeva*," is presented by king *Śiva Siṃha* with the village of Bisapī (the modern Bishpī). But, even supposing that *Śiva Siṃha* might have been appointed *yuvarāja* by his father more than 46 years before his father's death, it seems strange that there should be no Sanskrit works of the poet prior to the *Purushaparīkshā*; and Mr. Beames's suggestion, that there were probably two different writers of the name, seems to me to deserve serious attention. It is also desirable that the grant referred to should be carefully examined.

Whilst the author of the present and the other works nowhere gives any indication regarding his own ancestry, the poet *Vidyāpati* is stated to have been the son of *Gaṇapati*, son of *Jayadatta*, son of *Dhīreśvara*, son of *Devāditya*, son of *Karmāditya*, son of *Harāditya*, son of *Vishṇuśarman*, who is said to have lived at Bisapī.

[H. T. COLEBROOKE.]

* She is styled (Oxf. Cat., no. 648) the mother of *Purushottama*. As the identification of the kings themselves can hardly be doubted, *Purushottama* would seem to have been another name which *Rāmabhadra* (or his brother *Garuḍa Nārāyaṇa*) had in his younger days.

2565.

1259c. Foll. 42; size 8½ in. by 5 in.; fairly good, clear Devanāgarī writing; 12–14 lines in a page.

Yogasārasamuccaya, also called (or forming part of the) *Akulāgama-mahātantra*, in ten

DR.RUPNATH JI(DR.RUPAK NATH)

chapters (*paṭala*), consisting of conversations between *Śiva* and *Pārvatī* on the subject of *Yoga* and the duties of thoso who practise it. [A.]

Amongst the principal duties of the *Yogins* which can be performed by all classes and castes, the study of the *Vedānta* figures as one; so that under *Yoga* in this connection we have to understand contemplation of the inner self and meditation on metaphysical problems generally, rather than a particular school of philosophy.

It begins:

आदौ यस्तु त्वया नाथ मुनिसिद्धैरनेकधा ।
अनंतशास्त्रमायादौ कथितः परमेश्वरः ॥ १ ॥

प्रसन्नो भव(देव B) देवेश भवदुःखविनाशक(°न B) ।
अनंत(अनेक B)शास्त्रश्रवणादस्माकं भ्रामितं मनः ॥ २ ॥

ममैतत् (केन मे B) कारणं कर्म किं योगः प्रोच्यते [श्रुतौ (स तु B) ।
स योगः (योगस्तु B) षड्विधः प्रोक्तो नानात्वं तस्य [दृश्यते ॥ ३ ॥

अनेकभेदभिन्नाश्चानेकशास्त्रप्रचोदितः (! अनंतभेदभिन्नस्य [अनेकशास्त्रचोदिता B) ।
शास्त्रस्य संगतिर्नास्ति संशयं कथय प्रभो ॥ ४ ॥

नश्यते केन मार्गेण गर्भवासः सुदारुणः (वासस्तु° B) ।
देवानां परमां मुक्तिं (भक्तिं B) श्रुत्वा मुच्यते (तु व° B) मुनिः ॥ ५ ॥

प्रोवाच भगवान् विष्णुः सर्वेषां चैव संगतं (संमतं B) ।

नारायण उवाच (B has this before next half-*śl.*) ।

त्वया हि प्रोक्तमेतच्च (°कथितं यत्तद् B) रहस्यं गुह्यमुत्तमं ।
अकुलागमनामेदं तन्ने ऽहं (अकुलागमकल्पो ऽयं शृणुध्वं) [कथयाम्यहं ॥ ७ ॥

वेदशास्त्रागमैर्विप्राः (°शास्त्रस्य मध्ये तु B) स्वात्मयोगः [प्रशस्यते ।
अनेकभेदभिन्नेन येन (येनैवानेकभेदेन तेन B) सर्वे [विमोहिताः ॥ ८ ॥

मुनय ऊचुः ॥

सर्वशास्त्राणां मध्ये तु (मुनयः सर्वशास्त्रेषु B) योगसाम्यं [निरूपितं ।
तच्छास्त्रं शंभुना प्रोक्तं कुत्र कस्य जनार्दन ॥ ९ ॥

भगवानुवाच (om. B) ॥

हिमाद्रेर्गैह्वरे (हिमाद्रिशिखरे B) रम्ये नानाधातुवि- [चित्रिते ।
अनेकद्रुमसंकीर्णे सहकारोपशोभिते (पुष्पप्राकारशो° [B) ॥ १० ॥

गंगादिसरितस्तत्र सर्वतोर्यैर्निषेविते ।
पुण्यदेशे महासौम्ये संगमे (मंगले B) निरुपद्रवे ॥ ११ ॥

एकांते विजने रम्ये (गोप्ये B) चित्तस्याह्लादकारके ।
तस्मिन्मध्ये महादेवो देवानां दैवतं परं ॥ १२ ॥

सिद्धासन(ने B)समो भूत्वा योगेषु परिनिष्ठितः ।
ध्यानस्थश्चिंतयामास [स] शिवं (*r.* वः) परमेश्वरं (*r.* रः) [॥ १३ ॥

निरंजनं निराकारं निर्विकल्पं निरूपमं (! A. B.) ।
परिपूर्णं परं ब्रह्म तस्मिन् लीनो महेश्वरः ॥ १४ ॥

तस्मिन् (क्वचित् B) काले महामाया शांभवी तत्र [आगता ।
पतिमध्यस्थं हरं दृष्ट्वा स्तुतिं चक्रे च (हि B) पार्वती ॥ १५ ॥

शक्तिरुवाच ॥

नमस्ते विश्वरूपाय विश्वबीजाय (आदिनाथाय विश्व- [नाथाय B) ते नमः ।
सबाह्याभ्यंतरस्थाय नमस्ते विश्वरूपिणे (°धारिणे B) ॥ १६ ॥

सृष्टिस्थितिनिलयानां (विनाशानां B) त्वमेव (त्वं हेतुः [B) परमेश्वर ।
त्वमेको ऽपि त्रिधा भिन्नो ब्रह्मविष्णुशिवाकृतिः ॥ १७ ॥

नमो रजःस्वरूपाय सत्त्वरूपाय ते नमः ।
तमोरूप नमस्तुभ्यं (नमस्तेऽस्तु B) निर्गुणाय नमो नमः ॥ १८ ॥

अध्यात्मविद्याविद्यानां सा विद्या त्वं सुरेश्वर ।
यया सुविद्यया सिद्धाः प्राप्नुवंति परं पदं ॥ १९ ॥ ° ३१ ॥

[चतुर्विंशतितत्त्वांते पुरुषः पंचविंशतिः । om. A]
स जीवस्तु (त्वं B) गुणाधीनो मायया मंत्रवाहकः [(ह्यंच° B) ॥ ३२ ॥ ° ५२ ॥

एवं नानाप्रकारेण पार्वत्या प्रार्थितः शिवः ।
ध्यानादुपाहृतः प्रातः (°उपरतचित्तः B) स्तुत्या ज्ञातो [महेश्वरः ॥ ५३* ॥

तस्मिन्नवसरे देवी साह्लादा शांभवी कला ।
महादेवं नमस्कृत्य तथा प्रश्नो ह्ययं कृतः ॥ ५४ ॥

---

* In MS. A the numbers are shifted on by one hemistich (see v. 7 above).

DR.RUPNATHJI(DR.RUPAK NATH)

अवधार्यतां सुरश्रेष्ठ मद्वाक्यं कृपया हर (शिव B) ।
शास्त्रेष्वनंतपंथानः कर्मभिन्नाः श्रुता मया ॥ ५५ ॥
मे मतिर्भ्रामिता तैस्तु किं सत्यं तत्र वेद्म्यहं(नस्मराम्यहं B)।
तस्मात्कथय सर्वज्ञ कारणं वेदशास्त्रयोः ॥ ५६ ॥
सर्वेषां चैव शास्त्राणां भेदः किं चैक्यवाक्यता ।
षड्दर्शनविवादैश्च वितर्को मनसि स्थितः ॥ ५७ ॥
कर्मणा लभ्यते मोक्षः किं योगः साधनेन च ।
योगश्च (श्चैकः B) सर्वशास्त्रेषु प्राप्यते (०स्त्रे प्रोच्यते B)
[किमनेकधा ॥ ५८ ॥
योगस्य च षडंगानि कानि तानि तपोनिधे(तपोधन B)।
कथयस्व महादेव प्रश्नमन्यं यथार्थतः ॥ ५९ ॥ ० १२३ ॥

II. (*śl.* 53) beg.: देव्युवाच ॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं त्वत्प्रसादाद्भवांतके ॥

III. (*śl.* 68): देव्युवाच ॥
नानापथजुषां पुंसामेको गम्येति(!) कथ्यते ।
योगगम्यं परं ब्रह्म इत्यलीकं वचः प्रभो ॥

IV. (*śl.* 61): देव्युवाच ॥
पुनः पुनर्न पृच्छामि पृच्छामीति पुनः पुनः ।
अन्यश्चानिश्चयो नित्यं कारुण्यं कुरु मे प्रभो ॥

V. (*śl.* 16): ईश्वर उवाच ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां ।
आत्मनः प्रतिकूलानि कर्माणि त्रिविधानि च ॥

VI. (*śl.* 28): ईश्वर उवाच ॥
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ।
ब्रह्मैव तेन गंतव्यं ब्रह्म कर्मसमाधिना ॥

VII. (*śl.* 80): देव्युवाच ॥
देवदेव जगन्नाथ संसारार्णवतारक ।
अधुनोक्तं त्वया शंभो षट्चक्रं तत्किमात्मकं ॥

VIII. (*śl.* 35): ईश्वर उवाच ॥
इदं सर्वं मया दत्तं ज्ञानमध्यात्मकं परं ।
अग्निसोमगते भंगे शिवदीक्षोत्तरा भव ॥

IX. (*śl.* 229): देव्युवाच ॥
चत्वार आश्रमाः पूर्वं यथाव[च्] श्रमिणां हरे ।
अनुक्रमे क्रमो नास्ति प्रत्ययो दृश्यते मम ॥
It ends:
अयं योगः सर्वशास्त्रे विज्ञानीयाद् वरानने ।
गुरुप्रसादाज्ज्ञातव्यं रहस्यं अकुलागमं ॥ २२९ ॥

X. (*śl.* 75): श्रीईश्वर उवाच ॥
हठमंत्रस्तथा राजन्(!) विस्तारं कथ्यतां त्वया ।
स विभाव्यात्ममध्ये तु योगाभ्यासं च पार्वति ॥
It ends:
ज्ञानध्यानविहीनस्य संभवति पुनः पुनः ।
जन्मजन्मेषु वैराग्यं तदा सद्गुरु दृश्यते ॥ ७३ ॥
प्रत्यक्षो ऽपि परोक्षो ऽसौ जायते मंदभागिनां ।
तस्य योगं न रातव्यं – – – – – ॥ ७४ ॥
तस्मात्सर्वप्रयत्नेन योगाभ्यासं महेश्वरि ।
स्वयंबोधस्वरूपेण – – – – – ॥ ७५ ॥

इति श्रीअकुलागमे महातंत्रे योगसारसमुच्चये दशमः पटलः ॥ ० संवत् १६२८ वर्षे ज्येष्ठवदि १ शनौ चतुर्विंशतिज्ञातीयजांबूग्रामे वास्तव्य जमदातटे भट्टश्रीरामजीआत्मजेन जगन्नाथभट्टेन स्वावलोकनार्थं परोपकारार्थं च स्वहस्तेन लिखितं अकुलागमपुस्तकं [H. T. Colebrooke.]

2566.

1248b. Foll. 43; size 9½ in. by 3¾ in.; good, clear Devanāgarī writing (?of 1678 A.D.); eight lines in a page.

The same work; *paṭalas* i.–ix.

This MS. begins:
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥
यस्तु आदौ त्वया नाथ मुनिशिष्यैरनेकधा ।
अनेकशास्त्रमायादौ कथिता परमेश्वर ॥ २ ॥
It ends:
अयं योगः सर्वशास्त्रे विज्ञातव्यो वरानने ।
गुरुप्रसादात् ज्ञातव्यं रहस्यं ह्यकुलागमे ॥ २२९ ॥

इति श्रीअकुलागमे महातंत्रे योगसारसमुच्चये ईश्वरपार्वतीसंवादे चतुराश्रमादिकथनं नाम नवमः पटलः ॥ ० नेपालसंवत् ७९८ समये श्रावणशुदिपंचम्यां शुक्लपक्षे रविदिने लिखितमिति विश्वेश्वरेण समाप्तं ॥

This date perhaps belonged to a previous MS.

The MSS. of the *Akulāgamatantra* mentioned in Bühler's Cat. of Skr. MSS. in Gujarāt etc., iv., p. 252; Peterson, Rep., iii., p. 399

DR.RUPNATHJI(DR.RUPAK NATH)

(judging from the extent) probably contain the same work as the present one.

[H. T. Colebrooke.]

2567.

1048. Foll. 70; size 16½ in. by 3½ in.; neat, modern Bengalī handwriting; seven lines in a page.

Kulārṇava-mahārahasya, a *Tantra* in seventeen chápters (*ullāsa*).

For a full account of the work see Aufrecht, Bodl. Cat., no. 147.

This MS. differs considerably from the next, which, on the whole, agrees with the Oxford MS. It begins:

कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
पप्रच्छेशं परानन्दं पार्वती परमेश्वरं ॥ १ ॥

श्रीदेव्युवाच ॥

भगवन्देव देवेश पञ्चक्रतुविधानक ।
सर्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥ २ ॥

कुलेश परमेशान करुणामयवारिधे ।
सुघोरे घोरसंसारे सर्वदुःखमलीमसे ॥ ३ ॥०

It ends:

इति ते कथितं किंचिद्गुरुनामादिवासनं ।
समासेन कुलेशानि यो जानाति स मुक्तिकः ॥
रहस्यातिरहस्यानां रहस्योहकुलेश्वरि ।
ऊर्ध्वाम्नायः समाख्यातः समासेन न विस्तरात् ।
कुलार्णवमिदं शास्त्रं मुक्तिदमुपवर्णितं ॥

इति श्रीकुलार्णवे महारहस्ये सर्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं सप्तदशोल्लासः ॥

[H. T. Colebrooke.]

2568.

839. Foll. 62; size 12½ in. by 4½ in.; legibly written in Devanāgarī; 10 or 11 lines in a page; modern.

The same work; chapters i.-xvi.

It begins:

श्रीगुरुं गणपं दुर्गां वटुकं शिवमच्युतं ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वंदे विभूतये ॥

etc., as in the Bodleian MS.

It ends:

इति श्रीकुलार्णवे महारहस्ये काम्यकर्मकथनं नाम षोडशो। १६ ॥० संवत् १८६१ माघमासे शुक्लपक्षे अष्टम्यां गुरुवासरे पोथी समाप्ता ॥ [H. T. Colebrooke.]

2569.

1265. Foll. 72; size 7 in. by 4 in.; fairly written in Devanāgarī; 11 or 12 lines in a page.

Kulapradīpa, a treatise, in verse, in commendation and exposition of *Tantric* doctrines, in seven chapters (*prakāśa*), by *Śivānandācārya*.

It begins:

गुरुं प्रणम्य प्रथमं ततो ऽहं
गणाधिपं श्रीपरदेवतां च ।
मुदे महोपासककौलिकानां
निबंधमेकं रचयामि रम्यं ॥ १ ॥

ग्रंथेषु येष्वेषु सदाशिवेन
सविस्तरः श्रीकुलमार्ग उक्तः ।
प्रायः कलौ ते सुलभा न संति
ज्ञानं च तेषां परमं दुरापं ॥ २ ॥

गुरोः कृपा यत्र भवेत्प्रभूता
श्रीदेवतायाश्च महान्प्रसादः ।
तस्यैव पुंसः कुलशास्त्रबोधस्
तस्यात्र भक्तिर्न खलापनोद्या ॥ ३ ॥

येषां दृढा भक्तिरिहास्ति शास्त्रे
विदंति सम्यक्सकलं रहस्यं ।
प्राग्जन्म पुण्याद्विमला मनीषा
ते निंदका नास्य भवंति लोकाः ॥ ४ ॥

भीताः पशुभ्यो निजगोपनार्थं
निंदंति केचित्कुलशास्त्रमेतत् ।
केचित्तु निंदानिरता अबोधा
दौष्ट्येन ये ते निरये न वस्तुं(?) ॥ ५ ॥० ६ ॥

तत्रादौ कुलधर्मप्रशंसा । श्रीकुलार्णवे ।०

DR.RUPNATHJI(DR.RUPAK NATH)

इति कुलधर्मप्रशंसा। इति० प्रथमप्रकाशः॥ fol. 7*a*; इति कौलिकप्रशंसा fol. 12*a*; इति कुलपूजाप्रशंसा fol. 13*b*; इति कुलपूजासमयनिरूपणं। इति० द्वितीयः प्रकाशः॥ अथ पूजाद्रव्यनिरूपणं fol. 15*a*; इति० तृतीयः प्रकाशः॥ अथ कलशस्थापनप्रयोगः fol. 25*a*; अथ भंगास्तोत्रं fol. 35*b*; इति विजयस्तोत्रं fol. 36*b*; इति भंगाविधानं। इति० चतुर्थप्रकाशः॥ अथ द्वितीयतृतीयचतुर्थमकारनिरूपणं fol. 37*b*; इति० पंचमः प्रकाशः॥ fol. 45; इति दूतीयागविधिः fol. 54*b*; इति कुंडगोलादिद्रव्यग्रहणविधिः। इति० षष्ठः प्रकाशः॥ अथ कुलाचारनिरूपणं fol. 56*b*. The last chapter treats chiefly of *cakras*. It concludos with two couplets quoted from the *Kulārṇava*, ending: ० कौलो धर्मः परमगहनो योगिनामप्यगम्यः॥ इति श्रीशिवानंदाचार्यविरचिते कुलप्रदीपे सप्तमः प्रकाशः संपूर्णः॥ संवत् १७६६ ज्येष्ठसुदी १४ भौमे॥ श्लोकसंख्या १६००.

The authorities quoted are: *Uttaratantra* (fol. 51*a*), *Kulacūḍāmaṇi* (fol. 50*b*), *Kulatantra*, *Kulapañcāmṛita* (fol. 40*b*), *Kulāmṛita*, *Kulārṇava*, *Tantracūḍāmaṇi* (fol. 55*a*), *Devīyāmala*, *Pañcayāmala* (fol. 54*b*), *Brahmayāmala*, *Bhāvacūḍāmaṇi* (fol. 43*b*), *Yāmalatantra*, *Rudrayāmala*, *Lalitāvilāsa*, *Liṅgāgama*, *Śivāgama*, *Samayācāratantra*.

[H. T. Colebrooke.]

2570.

1579. Foll. 345; size 18¼ in. by 4¾ in.; good, clear Devanāgarī writing of the latter part of last century; 8, in the latter part 10 or 11, lines in a page. The peculiar nature of the paper, as well as the character of the writing in the latter part of the MS. (from fol. 284), point to Nepalese origin.

Merutantra, so called because it is supposed to overtop all the other *Tantras*, of which *Śiva* says he composed 108 in all (foll. 2*a*, 8*b*).

In the form of conversations between *Śiva* and *Pārvatī* it puts forth its teachings and precepts before an assembly of gods and *munis* who have taken refuge on mount Meru from the persecutions of *Jalandhara*, and who hope to obtain safety by a knowledge of "*Mahākāla*" and "*Mahāmāyā*." It is of the mixed order of *Tantras*, professing to give laws to the *Vāmamārgins* as well as to the *Dakshiṇamārgins*.

It begins (with the numbers added):

यथासत्सदिवाभाति न च भाति कदापि सत्।
यस्मिन् ज्ञानेन सा भाति तस्यै तस्यै नमो नमः॥ १॥

जलंधरेण विजिते सुरासुरनरे ऽखिले।
सूक्ष्मरूपेण ते सर्वे महेशशरणं गताः॥ २॥

दिव्यान्यब्दसहस्राणि समाधिस्थं विलोक्य तं।
प्रार्थितः चार्चिता तैस्तु वामदक्षिणमार्गिभिः॥ ३॥

अथ तदा बोधयुता नत्वा तं संव्यजिज्ञपत्।
ध्यायंति विधिहर्योद्यास्त्वां त्वं ध्यायसि कं पुनः॥ ४॥

मां वदंति परां शक्तिं त्वां वदंति परं शिवं।
आवयोरपि किं ध्येयं तत्त्वं मे कृपया वद॥ ५॥

इति श्रुत्वा वचस्तस्याः स्मित्वा किंचिन्महेश्वरः।
उपवेश्य विधीन्द्रादीन् वाक्यमेतदुवाच ह॥ ६॥

नराणां परमं वृद्धेरायुः सौराः शतं समाः।
तदब्दं देवयोनीनां दिनमायुश्च तच्छतं॥ ७॥

वृध्यते परमं तस्य मानं कलियुगस्य तत्।
धर्माधिक्यसंपूर्णं धर्माणां तं प्रमाणतः॥ ८॥

इदं भूशैलनिहतमैंद्रायुर्मानवं परं।
कृतप्रमाणमब्दं तु समयः कायपूरकः॥ ९॥

एवमिंद्रैरिंद्रसंस्थैर्ब्रह्मणो दिनमुच्यते।
या ध्यायते महामाया मया तेऽद्यासनिर्गमः (!)॥ १०॥

प्रपंचो ब्रह्मदिवसः कुंभको रात्रिरस्य तु।
एवं तस्या घटिकया वर्षमेकं विधेः स्मृतं॥ ११॥

घटीशतमितं तस्या ब्रह्मा जीवति कोटवत्।
पक्षमेकं सतीरूपा शुक्लं कृष्णं तु पार्वती॥ १२॥

ऋतुमात्रं हरिर्जीवेद्वर्षमात्रमहं शिवः।
एवं सा शतवर्षा वै महाकालस्य गेहिणी॥ १३॥

सर्पकंचुकवद्देहं त्यक्त्वा त्यक्त्वा पुनर्युवा।
स सदैव युवा तिष्ठत्समया विषयीकृतः॥ १४॥

एवं श्रुत्वा वचस्तस्य देवी ब्रह्मा हरिः सुराः।
अहंकारस्य विलयं कृत्वा भीता नता पुनः॥ १५॥

DR.RUPNATHJI (DR.RUPAK NATH J)

देवा ऊचुः ॥

त्राहि त्राहि महादेव शरणागतवत्सल ।
साहंकारा वयं मूढा ईश्वरा इति वादिनः ॥ १६ ॥
निर्जिता अपि निर्लज्जा जलधरवधैषिणः ।
मशकाश्च वयं देव न च त्वं मशकायसे ॥ १७ ॥
यस्या अग्रे सापि यस्य पदाधीशेन नो समा(?) ।
महाकालः कथं ज्ञेयः कथं मुक्तिर्भवेच्छिव ॥ १८ ॥
मुक्तयः कतिधा देव श्रेष्ठा का किं च साधनं ।
वदास्माकं यदि कृपा देव्यां विष्णौ सुरेषु च ॥ १९ ॥

ईश्वर उवाच ॥

ज्ञायते तत्प्रभावेन सकलं देववाक्यतः ।
पुनर्मोदयते बुद्धिं तस्य माया दुरत्यया ॥ २० ॥
मया कृतानि तंत्राणि संख्ययाष्टोत्तरं शतं ।
येन येन प्रार्थितो ऽहं देवी संप्रार्थिता मया ॥ २१ ॥
देवीभिः प्रमथैर्देवैस्तन्मोक्षश्चतुर्विधः ।
येन मार्गेण भवति स स मार्गः प्रकाशितः ॥ २२ ॥
तत्रापि तांत्रिका देवा अहंकारेण मोहिताः ।
अन्यान्देवान्विनिंदंति षट्कर्मनिरताः सदा ॥ २३ ॥
कलिना हृतसौभाग्याः स्याने याने च मैथुने ।
जायंते निरतास्तेन निर्धनाः प्रेतरूपिणः ॥ २४ ॥
दृश्यंते ते कलौ तस्माद्भवद्भिः सम्यगीरितं ।
वेदसारं धर्मसारं तंत्राणां हृदयं परं ॥ २५ ॥
महाकालेन यत्प्रोक्तं पंचमीमुक्तिसाधनं ।
सर्वेषां मेरुतां यातं तत्तंत्रं मेरुसंज्ञितं ॥ २६ ॥
शृण्वंतु तद् दृश्यमानं मनो दत्त्वा पृथक् पृथक् ।
पृच्छया निजसंदेहं दूरीकुर्वंत्वशंकिताः ॥ २७ ॥ ०

Some idea of the contents of tho work may be formed from the colophons of the different chapters (*prakāśa*): 1. (fol. 5*a*) *vyavasthāprakāśa*; 2. (fol. 13*b*) *saṃskāra*; 3. (fol. 34*a*) *dīkshā*; 4. (fol. 39*a*) *homavidhi*; 5. (fol. 72*a*) *āhnika* (i.e. *āmnāyānāṃ rahasyaṃ*); 6. (fol. 94*a*) *puraścaryā*; 7. (fol. 102*a*) *siddhisthirīkaraṇa*; 8. (fol. 107*b*) *mudrālakshaṇa*; 9. (fol. 114*b*) *pārthivapūjāvidhi*; 10. (fol. 148*a*) *puraścaryākaulikācāra*; 11. (fol. 177*a*) *kalisaṃsthitaṃ savidhimantrakathanaṃ*; 12. (fol. 193*a*) *vedamantra*; 13. (fol. 202*a*) *navagrahakathana*; 14. (fol. 208*b*) *pratyaṅgirāmantrakathana*; 15. (fol. 217*b*) *vaidikayantrakathana*; 16. (fol. 224*a*) *dakshiṇāmnāyagaṇapatimantra*; 17. (fol. 245*a*) *ūrdhvāmnāyagaṇapatimantra*; 18. (fol. 250*b*) *pūrvāmnāyaṅgaṇapatimantra*; 19. (fol. 268*a*) *paścimāmnāyagaṇapatimantra*; 20. (fol. 272*a*) *uttarāmnāyagaṇapatimantra*; 21. (fol. 275*a*) *sūryamantra*; 22. (fol. 279*a*) *navagrahamantra*; 23. (fol. 314*a*) *brāhmyādyashṭaśaktimantra*; 24. (fol. 319*b*) *daśadigīśamantra*; 25. (fol. 321*a*) *dīpavidhi*. The 26th *prakāśa* is left unfinished, breaking off after v. 993.

A MS. described in the Cat. of Skr. MSS. in the N.-W. Prov., pt. vi., p. 56, is stated to consist of 35 chapters.

[H. T. Colebrooke.]

2571.

